आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थांकः ४२-८

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता ।

षष्ठसप्तमकाण्डद्वयं नामाष्टमो भागः ।

एतत्पुस्तकम्

वे. काशीनाथशास्त्रिभिः आगाशेमहोदयैः संशोधितम् ।

तच्च

कार्यकारीविधस्तैः श्रीमान् गणपतराव यादवराव नातू एम्. ए.

इत्येतैः

आनन्दाश्रमे मुद्रितं प्रकाशितं च ।

नूतनेयमङ्कनावृत्तिः । इ. स. १९७८

(शकाब्दाः १९००)

अस्य सर्वेऽधिकाराः राजशासनानुसारेण स्वायत्तीकृताः ।

मूल्यं-पञ्चविंशतिरूप्यकाः (रु. २५-००)

(कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठोऽष्टकः) ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

हरिः ॐ ।

*प्राचीनवꣳशं करोति देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीꣳ रुद्रा यत्प्राचीनवꣳशं करोति देवलोकमेव तद्यजमान उपावर्तते परिश्रयत्यन्तर्हितो हि देवलोको मनुष्यलोकान्नास्माल्लोकात्स्वेतव्यमिवेत्याहुः को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वेति दिक्ष्वंतीकाशान्करोति (१) उभयोर्लोकयोरभिजित्यै केशश्मश्रु वपते नखानि निकृन्तते मृता वा एषा त्वगमेध्या यत्केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैत्यङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रवेशयन्नप्सु स्नाति साक्षादेव दीक्षातपसी अव रुन्धे तीर्थे स्नाति तीर्थे हि ते तां प्रावेशयन्तीर्थे स्नाति (२) तीर्थमेव समानानां भवत्यपोऽश्नात्यन्तरत एव मेध्यो भवति वासंसा दीक्षयति सौम्यं वै क्षौमं देवतया सोममेष देवतामुपैति यो दीक्षते सोमस्य तनूरसि तनुवं मे पाहीत्याह स्वाया एव देवतामुपै-

* एतत्काण्डव्याख्यानं भाष्यकृता प्रथमकाण्डव्याख्यानेन सहैव कृतमिति तत्रैव द्रष्टव्यम् । तत्रैतदनुवाकस्य भाष्यम् १९५ पृष्ठे द्रष्टव्यम् ।

त्यथो आशिषमेवैतामा शास्तेऽग्नेस्तूषाधानं वायोर्वीतिपानं पितृणां नीविरोषधीनां प्रघातः (३) आदित्यानां प्राचीनतानो विश्वेषां देवानामोतुर्नक्षत्राणामतीकाशास्तद्वा एतत्सर्वदेवत्यं यद्वासो यद्वाससा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति बहिःप्राणो वै मनुष्यस्तस्याशनं प्राणोऽश्नाति सप्राण एव दीक्षत आशितो भवति यावानेवास्य प्राणस्तेन सह मेधमुपैति घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां तद्वै (४) एतत्सर्वदेवत्यं यन्नवनीतं यन्नवनीतेनाभ्यङ्क्ते सर्वा एव देवताः प्रीणाति प्रच्युतो वा एषोऽस्माल्लोकादगतो देवलोकं यो दीक्षितोऽन्तरेव नवनीतं तस्मान्नवनीतेनाभ्यङ्क्तेऽनुलोमं यजुषा व्यावृत्त्या इन्द्रो वृत्रमहन्तस्य कनीनिका परापतत्तदाञ्जनमभवत्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते दक्षिणं पूर्वमाङ्क्ते (५) सव्यश्हि पूर्वं मनुष्या आञ्जते न नि धावते नीव हि मनुष्या धावन्ते पञ्च कृत्व आङ्क्ते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवार्ध रुन्धे परिमितमाङ्क्ते परिमितश् हि मनुष्या आञ्जते सतूलयाऽऽङ्क्तेऽतूलया हि मनुष्या आञ्जते व्यावृत्त्यै यदतूलयाऽऽञ्जीत वज्रं इव स्यात्सतूलयाऽङ्क्ते मित्रत्वाय (६) इन्द्रो वृत्रमहन्तसोऽपोऽभ्यश्रियत तासां यन्मेध्यं यज्ञिय-

(क्षुरकर्मादिसंस्कृतस्य प्राग्वंशप्रवेशाभिधानम्)

सदैवमासीत्तदपोदक्रामत्ते दर्भा अभवन्यद्दर्भपुञ्जीलैः पवयति या एव मेध्या यज्ञियाः सदैवा आपस्ताभिरेवैनं पवयति द्वाभ्यां पवयत्यहोरात्राभ्यामेवैनं पवयति त्रिभिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति पञ्चभिः (७) पवयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञायैवैनं पवयति षड्भिः पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति सप्तभिः पवयति सप्त छन्दाꣳसि छन्दोभिरेवैनं पवयति नवभिः पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनं पवयत्येकविꣳशत्या पवयति दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविꣳशो यावानेव पुरुषस्तमपरिवर्गम् (८) पवयति चित्पतिस्त्वा पुनात्वित्याह मनो वै चित्पतिर्मनसैवैनं पवयति वाक्पतिस्त्वा पुनात्वित्याह वाचैवैनं पवयति देवस्त्वा सविता पुनात्वित्याह सवितृप्रसूत एवैनं पवयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमित्याहाऽऽशिषमेवैतामा शास्ते (९) ॥

(अतीकाशान्करोत्यवशयन्तीर्थे स्नाति प्रघातो मनुष्याणां तद्वा आऽङ्क्ते मित्रत्वाय पञ्चभिरपरिवर्गमष्टाचत्वारिꣳशच्च ॥ १ ॥)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

त्यथो आशिषमेवैतामा शास्तेऽग्नेस्तूषाधानं वायोर्वातपानं पितृणां नीविरोषधीनां प्रघातः (३) आदित्यानां प्राचीनतानो विश्वेषां देवानामोतुर्नक्षत्राणामतीकाशास्तद्वा एतत्सर्वं देवत्यं यद्वासो यद्वाससा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति बहिःप्राणो वै मनुष्यस्तस्याशनं प्राणोऽश्नाति सप्राण एव दीक्षत आशितो भवति यावानेवास्य प्राणस्तेन सह मेधमुपैति घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां तद्वै (४) एतत्सर्वंदेवत्यं यन्नवनीतं यन्नवनीतेनाभ्यङ्क्ते सर्वा एव देवताः प्रीणाति प्रच्युतो वा एषोऽस्माल्लोकादगतो देवलोकं यो दीक्षितोऽन्तरेव नवनीतं तस्मान्नवनीतेनाभ्यङ्क्तेऽनुलोमं यजुषा व्यावृत्त्या इन्द्रो वृत्रमहन्तस्य कनीनिका परापतत्तदाञ्जनमभवद्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते दक्षिणं पूर्वमाङ्क्ते (५) सव्यꣳहि पूर्वं मनुष्या आञ्जते न नि धावते नीव हि मनुष्या धावन्ते पञ्च कृत्व आङ्क्ते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवार्ध रुन्धे परिमितमाङ्क्ते परिमितꣳ हि मनुष्या आञ्जते सतूलयाऽऽङ्क्तेऽतूलया हि मनुष्या आञ्जते व्यावृत्त्यै यदतूलयाऽऽञ्जीत वज्र इव स्यात्सतूलयाङ्क्ते मित्रत्वाय (६) इन्द्रो वृत्रमहन्तसोऽपोऽभ्यश्रियत तासां यन्मेध्यं यज्ञिय

(क्षुरकर्मादिसंस्कृतस्य प्राग्वंशप्रवेशाभिधानम्)

सदेवमासीत्तदपोदकामत्ते दर्भा अभवन्यद्दर्भपुञ्जीलैः पवयति या एव मेध्या यज्ञियाः सदेवा आपस्ताभिरेवैनं पवयति द्वाभ्यां पवयत्यहोरात्राभ्यामेवैनं पवयति त्रिभिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति पञ्चभिः (७) पवयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञायैवैनं पवयति षड्भिः पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति सप्तभिः पवयति सप्त छन्दाꣳसि छन्दोभिरेवैनं पवयति नवभिः पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनं पवयत्येकविꣳशत्या पवयति दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविꣳशो यावानेव पुरुषस्तमपरिवर्गम् (८) पवयति चित्पतिस्त्वा पुनात्वित्याह मनो वै चित्पतिर्मनसैवैनं पवयति वाक्पतिस्त्वा पुनात्वित्याह वाचैवैनं पवयति देवस्त्वा सविता पुनात्वित्याह सवितृप्रसूत एवैनं पवयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमित्याहाऽऽशिषमेवैतामा शास्ते (९) ॥

(अतीकाशान्कंरोत्येवैशयन्तीर्थे स्नाति प्रघातो मनुष्याणां तद्वा आऽङ्क्ते मित्रत्वाय पञ्चभिरपरिवर्गमष्टाचत्वारिꣳशच्च ॥ १ ॥)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः)।

यावन्तो वै देवा यज्ञायापुनत त एवमेवꣳ स्व एवं विद्वान्यज्ञाय पुनीते भवत्येव बहिः पवयित्वाऽन्तः प्र पादयति मनुष्यलोक एवैनं पवयित्वा पुतं देवलोकं प्र णयत्यदीक्षित एकयाऽऽहुत्येत्याहुः स्रुवेण चतस्रो जुहोति दीक्षितत्वाय स्रुचा पञ्चमीं पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्ध आकूत्यै प्रयुजेऽग्नये (१) स्वाहेत्याहाऽऽकूत्या हि पुरुषो यज्ञमभि प्रयुङ्क्ते यजेयेति मेधायै मनसेऽग्नये स्वाहेत्याह मेधया हि मनसा पुरुषो यज्ञमभिगच्छति सरस्वत्यै पूष्णेऽग्नये स्वाहेत्याह वाग्वै सरस्वती पूषा वाचैव पृथिव्या यज्ञं प्र युङ्क्त आपो देवीर्बृहतीर्विश्वशंभुव इत्याह या वै वर्ष्यास्ताः (२) आपो देवीर्बृहतीर्विश्वशंभुवो यदेतद्यजुर्ब्रूयाद्दिव्या आपोऽशान्ता इमं लोकमा गच्छेयुरापो देवीर्बृहतीर्विश्वशंभुव इत्याहास्मा एवैना लोकाय शमयति तस्माच्छान्ता इमं लोकमा गच्छन्ति द्यावापृथिवी इत्याह द्यावापृथिव्योर्हि यज्ञ उर्वन्तरिक्षमित्याहान्तरिक्षे हि यज्ञो बृहस्पतिर्नो हविषा वृधातु (३) इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै यज्ञमव रुन्धे यद्ब्रूयाद्द्विधेरिति यज्ञस्थाणुमृच्छेद्वृधात्वित्याह यज्ञस्थाणुमेव परि वृणक्ति प्रजापतिर्यज्ञमसृजत सोऽस्मात्सृष्टः परा-

(दीक्षाहुत्यभिधानम्)

ऽत्स प्र यजुरब्लीनात्प्र साम तमृगुदयच्छद्यद्दगुदयच्छत्तदौद्ग्रहणस्यौद्ग्रहणत्वमृचा(४)जुहोति यज्ञस्योर्यत्या अनुष्टुप्छन्दसामुदयच्छदित्याहुस्तस्मादनुष्टुभा जुहोति यज्ञस्योर्यत्यै द्वादश वात्सबन्धान्युदयच्छन्नित्याहुस्तस्माद्द्वादशभिर्वात्सबन्धविदो दीक्षयन्ति सा वा एषगंनुष्टुग्वागनुष्टुग्यदेतयर्चा दीक्षयति वाचैवैनꣳ सर्वया दीक्षयति विश्वे देवस्य नेतुरित्याह सावित्र्येतेन मर्तो वृणीत सख्यम्(५)इत्याह पितृदेवत्यैतेन विश्वे राय इषुध्यसीत्याह वैश्वदेव्येतेन द्युम्नं वृणीत पुष्यस इत्याह पौष्ण्येतेन सा वा एषक्सैर्वदेवत्या यदेतयर्चा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति सप्ताक्षरं प्रथमं पदमष्टाक्षराणि त्रीणि यानि त्रीणि तान्यष्टावुपयन्ति यानि चत्वारि तान्यष्टौ यदष्टाक्षरा तेन (६) गायत्री यदेकादशाक्षरा तेन त्रिष्टुग्यद्द्वादशाक्षरा तेन जगती सा वा एषक्सर्वाणि छन्दाꣳसि यदेतयर्चा दीक्षयति सर्वाभिरेवैनं छन्दोभिर्दीक्षयति सप्ताक्षरं प्रथमं पदꣳ सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्ध एकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै (७)॥

(अग्नये ता वृधात्वृचा सख्यं तेन
जुहोति पञ्चदश च)॥ २ ॥

(कृष्णाजिनादिभिर्दीक्षाकरणाभिधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः) ।

ऋक्सामे वै देवेभ्यो यज्ञायाऽतिष्ठमाने कृष्णो रूपं कृत्वाऽपक्रम्यातिष्ठतां तेऽमन्यन्त यं वा इमे उपावर्त्स्यतः स इदं भविष्यतीति ते उपामन्त्रयन्त ते अहोरात्रयोर्महिमानमपनिधाय देवानुपावर्तेतामेष वा ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष साम्नो यत्कृष्णमृक्सामयोः शिल्पे स्थ इत्याहर्क्सामे एवाव रुन्ध एषः (१) वा अह्नो वर्णो यच्छुक्लं कृष्णाजिनस्यैष रात्रिया यत्कृष्णं यदेवैनयोस्तत्र न्यक्तं तदेवाव रुन्धे कृष्णाजिनेनं दीक्षयति ब्रह्मणो वा एतद्रूपं यत्कृष्णाजिनं ब्रह्मणैवैनं दीक्षयतीमां धियꣳ शिक्षमाणस्य देवेत्याह यथायजुरेवैतद्भूर्भो वा एष यद्दीक्षित उल्वं वासः प्रोर्णुते तस्मात् (२) गर्भाः प्रावृता जायन्ते न पुरा सोमस्य क्रयादपोर्णवीति यत्पुरा सोमस्य क्रयादपोर्णवीति गर्भाः प्रजानां परापातुकाः स्युः क्रीते सोमेऽपोर्णुते जायत एव तदथो यथा वसीयाꣳसं प्रत्यपोर्णुते तादृगेव तदङ्गिरसः सुवर्गं लोकं यन्त ऊर्जं व्यभजन्त ततो यदत्यशिष्यत ते शरा अभवन्नूर्गै शरा यच्छरमयी (३) मेखला भवत्यूर्जमेवाव रुन्धे मध्यतः सं

(कृष्णाजिनादिभिर्दीक्षाकरणाभिधानम्)

नह्यति मध्यत एवास्मा ऊर्जं दधाति तस्मान्म-
ध्यत ऊर्जा भुञ्जत ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्य-
मवाचीनममेध्यं यन्मध्यतः संनह्यति मेध्यं चै-
वास्यामेध्यं च व्यावर्तयतीन्द्रो वृत्राय वज्रं प्राहं-
रत्स त्रेधा व्यभवत्स्फ्यस्तृतीयꣳ रथस्तृतीयं यूप-
स्तृतीयम् (४) येऽन्तः शरा अशीर्यन्त ते शरा
अभवन्तच्छराणाꣳ शरत्वं वज्रो वै शराः क्षुत्खलु
वै मनुष्यस्य भ्रातृव्यो यच्छरमयी मेखला भवति
वज्रेणैव साक्षात्क्षुधं भ्रातृव्यं मध्यतोऽप हते त्रिवृ-
द्भवति त्रिवृद्वै प्राणस्त्रिवृतमेव प्राणं मध्यतो यज-
माने दधाति पृथ्वी भवति रज्जूनां व्यावृत्त्यै
मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं
मिथुनत्वाय (५) यज्ञो दक्षिणामभ्यध्यायत्ताꣳ
समभवत्तादिन्द्रोऽचायत्सोऽमन्यत यो वा इतो
जनिष्यते स इदं भविष्यतीति तां प्राविशत्तस्या
इन्द्र एवाजायत सोऽमन्यत यो वै मदितोऽपरो
जनिष्यते स इदं भविष्यतीति तस्या अनुमृश्य
योनिमाऽच्छिनत्सा सूतवशाऽभवत्तत्सूतवशायै
जन्म (६) ताꣳ हस्ते न्यवेष्टयत तां मृगेषु
न्यदधात्सा कृष्णविषाणाऽभवदिन्द्रस्य योनिरसि
मा मा हिꣳसीरिति कृष्णविषाणां प्र यच्छति
सयोनिमेव यज्ञं करोति सयोनिं दक्षिणाꣳ
सयोनिमिन्द्रꣳ सयोनित्वाय कृष्णे त्वा सुस-
स्थाथा इत्याह तस्मादकृष्टपच्या ओषधयः पच्यन्ते

(दण्डादानादिकरणपूर्वकनियमानुष्ठानविधिः)

सुपिप्पलाभ्यस्त्वौषधीभ्य इत्याह तस्मादोषधयः फलं गृह्णन्ति यद्धस्तेन (७) कण्डूयेत पामनं भावुकाः प्रजाः स्युर्यत्स्मयेत नग्नं भावुकाः कृष्णविषाणया कण्डूयतेऽपिगृह्य स्मयते प्रजानां गोपीथाय न पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामवचृतेद्यत्पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामवचृतेद्योनिः प्रजानां परापातुका स्यान्नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति योनिर्वै यज्ञस्य चात्वालं योनिः कृष्णविषाणा योनावेव योनिं दधाति यज्ञस्य सयोनित्वाय (८) ॥

(रुन्ध एष तस्माच्छरमयी यूपस्तृतीयं मिथुनत्वाय जन्म हरतेनाष्टाचत्वारिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः) ।

वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना सा वनस्पतीन्प्राविशत्तैषा वाग्वनस्पतिषु वदति या दुन्दुभौ या तूणवे या वीणायां यद्दीक्षितदण्डं प्रयच्छति वाचमेवावरुन्ध औदुम्बरो भवत्यूर्ग्वा उदुम्बर ऊर्जमेवावरुन्धे मुखेन संमितो भवति मुखत एवास्मा ऊर्जं दधाति तस्मान्मुखत ऊर्जा भुञ्जते (१) क्रीते सोमे मैत्रावरुणाय दण्डं प्र यच्छति मैत्रावरुणो हि पुरस्ताद्दत्विग्भ्यो वाचं विभजति

(दण्डादानादिकरणपूर्वकनियमानुष्ठानविधिः)

तामुविजो यजमाने प्रति ष्ठापयन्ति स्वाहा यज्ञं मनसेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिवीभ्यो हि यज्ञः स्वाहोरोरन्तरिक्षादित्याहान्तरिक्षं हि यज्ञः स्वाहा यज्ञं वातादा रभ इत्याहायमु (२) वाव यः पवते स यज्ञस्तमेव साक्षादा रभते मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्या अदीक्षिष्टायं ब्राह्मण इति त्रिरुपाꣳश्वाह देवेभ्य एवैनं प्राऽऽह त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राऽऽह न पुरा नक्षत्रेभ्यो वाचं वि सृजेयत्परा नक्षत्रेभ्यो वाचं विसृजेयज्ञं विच्छिन्द्यात् (३)उदितेषु नक्षत्रेषु व्रतं छृणुतेति वाचं वि सृजति यज्ञव्रतो वै दीक्षितो यज्ञमेवाभि वाचं वि सृजति यदि विसृजेद्वैष्णवीमृचमनु ब्रूयाद्यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ सं तनोति दैवीं धियं मनामह इत्याह यज्ञमेव तन्मन्दयति सुपारा नो असद्वश इत्याह व्युष्टिमेवाव रुन्धे(४) ब्रह्मवादिनो वदन्ति होतव्यं दीक्षितस्य गृहाꣳइ न होतव्याꣳइति हाविर्वै दीक्षितो यज्जुहुयाद्यजमानस्यावदायं जुहुयाद्यन्न जुहुयाद्यज्ञपरुरन्तरियाद्ये देवा मनोजाता मनोयुज इत्याह प्राणा वै देवा मनोजाता मनोयुजस्तेष्वेव परोक्षं जुहोति तन्नेव हुतꣳस्वपन्तं वै दीक्षितꣳ रक्षाꣳसि जिघाꣳसन्त्यग्निः (५)खलु वै रक्षोहाऽग्ने त्वꣳसु जागृहि वयꣳसु मन्दिषीमहीत्या-

हाग्निमेवाधिपां कृत्वा स्वपिति रक्षसामपहत्या अव्र-
त्यमिव वा एष करोति यो दीक्षितः स्वपिति त्वमग्ने
व्रतपा असीत्याहाग्निर्वै देवानां व्रतपतिः स एवैनं
व्रतमा लम्भयति देव आ मर्त्येष्वेत्याह देवः (३)
ह्येष सन्मर्त्येषु त्वं यज्ञेष्वीड्य इत्याहैतꣳ हि यज्ञे
ष्वीडतेऽप वै दीक्षितात्पुरुषꣳ इन्द्रियं देवताः क्राम-
न्ति विश्वे देवा अभि मामाऽववृत्रन्नित्याहेन्द्रियेणै-
वैनं देवताभिः सं नयति यदेतद्यजुर्न ब्रूयाद्यावत एव
पशूनभि दीक्षेत तावन्तोऽस्य पशवः स्यू रास्वेयंतू
(७) सोमाऽऽभ्यो भरेत्याहापरिमितानेव पशूनव
रुन्धे चन्द्रमसि मम भोगाय भवेत्याह यथादे-
वतमेवैनाः प्रति गृह्णाति वायवे त्वा वरुणाय त्वेति
यदेवमेता नानुदिशेदयथादेवतं दक्षिणा गमयदा
देवताभ्यो वृश्च्येत यदेवमेता अनुदिशति यथादेव-
तमेव दक्षिणा गमयति न देवताभ्य आ(८)वृश्च्य-
ते देवीरापो अपां नपादित्याह यद्वो मेध्यं यज्ञियꣳ
सदेवं तद्वो माऽवं क्रमिषमिति वावैतदाहाच्छिन्नं
तन्तुं पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वाऽ-
त्येति (९)॥

(मुञ्जतेऽयं छिन्द्याद्रुन्धेऽग्निराह देव इयं देवताभ्य आ चयस्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
प्रथमप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

(प्रायणीयाविवानन्द)

अथ षष्ठाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः)।

देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्तेऽन्योन्यमुपाधावन्त्वया प्र जानाम त्वयेति तेऽदित्याꣳ समभ्रियन्त त्वया प्र जानामेति साऽब्रवीद्वरं वृणै प्रत्प्रायणा एव वो यज्ञा मदुदयना असन्निति तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः पञ्च देवता यजति पञ्च दिशो दिशां प्रज्ञात्यै (१) अथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पथ्याꣳ स्वस्तिमेयजन्प्राचीमेव तया दिशं प्राजानन्नग्निना दाक्षिणा सोमेन प्रतीचीꣳ सवित्रोदीचीमदित्योर्ध्वां पथ्याꣳ स्वस्तिं यजति प्राचीमेव तया दिशं प्रजानाति पथ्याꣳ स्वस्तिमिष्ट्वाऽग्नीषोमौ यजति चक्षुषी वा एते यज्ञस्य यदग्नीषोमौ ताभ्यामेवानु पश्यति (२) अग्नीषोमाविष्ट्वा सवितारं यजति सवितृप्रसूत एवानु पश्यति सवितारमिष्ट्वाऽदितिं यजतीयं वा अदितिरस्यामेव प्रतिष्ठायानु पश्यत्यदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो वै देवानां विशो देवविशं खलु वै कल्पमानं मनुष्यविशमनु कल्पते यन्मारुतीमृचमन्वाह विशां कल्पत्यै ब्रह्मवादिनो वदन्ति प्रयाजवदननूयाजं प्रायणीयं कार्यमनूयाजवत् (३ अप्रयाजमुदयनीयमितीमे वै प्रयाजा अमी अनूयाजाः सैव सा यज्ञस्य संततिस्तत्तथा न कार्यमात्मा वै प्रयाजाः प्रजाऽनूयाजा यत्प्र-

याजानन्तरियादात्मानमन्तरियाद्यदनूयाजान्त-
रियात्प्रजामन्तरियाद्यतः खलु वै यज्ञस्य वित-
तस्य न क्रियते तदनु यज्ञः परा भवति यज्ञं
पराभवन्तं यजमानोऽनु (४) परा भवति
प्रयाजवद्देवानूयाजवत्प्रायणीयं कार्यं प्रयाजवद-
नूयाजवदुदयनीयं नाऽऽत्मानमन्तरेति न प्रजां न
यज्ञः पराभवति न यजमानः प्रायणीयस्य
निष्क्रास उदयनीयमभि निर्वपति सैव सा यज्ञस्य
संततिर्याः प्रायणीयस्य याज्या यत्ता उदयनीयस्य-
याज्याः कुर्यात्परोऽक्षं लोकमा रोहेत्प्रमायुकः
स्याद्याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनी-
यस्य याज्याः करोत्यस्मिन्नेव लोके प्रति
तिष्ठति (५) ॥

(प्रज्ञात्यै प्रयत्यनूयाजवद्यजमानोऽनु पुरोनुवाक्यास्ता अष्टौ च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथम-
प्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः) ।

कद्रूश्च वै सुपर्णी चाऽऽत्मरूपयोरस्पर्धेतां सा
कद्रूः सुपर्णीमजयत्साऽब्रवीच्चतीयस्यामितो दिवि
सोमस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्वेतियं वै
कद्रूरसौ सुपर्णी छन्दाꣳसि सौपर्णेयाः साऽब्रवीद-
स्मै वै पितरौ पुत्रान्बिभृतस्तृतीयस्यामितो दिवि सो-
मस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्व (१) इति

(अरुणया सोमक्रयाभिधानम्)

मा कद्रूरवोचदिति जगत्युदपतच्चतुर्दशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा पशुभिश्च दीक्षया चाऽगच्छत्तस्माज्जगती छन्दसां पशव्यतमा तस्मात्पशुमन्तं दीक्षोपं नमति त्रिष्टुगुदपतत्त्रयोदशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा दक्षिणाभिश्च (२) तपसा चाऽगच्छत्तस्मात्त्रिष्टुभो लोके माध्यंदिने सवने दक्षिणा नीयन्त एतत्खलु वाव तप इत्याहुर्यः स्वं ददातीति गायत्र्युदपतच्चतुरक्षरा सत्यजया ज्योतिषा तमस्या अजाऽभ्यरुन्ध तदजायां अजत्वꣳ सा सोमं चाऽहरच्चत्वारि चाक्षराणि साऽष्टाक्षरा समपद्यत ब्रह्मवादिनो वदन्ति (३) कस्मात्सत्याद्गायत्री कनिष्ठा छन्दसाꣳ सती यज्ञमुखं परीयायेति यदेवादः सोममाऽहरत्तस्माद्यज्ञमुखं पर्येत्तस्मात्तेजस्विनीतमा पद्भ्यां द्वे सवने समगृह्णान्मुखेनैकं यन्मुखेन समगृह्णात्तदधयत्तस्माद्द्वे सवने शुक्रवती प्रातःसवनं च माध्यंदिनं च तस्मात्तृतीयसवन ऋजीषमभि षुण्वन्ति धीतमिव हि मन्यन्ते (४)आशिरमवं नयति सशुक्रत्वायाथो सं भरत्येवैनत्तꣳ सोममाहियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्स तिस्रो रात्रीः परिमुषितोऽवसत्तस्मात्तिस्रो रात्रीः क्रीतः सोमो वसति ते देवा अब्रुवन्स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामेति ते वाचꣳ स्त्रियमेकहायनीं कृत्वा तया निरक्रीणन्त्सा रोहिद्रूपं

(अरुणया सोमक्रयप्रकाराभिधानम्)

क्रत्वा गन्धर्वेभ्यः (५) अपक्रम्यातिष्ठत्तद्रोहितो जन्म ते देवा अब्रुवन्नप युष्मदक्रमीन्नास्मानुपावर्तते वि ह्वयामहा इति ब्रह्म गन्धर्वा अवदन्नगायन्देवाः सा देवान्गायत उपावर्तत तस्माद्गायन्तꣳ स्त्रियः कामयन्ते कामुका एनꣳ स्त्रियो भवन्ति य एवं वेदाथो य एवं विद्वानपि जन्येषु भवति तेभ्य एव ददात्युत यद्बहुतयाः (६) भवन्त्येकहायन्या क्रीणाति वाचैवैनꣳ सर्वया क्रीणाति तस्मादेकहायना मनुष्या वाचं वदन्त्यकूटयाऽकर्णयाऽकाणयाऽश्लोणयाऽसमशफया क्रीणाति सर्वयैवैनं क्रीणाति यच्छ्वेतया क्रीणीयाद्दुश्चर्मा यजमानः स्यायत्कृष्णयाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्यायद्रूपया वार्त्रघ्नी स्यात्स वाऽन्यं जिनीयात्तं वाऽन्यो जिनीयादरुणया पिङ्गाक्ष्या क्रीणात्येतद्वै सोमस्य रूपꣳ स्वयैवैनं देवतया क्रीणाति (७) ॥

(निष्क्रीणीष्व दक्षिणामिश्च वदन्ति मन्यन्ते गन्धर्वेभ्यो बहुतयाः पिङ्गाक्ष्या दर्शं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः) ।

तद्धिरण्यमभवत्तस्माद्द्रव्यो हिरण्यं पुनन्ति ब्रह्मवादिनो वदन्ति कस्मात्सत्यादनास्थिकेन प्रजाः

(अरुणया सोमक्रयप्रकाराभिधानम्)

प्रवीयन्तेऽस्यन्वतीर्जायन्त इति यद्धिरण्यं घृतेऽव-
धायं जुहोति तस्मादनास्थिकेन प्रजाः प्र वीयन्तेऽ-
स्यन्वतीर्जायन्त एतद्वा अग्नेः प्रियं धाम यद्घृतं
तेजो हिरण्यमियं तें शुक्र तनूरिदं वर्च इत्याह
सतेजसमेवैनꣳ सतनुं (१) करोत्यथो सं भर-
त्येवैनं यदबद्धमवद्ध्यादूर्माः प्रजानां परापातुकाः
स्युर्बद्धमवं दधाति गर्भाणां धृत्यै निष्टक्यं बध्नाति
प्रजानां प्रजननाय वाग्वा एषा यत्सोमक्रयणी
जूरसीत्याह यद्धि मनसा जवते तद्वाचा वदति
धृता मनसेत्याह मनसा हि वाग्धृता जुष्टा
विष्णव इत्याह (२) यज्ञो वै विष्णुर्यज्ञायैवैनां
जुष्टां करोति तस्यास्ते सत्यसवसः प्रसव इत्याह
सवितृप्रसूतामेव वाचमवं रुन्धे काण्डेकाण्डे वै
क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येष खलु
वा अरक्षोहतः पन्था योऽग्नेश्च सूर्यस्य च सूर्यस्य
चक्षुराऽरुहमग्नेरक्षणः कनीनिकामित्याह य एवा-
रक्षोहतः पन्थास्तꣳ समारोहति (३) वाग्वा
एषा यत्सोमक्रयणी चिदसि मनाऽसीत्याह
शास्त्येवैनामेतत्तस्माच्छिष्टाः प्रजा जायन्ते चिद-
सीत्याह यद्धि मनसा चेतयते तद्वाचा वदति
मनाऽसीत्याह यद्धि मनसाऽभिगच्छति तत्करोति
धीरसीत्याह यद्धि मनसा ध्यायति तद्वाचा
(४) वदति दक्षिणाऽसीत्याह दक्षिणा ह्येषा
यज्ञियाऽसीत्याह यज्ञियामेवैनां करोति क्षत्रि-

याऽसीत्याह क्षत्रिया ह्येषाऽदितिरस्युभयतः शीर्ष्णीत्याह यदेवाऽऽदित्यः प्रायणीयो यज्ञानामादित्य उदयनीयस्तस्मादेवमाह यदबद्धा स्याद्यजता स्याद्यत्पदिबद्धाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्यात् (५) यत्कर्णगृहीता वाऽन्नी स्यात्स वाऽन्यं जिनीयात्तं वाऽन्यो जिनीयान्मित्रस्त्वा पदि बध्नात्वित्याह मित्रो वै शिवो देवानां तेनैवैनं पदि बध्नाति पूषाऽध्वनः पात्वित्याहेयं वै पूषेमामेवास्या अधिपामकः समष्ट्या इन्द्रायाध्यक्षायेत्याहेन्द्रमेवास्या अध्यक्षं करोति (६) अनु त्वा माता मन्यतामनु पितेत्याहानुमतयैवैनया क्रीणाति सा देवि देवमच्छेहीत्याह देवी ह्येषा देवः सोम इन्द्राय सोममित्याहेन्द्राय हि सोम आहियते यदेतद्यजुर्ब्रूयात्परांच्येव सोमक्रयणीयाद्रुद्रस्त्वाऽऽ वर्तयत्वित्याह रुद्रो वै क्रूरः (७) देवानां तमेवास्यै परस्ताद्धात्यावृत्त्यै क्रूरमिव वा एतत्करोति यद्रदस्य कीर्तयति मित्रस्य पथेत्याह शान्त्यै वाचा वा एष विक्रीणीते यः सोमक्रयण्या स्वस्ति सोमसखा पुनरेहि सह रय्येत्याह वाचैव विक्रीय पुनरात्मन्वाचं धत्तेऽनुपदासुकाऽस्य वाग्भवति य एवं वेद (८)

(सर्वतनु विष्णव इत्याह समारोहति ध्यायति तद्वाचा यजमानः स्यात्करोति क्रूरो वेद) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया षष्ठाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(पदसंग्रहणाभिधानम्)

(अथ षष्ठाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः)।

षट्पदान्यनुनिष्क्रामति षडहं वाङ्नार्तिं वदत्युत संवत्सरस्यार्यने यावत्येव वाक्कामयं रुन्धे सप्तमे पदे जुहोति सप्तपदा शाक्करी पशवः शाक्करी पशूनेवाव रुन्धे सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै वस्व्यसि रुद्राऽसीत्याह रूपमेवास्या एतन्महिमानम् (१) व्याचष्टे बृहस्पतिस्त्वा सुम्ने रण्वत्वित्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै पशूनव रुन्धे रुद्रो वसुभिरा चिकेत्वित्याहाऽऽवृत्त्यै पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इत्याह पृथिव्या ह्येष मूर्धा यद्देवयजनमिडायाः पद इत्याहेडाये ह्येतत्पदं यत्सोमक्रयण्यै घृतवति स्वाहा(२)इत्याह यदेवास्यै पदाद्घृतमपीड्यत तस्मादेवमाह यदध्वर्युरनभावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्ाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्ाꣳसि घ्नन्ति काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्ाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्सामपहत्यै(३)इदमहꣳ रक्सो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति पशवो वै सोमक्रयण्यै पदं यावत्सुतꣳ सं वपति पशूनेवाव रुन्धेऽस्मे राय इति सं वपत्यात्मानमेवाध्वर्युः (४)

पशुभ्यो नान्तरैति त्वे राय इति यजमानाय प्र यच्छति यजमान एव रायिं दधाति तोते राय इति पत्नियै अर्धो वा एष आत्मनो यत्पत्नी यथा गृहेषु निधत्ते तादृगेव तत्त्वष्टामती ते सपेयेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधात्यस्मै वै लोकाय गार्हपत्य आधीयतेऽमुष्मा आहवनीयो यद्गार्हपत्य उपवपेदस्मिँल्लोके पशुमान्स्यादथ यदाहवनीयेऽमुष्मिँल्लोके पशुमान्स्यादुभयोरुपवपत्युभयोरेवैनं लोकयोः पशुमन्तं करोति (५) ॥

(महिमानः स्वाहाऽपहत्या अध्वर्युर्धीयते चतुर्विꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके नवमोऽनुवाकः) ।

ब्रह्मवादिनो वदन्ति विचित्यः सोमा ३ न विचित्या ३ इति सोमो वा ओषधीनाꣳ राजा तस्मिन्यदापन्नं ग्रसितमेवास्य तद्यद्विचिनुयाद्यथाऽऽस्याद्ग्रसितं निष्खिदति तादृगेव तद्यन्न विचिनुयाद्यथाऽक्षन्नापन्नं विधावति तादृगेव तत्क्षोधुकोऽध्वर्युः स्यात्क्षोधुको यजमानः सोमविक्रयिन्त्सोमꣳ शोधयेत्येव ब्रूयाद्यदीतरम् (१) यदीतरमभ्येनेव सोमविक्रयिणमपश्यति तस्मात्सोमविक्रयी क्षोधुकोऽरुणो ह स्माऽऽहौपवेशिः सोम-

(सोमोन्मानाभिधानम्)

क्रयेण एवाहं तृतीयसवनमवं रुन्ध इति पशूनां चर्मन्मिमीते पशूनेवावं रुन्धे पशवो हि तृतीयꣳ सवनं यं कामयेतापशुः स्यादिति यूक्षतस्तस्य मितो-तर्क्षी वा अपशव्यमपशुरेव भवति यं कामयेत पशुमान्स्यादिति लोमतस्तस्य मिमीते-तद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवत्यपामन्ते क्रीणाति सरसमेवैनं क्रीणात्यमात्योऽसीत्याहामैवैनं कुरुते शुक्रस्ते ग्रह इत्याह शुक्रो ह्यस्य ग्रहो न साऽच्छं याति महि-मानमेवास्याच्छं यात्यनसा (३) अच्छं याति तस्मादनोवाह्यꣳ समे जीवनं यत्र खलु वा एतꣳ शीर्ष्णा हरन्ति तस्माच्छीर्षहार्यं गिरौ जीवनमभि त्यं देवꣳसवितारमित्यतिच्छन्दसर्चा मिमीतेऽतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वैरेवैनं छन्दो-भिर्मिमीते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसर्चा मिमीते वर्ष्मैवैनꣳ समानानां करोत्येकयैकयोत्सर्गम् (४) मिमीतेऽयातयाग्नि-यायातयाग्नियैवैनं मिमीते तस्मान्नानावीर्या अङ्गु-लयः सर्वास्वङ्गुष्ठमुप नि गृह्णाति तस्मात्समा-वद्वीर्योन्याभिरङ्गुलिभिस्तस्मात्सर्वा अनु सं चरति यत्सह सर्वाभिर्मिमीत सꣳश्लिष्टा अङ्गुलयो जायेरन्नेकयैकयोत्सर्गं मिमीते तस्माद्विभक्ता जायन्ते पञ्च कृत्वो यजुषा मिमीते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवावं रुन्धे पञ्च कृत्वस्तूष्णीम्

(अन्यैः सोमक्रयाभिधानम्)

(५) दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्-विराजैवान्नाद्यमव रुन्धे यद्यजुषा मिमीते भूतमेवाव रुन्धे यत्तूष्णीं भविष्यद्वै तावानिव सोमः स्याद्यावन्तं मिमीते यजमानस्यैव स्यान्नापि सदः स्यानां प्रजाभ्यस्त्वेत्युप समूहति सदस्यानेवान्वाभजति वाससोप नह्यति सर्वदेवत्यं वै (६) वासः सर्वाभिरेवैनं देवताभिः समर्धयति पशवो वै सोमः प्राणाय त्वेत्युप नह्यति प्राणमेव पशुषु दधाति व्यानाय त्वेत्यनु शुन्धति व्यानमेव पशुषु दधाति तस्मात्स्वपन्तं प्राणा न जहति (७) ॥

(इवरं पशुमान्त्स्याद्यात्यनसोत्सर्गं तूष्णीꣳ
सर्वदेवत्यं वै त्रयस्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके प्रथमप्रपाठके दशमोऽनुवाकः) ।

यत्कलया ते शफेन ते क्रीणानीति पणेतागोअर्धꣳ सोमं कुर्यादगोअर्धं यजमानमगोअर्धमध्वर्युं गोस्तु महिमानं नाव तिरेद्वा ते क्रीणानीत्येव ब्रूयाद्गोअर्धमेव सोमं करोति गोअर्धं यजमानं गोअर्धमध्वर्युं न गोर्महिमानमव तिरत्यजया क्रीणाति सतपसमेवैनं क्रीणाति हिरण्येन क्रीणाति सशुक्रमेव (१ एनं क्रीणाति धेन्वा क्रीणाति साशिरमेवैनं क्रीणात्यृषभेण क्रीणाति सेन्द्रमेवैनं

(अन्यैः सोमक्रयाभिधानम्)

क्रीणात्यनड्वहा क्रीणाति वह्निर्वा अनड्वान्वह्निनैव वह्निं यज्ञस्य क्रीणाति मिथुनाभ्यां क्रीणाति मिथुनस्यावरुद्ध्यै वासंसा क्रीणाति सर्वदेवत्यं वै वासः सर्वभ्य एवैनं देवताभ्यः क्रीणाति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धे (२) तपसस्तनूरसि प्रजापतेर्वर्ण इत्याह पशुभ्य एव तद्ध्वर्युर्नि हनुत आत्मनोऽनाव्रस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेद शुक्रं ते शुक्रेण क्रीणामीत्याह यथायजुरेवैतद्देवा वै येन हिरण्येन सोममक्रीणन्तदभीषहा पुनराऽददत को हि तेजसा विक्रेष्यत इति येन हिरण्येन (३) सोमं करीणीयात्तदभीषहा पुनरा ददीत तेज एवाऽऽत्मन्धत्तेऽस्मै ज्योतिः सोमविक्रयिणि तम इत्याह ज्योतिरेव यजमाने दधाति तमसा सोमविक्रयिणमपर्यति यदनुपग्रथ्य हन्याद्दन्दशूकास्ताः समाः सर्पाः स्युरिदमहः सर्पाणां दन्दशूकानां ग्रीवा उप ग्रथ्नामीत्याहादन्दशूकास्ताः समाः सर्पा भवन्ति तमसा सोमविक्रयिणं विध्यति स्वान (४) भ्राजेत्याहैते वा अमुष्मिँल्लोके सोममरक्षन्तेभ्योऽधि सोममाऽहरन्यदेतेभ्यः सोमक्रयणान्नानुदिशेदक्रीतोऽस्य सोमः स्यान्नास्यैतेऽमुष्मिँल्लोके सोमं रक्षेयुर्यदेतेभ्यः सोमक्रयणाननुदिशति

(क्रीतसोमस्य शकटेन नयनाभिज्ञानम्)

क्रीतोऽस्य सोमो भवत्येतेऽस्यामुष्मिँल्लोके सोमꣳ रक्षन्ति (५)

(वसुकमेव रुन्ध इति येन हिरण्येन स्वान चतुश्चत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः)।

वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह शन्नो इन्द्राय पीतय इन्द्रायेत्याह विश दक्षिणमित्याह देवा वै यꣳ सोममक्रीणन्तमिन्द्रस्योरौ दक्षिण आऽसादयन्नेष खलु वा एतर्हीन्द्रो यो यजते तस्मादेवमाहोदायुषा स्वायुषेत्याह देवता एवान्वारभ्योत् (१) तिष्ठत्यर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो ह्येतर्हि सोमोऽदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्वि वा एनमेतदर्धयति यद्वारुणꣳ सन्तं मैत्रं करोति वारुण्यर्चाऽऽ सादयति स्वयैवैनं देवतया समर्धयति वाससा पर्यानह्यति सर्वदेवत्यं वै वासः सर्वाभिरेव (२) एनं देवताभिः समर्धयत्यथो रक्षसामपहत्यै वनेषु व्यन्तरिक्षं ततानेत्याह वनेषु हि व्यन्तरिक्षं ततान वाजमर्वत्सित्यत्याह वाजꣳ ह्यर्वत्सु पयो अघ्रियास्वित्याह पयो ह्यघ्रियासु हृत्सु क्रतुमित्याह हृत्सु हि क्रतुं वरुणो विक्ष्वग्निमित्याह

(क्रीतसोमस्य शकटेन नयनाभिधानम्)

वरुणो हि विक्ष्वग्निं दिवि सूर्यम् (३) इत्याह दिवि हि सूर्यꣳ सोममद्रावित्याह ग्रावाणो वा अद्रयस्तेषु वा एष सोमं दधाति यो यजते तस्मादेवमाहोदु त्यं जातवेदसमिति सौर्यर्चा कृष्णाजिनं प्रत्यानह्यति रक्षसामपहत्या उन्नावेतं धूर्षाहावित्याह यथायजुरेवैतत्प्र च्यवस्व भुवस्पत इत्याह भूतानाꣳ हि (४) एष पतिर्विश्वान्यभि धामानीत्याह विश्वानि ह्येꣳ षोऽभि धामानि प्रच्यवते मा त्वा परिपरी विदादित्याह यदेवादः सोममाहियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्तस्मादेवमाहापरिमोषाय यजमानस्य स्वस्त्ययन्यसीत्याह यजमानस्यैवैष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै वरुणो वा एष यजमानमभ्यैति यत् (५) क्रीतः सोम उपनद्धो नमो मित्रस्य वरुणस्य चक्षस इत्याह शान्त्या आ सोमं वहन्त्यग्निना प्रति तिष्ठते तौ संभवन्तौ यजमानमभि संभवतः परा खलु वावैष मेधायाऽऽत्मानमारभ्य चरति यो दीक्षितो यदग्नीषोमीयं पशुमालभत आत्मनिष्क्रयण एवास्य स तस्मात्तस्य नाऽऽर्द्धेयं पुरुषनिष्क्रयण इव ह्यथो खल्वाहुरग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति यदग्नीषोमीयं पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाऽऽर्द्धेयं वारुण्यर्चा परि चरति स्वयैवैनं देवतया परि चरति (६) ॥

(अन्वारभ्योत्सर्वोमिरेव सूर्यं भूतानाः
होति यदाहुः सप्तविंशतिश्च) ।

इति श्रीमत्सायणाचार्यविरचिते तैत्तिरीयसंहिताभाष्ये षष्ठाष्टके
प्रथमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

प्राचीनवंशं यावन्त ऋक्सामे वै वाग्वै देवेभ्यो देवा वै देवयजनं कदूष्ण तद्विदेभ्यः षट्पदानि ब्रह्मवादिनो विचित्यो यत्कलया ते वारुणो वै क्रीतः सोम एकादश ॥ ११ ॥

प्राचीनवंशं स्वाहेत्याह येऽन्तः शरा ह्येव संतपसा
च यत्कर्णगृहीतेति सोमतो वारुणः
षट्संपतिः ॥ ७६ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीय तैत्तिरीयसंहितायां षष्ठाष्टके
प्रथमः प्रपाठकः ॥ १ ॥

(अथ षष्ठाष्टके द्वितीयः प्रपाठकः) ।
(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयाद्यज्ञं विच्छिन्द्याद्यदुभावविमुच्य यथाऽऽनागतायाऽऽतिथ्यं क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान्भवत्यविमुक्तोऽन्योऽथाऽऽतिथ्यं गृह्णाति यज्ञस्य संतत्यै पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतं

(आतिथ्येष्ट्यभिधानम्)

निर्वपति यद्वै पत्नीं यज्ञस्य करोति मिथुनं तदथो पत्न्या एव (१) एष यज्ञस्याऽवारम्भोऽनवच्छित्त्यै यावद्वैवै राजाऽनुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दांसि खलु वै सोमस्य राज्ञोऽनुचराण्यग्नेरातिथ्यमसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति सोमस्याऽऽतिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोत्यतिथेरातिथ्यमसि विष्णवे त्वेत्याह जगत्यै (२) एवैतेन करोत्यग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वेत्याहानुष्टुभ एवैतेन करोति इषेनार्य त्वा सोमभृते विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति पञ्च कृत्वो गृह्णाति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे ब्रह्मवादिनो वदन्ति कस्मात्सत्या-द्गायत्रिया उभयत आतिथ्यस्य क्रियत इति यद्देवादः सोममा (३) अहरत्तस्माद्गायत्रिया उभयत आतिथ्यस्य क्रियते पुरस्ताच्चोपरिष्टाच्च शिरो वा एतद्यज्ञस्य यदातिथ्यं नवकपालः पुरोडाशो भवति तस्मान्नवधा शिरो विष्यूतं नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता स्तोमेन संमितास्तेजस्त्रिवृत्तेज एव यज्ञस्य शीर्षन्दधाति नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता प्राणेन संमितास्त्रिवृद्वै(४)प्राणस्त्रिवृतमेव प्राणमभिपूर्वं यज्ञस्य शीर्षन्दधाति प्रजापतेर्वा एतानि प.

(आतिथ्येष्ट्याभिधानम्)

क्षमाणि यदश्ववालैक्षवी तिरश्ची यदाश्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची प्रजापतेरेव तच्चक्षुः संभरति देवा वै या आहुतीरजुहवुस्ता असुरा निष्कावमादन्ते देवाः कार्ष्मर्यमपश्यन्कर्मण्यो वै कैमनेन कुर्वीतेति ते कार्ष्मर्यमयान्परिधीन् (५) अकुर्वत तैर्वै ते रक्षाꣳस्यपाघ्नत यत्कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै सꣳ स्पर्शयति रक्षसामनन्ववचाराय न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षाꣳस्यपहन्त्युर्ध्वं समिधावा दधात्युपरिष्टादेव रक्षाꣳस्यप हन्ति यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो वदन्ति (६) अग्निश्च वा एतौ सोमश्च कथा सोमायाऽऽतिथ्यं क्रियते नाग्नय इति यदग्नावग्निं मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियतेऽथो खल्वाहुरग्निः सर्वा देवता इति यद्ध विरासाद्याग्निं मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयति (७) ॥

(पत्न्या एव जगत्या आ त्रिवृद्वै परिधीन्वदन्त्येकचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(तानूनप्त्रेष्ट्यभिधानम्)

(अथ षष्ठाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः)।

देवासुराः संयत्ता आसन्ते देवा मिथो विप्रिया आसन्तें १ ऽन्योऽन्यस्मै ज्येष्ठ्यायातिष्ठमानाः पञ्चधा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेऽमन्यन्तासुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो यद्व इमाः प्रियास्तनुवस्ताः समवद्याम्है ताभ्यः स निर्ऋच्छाद्यः (१) नः प्रथमो १ ऽन्योऽन्यस्मै द्रुह्यादिति तस्माद्यः सतानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्च्छति यत्तानूनप्त्रꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवति पञ्च कृत्वोऽवद्यति पञ्चधा हि ते तत्समवद्यन्ताथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्ध आपतये त्वा गृह्णामीत्याह प्राणो वै (२) आपतिः प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर्मन एव प्रीणाति तनूनप्त्र इत्याह तनुवो हि ते ताः समवद्यन्त शाक्तरायेत्याह शक्त्यै हि ते ताः समवद्यन्त शक्मन्नोजिष्ठायेत्याहौजिष्ठꣳ हि ते तदात्मनः समवद्यन्तानाधृष्टमस्यनाधृष्यमित्याहानाधृष्टꣳ ह्येतदनाधृष्यं देवानामोजः (३) इत्याह देवानाꣳ ह्येतदोजोऽभिशस्तिपा अनभिशस्तेन्यमित्याहाभिशस्तिपा ह्येतदनभिशस्तेन्यमनु मे दीक्षां दीक्षा-

पतिमन्यतामित्याह यथायजुरेवैतद्घृतं वै देवा वज्रं कृत्वा सोममघ्नन्नान्तिकमिव खलु वा अस्यै-तच्चरन्ति यत्तानूनप्त्रेण प्रचरन्त्यशुरशुस्ते देव सोमाऽऽप्यायतामित्याह यत् (४) एवास्यापु-वायते यन्मीयते तदेवास्यैतेनाऽऽप्याययत्या तुभ्य-मिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेत्याहोमा-वेवेन्द्रं च सोमं चाऽऽप्याययत्या प्याययं सखी-न्त्सन्या मेधयेत्याहर्त्विजो वा अस्य सख्यायस्ता-नेवाऽऽप्यायग्रयति स्वस्ति ते देव सोम सुत्यामं-शीय (५) इत्याहाऽऽशिषमेवैतामा शास्ते प्र वा एतेऽस्माल्लोकाच्च्यवन्ते ये सोममाप्याययन्त्य-न्तरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः प्रेषे भगायेत्याह द्यावापृथिवीभ्यामिव नमस्कृत्या-स्मिँल्लोके प्रतितिष्ठन्ति देवासुराः संयत्ता आसन्ते देवा बिभ्यतोऽग्निं प्राविशन्तस्मादाहुराग्निः सर्वा देवता इति ते (६) अग्निमेव वरूथं कृत्वाऽसु-रानभ्यभवन्नग्निमिव खलु वा एष प्र विशति योऽवान्तरदीक्षामुपैति भ्रातृव्याभिभूत्यै भवत्या-त्मना पराऽस्य भ्रातृव्यो भवत्यात्मानमेव दीक्षया पाति प्रजामवान्तरदीक्षया संतरां मेखलाश समा-यच्छते प्रजा ह्यात्मनोऽन्तरतरा तप्तव्रतो भवति मदन्तीभिर्मार्जयते निर्ह्याग्निः शीतेन वार्यति समिद्धयै या ते अग्ने रुद्रिया तनूरित्याह स्वयैवै-नंदेवतया व्रतयति सयोनित्वाय शान्त्यै (७)॥

(उपसद्धोमाभिधानम्)

(यो वा ओजं आहु यदशीमेति तेऽग्न एकादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अथ षष्ठाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः)।

तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यमाऽथ रजताऽथ हरिणी ता देवा जेतुं नाशक्नुवन्ता उपसदैवाजिगीषन्तस्मादाहुर्यश्चैवं वेद यश्च नोपसदा वै महापुरं जयन्तीति त इषुꣳ सम्भरन्तास्मिन्नकिꣳ सोमꣳ शल्यं विष्णुं तेजनं तेऽब्रुवन्क इमामसिष्यतीति (१) रुद्र इत्यब्रुवन्रुद्रो वै क्रूरः सोऽस्यत्विति सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिस्ताꣳरुद्रोऽवासृजत्स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्योऽसुरान्प्राणुदत यदुपसदं उपसद्यन्ते भ्रातृव्यपराणुत्त्यै नान्यामाहुतिं पुरस्ताज्जुहुयाद्यदन्यामाहुतिं पुरस्ताज्जुहुयात्(२)अन्यन्मुखं कुर्यात्स्रुवेणाऽऽघारमा घारयति यज्ञस्य प्रज्ञात्यै पराङतिक्रम्य जुहोति पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान्प्र णुदते पुनरत्याक्रम्योपसदं जुहोति प्रणुद्यैवैभ्यो लोकेभ्यो भ्रातृव्यान्नित्वा भ्रातृव्यलोकमभ्यारोहति देवा वै याः प्रातरुपसद उपासींदन्नक्लृप्ताभिरसुरान्प्राणुदन्त याः सायꣳ रात्रियै ताभिर्यत्सायंप्रातरुपसदः (३) उपसद्यन्तेऽहोरात्राभ्यामेव तद्यजमानो भ्रातृव्यान्प्र णुदते याः प्रातर्याज्याः

स्युस्ताः सायं पुरोनुवाक्याः कुर्यादयातयामत्वाय तिस्र उपसद उपैति त्रय इमे लोका इमानेव लोकान्प्रीणाति षट्सं पद्यन्ते षड्वा ऋतव ऋतूनेव प्रीणाति द्वादशाहीने सोम उपैति द्वादश मासाः संवत्सरः संवत्सरमेव प्रीणाति चतुर्विꣳशतिः सम्पद्यन्ते चतुर्विꣳशतिरर्धमासा अर्धमासानेव प्रीणात्यारांग्रामवान्तरदीक्षामुपेयाद्यः कामयेतास्मिन्मे लोकेऽधुंकꣳ स्यादित्येकमग्रेऽथ द्वावथ त्रीनथ चतुर एषा वा आरांग्राऽवान्तरदीक्षाऽस्मिन्नेवास्मै लोकेऽधुंकं भवति परोवरीयसीमवान्तरदीक्षामुपेयाद्यः कामयेतामुष्मिन्मे लोकेऽधुंकꣳस्यादिति चतुरोऽग्रेऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीक्षाऽमुष्मिन्नेवास्मै लोकेऽधुंकं भवति (५) ॥

(असिष्यतीति जुहुयात्सायंप्रातरुपसदश्चतुर्विꣳशतिः सं चतुरोऽग्रे षोडश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

सुवर्गं वा एते लोकं यन्ति य उपसदं उपयन्ति तेषां य उन्नयते हीयत एव स नोदनेषीति सूम्नीयमिव यो वै स्वार्थेतां यतांश्रान्तो हीयत उत स निष्ट्यायं सह वसति तस्मात्सक्तुन्नीय नापरमुन्न-

(वेद्यभिधानम्)

येत दध्नोन्नयेतैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे (१) यज्ञो देवेभ्यो निलायत विष्णू रूपं कृत्वा स पृथिवीं प्राविशत्तं देवा हस्तान्त्सꣳरभ्यैच्छन्तमिन्द्र उपर्युपर्यत्यक्रामत्सोऽब्रवीत्को माऽयमुपर्युपर्यत्यक्रमीदित्यहं दुर्गे हन्तेत्यथ कस्त्वमित्यहं दुर्गादाहर्तेति सोऽब्रवीद्दुर्गे वै हन्ताऽवोचथा वराहोंऽयं वाममोषः (२) सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्ति तं जहि यदि दुर्गे हन्ताऽसीति स दर्भपुञ्जीलमुद्धृत्य सप्त गिरीन्भित्त्वा तमहन्त्सोऽब्रवीद्दुर्गाद्वा आहर्ताऽवोचथा एतमा हरेति तमेभ्यो यज्ञ एव यज्ञमाऽहरद्यत्तद्वित्तं वेद्यमसुराणामविन्दन्त तदेकं वेधै वेदित्वमसुराणाम्(३)वा इयमग्रे आसीद्यावदासीनः परापश्यति तावद्देवानां ते देवा अब्रुवन्नस्त्वेव नोऽस्यामपीति किꣳह्वो दास्याम इति यावदियꣳ सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति स इन्द्रः सलावृकी रूपं कृत्वेमां त्रिः सर्वतः पर्यक्रामत्तदिमामविन्दन्त यदिमामविन्दन्त तद्वेधै वेदित्वꣳ (४)सा वा इयꣳ सर्वैव वेदिरियति शक्ष्यामीति त्वा अवमायं यजन्ते त्रिꣳशत्पदानि पङ्क्त्याक्षरश्वी भवति षट्त्रिꣳशत्प्राची चतुर्विꣳशतिः पुरस्ताक्षरश्वी दशदश सं पद्यन्ते दशाक्षरा विराडन्नं विराडविराजैवान्नाद्यमव रुन्ध उद्धन्ति यदेवास्यां अमेध्यं तदप हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति बर्हिः स्तृणाति तस्मादोष-

(व्रतनिरूपणम्)

धयः पुनरा [illegible] बर्हिष उत्तरबर्हिः स्तृणाति प्रजा वै बर्हिर्यजमान उत्तरबर्हिर्यजमानमेवार्यजमानादुत्तरं करोति तस्मादेषोऽयजमानादुत्तरः (५).

(रुन्धे वाममोषो वेदित्वमसुराणां वेदित्वं भवन्ति पञ्चविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः) ।

यद्वा अनीशानो भारमादत्ते वि वै स लिश्यते यद्वादश साह्नस्योपसदः स्युस्तिस्रोऽहीनस्य यज्ञस्य विलोम क्रियेत तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्यत्वायाथो सलोम क्रियते वत्सस्यैकः स्तनो भागी हि सोऽथैकꣳ स्तनं व्रतमुपैत्यथ द्वावथ त्रीनथ चतुरं एतद्वै (१) क्षुरपवि नाम व्रतं येन प्र जाताञ्भ्रातृव्याञ्छृणाति प्रति जनिष्यमाणानथो कनीयसैव भूय उपैति चतुरोऽरे स्तनान्व्रतमुपैत्यथ त्रीनथ द्वावथैकमेतद्वै सुजघनं नाम व्रतं तपस्यꣳ सुवर्ग्यमथो प्रैव जायते प्रजया पशुभिर्यवागू राजन्यस्य व्रतं क्रूरेव वै यवागूः क्रूर इव (२) राजन्यो वज्रस्य रूपꣳ समृद्ध्या आमिक्षा वैश्यस्य पाकयज्ञस्य रूपं पुष्ट्यै पयो ब्राह्मणस्य तेजो वै ब्राह्मणस्तेजः पय-

(व्रतनिरूपणम्)

स्तेजसैव तेजः पय आत्मन्धत्तेऽथो पयसा वै गर्भा वर्धन्ते गर्भ इव खलु वा एष यद्दीक्षितो यदस्य पयो व्रतं भवत्यात्मानमेव तद्वर्धयति त्रिव्रतो वै मनुरासीद्द्विव्रता असुरा एकव्रताः (३) देवाः प्रातर्मध्यंदिने सायं तन्मनोर्व्रतमासीत्पाकयज्ञस्य रूपं पुष्ट्यै प्रातश्च सायं चासुराणां निर्मध्यं क्षुधो रूपं ततस्ते पराऽभवन्मध्यंदिने मध्यरात्रे देवानां ततस्तेऽभवन्त्सुवर्गं लोकमायन्यदस्य मध्यंदिने मध्यरात्रे व्रतं भवति मध्यतो वा अन्नेन भुञ्जते मध्यत एव तदूर्जं धत्ते भ्रातृव्याभिभूत्यै भवत्यात्मना (४) परास्य भ्रातृव्यो भवति गर्भो वा एष यद्दीक्षितो योनिर्दीक्षितविमितं यद्दीक्षितो दीक्षित-विमितात्प्रवसेद्यथा योनेर्गर्भः स्कन्दति तादृगेव तन्न प्रवस्तव्यमात्मनो गोपीथायैष वै व्याघ्रः कुलगोपो यद्दीक्षितस्मादु दीक्षितः प्रवसेत्स एन-मीश्वरोऽनूत्थाय हन्तोर्न प्रवस्तव्यमात्मनो गुप्त्यै दक्षिणतः शाय एतद्वै यजमानस्याऽऽयतनꣳ स्व एवाऽऽयतने शयेऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शये ॥ ५ ॥

(एतद्वै कुर इवैकव्रता आत्मना यजमानस्य त्रयोदश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीय-प्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(काम्ययागभूम्यभिधानम्)

(अथ षष्ठाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः) ।

पुरोहविषि देवयजने याजयेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं जयेदित्येतद्वै पुरोहविर्देवयजनं यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमप आदित्यमभि विपश्यत्युपैनमुत्तरो यज्ञो नमत्यभि सुवर्गं लोकं जयत्यासे देवयजने याजयेद्भातृव्यवन्तं पन्थां वाऽधिस्पर्शयेत्कर्तं वा यावन्नानसे यातवै (१) न रथायैतद्वा आसं देवयजनमाप्नोत्येव भ्रातृव्यं नैनं भ्रातृव्य आप्नोत्येकोन्नते देवयजने याजयेत्पशुकाममेकोन्नताद्वै देवयजनादङ्गिरसः पशूनसृजन्तान्तरा सदोहविर्धाने उन्नतꣳ स्यादेतद्वा एकोन्नतं देवयजनं पशुमानेव भवति त्र्युन्नते देवयजने याजयेत्सुवर्गकामं त्र्युन्नताद्वै देवयजनादङ्गिरसः सुवर्गं लोकमायन्नन्तराऽऽहवनीयं च हविर्धानं च (२) उन्नतꣳ स्यादन्तरा हविर्धानं च सदश्चान्तरा सदश्च गार्हपत्यं चैतद्वै त्र्युन्नतं देवयजनꣳ सुवर्गमेव लोकमेति प्रतिष्ठिते देवयजने याजयेत्प्रतिष्ठाकाममेतद्वै प्रतिष्ठितं देवयजनं यत्सर्वतः समं प्रत्येव तिष्ठति यत्रान्याअन्या ओषधयो व्यतिषक्ताः स्युस्तद्याजयेत्पशुकाममेतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशून् (३) अव रुन्धे पशुमानेव भवति निर्ऋतिगृहीते देवयजने याजयेद्यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयमित्येतद्वै निर्ऋतिगृहीतं देवयजनं यत्सद्वदैयं सत्वा

(उत्तरवेदिनिरूपणम्)

ऋक्षं निर्ऋत्यैवास्य यज्ञं ग्राहयति व्यावृत्ते देवयजने याजयेद्व्यावृत्कामं यं पात्रे वा तल्पे वा मीमाꣳसेरन्प्राचीनमाहवनीयात्प्रवणꣳ स्यात्प्रतीचीनं गार्हपत्यादेतद्वै व्यावृत्तं देवयजनं वि ब्राप्मना भ्रातृव्येणाऽऽवर्तते नैनं पात्रे न तल्पे मीमाꣳसन्ते कार्यं देवयजने याजयेद्भूतिकामं कार्यो वै पुरुषो भवत्येव (४) ॥

(यातवै हविर्धानं च पशून्ब्राप्मनाऽष्टादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

— —

(अथ षष्ठाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः) ।

तेभ्य उत्तरवेदिः सि ही रूपं कृत्वोभयानन्तराऽपक्रम्यातिष्ठत्ते देवा अमन्यन्त यन्नरान्वा इयमुपावत्स्यति त इदं भविष्यन्तीति तामुपामन्त्रयन्त साऽब्रवीद्वरं वृणै सर्वान्मया कामान्व्यश्नवथ पूर्वा तु माऽग्नेराहुतिरश्नवता इति तस्मादुत्तरवेदिं पूर्वामग्नेर्व्याधारयन्ति वारेवृतꣳ ह्यस्ये शम्यया परिमिमीते (१) मात्रैवास्यै साऽथो युक्तेनैव युक्तमव रुन्धे वित्तायनी मेऽसीत्याह वित्ता ह्येनानावत्तिक्तायनी मेऽसीत्याह तिक्तान्ह्येनानावदर्वतान्मा नाथितामित्याह नाथितान्ह्येनानावदर्वतान्मा व्यथितामित्याह व्यथितान्ह्येनानावद्विदेरग्निर्नभो नाम (२) अग्ने अङ्गिर इति त्रिर्हरति य एवैषु लोके-

व्वन्नयस्तानेवाव रुन्धे तूष्णीं चतुर्थꣳ हरत्यनि-
रुक्तमेवाव रुन्धे सिꣳहीरसि महिषीरसीत्याह
सिꣳहीह्येषा रूपं कृत्वोभयतोनन्तराऽपक्रम्यातिष्ठ-
दुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह यजमा-
नमेव प्रजया पशुभिः प्रथयति ध्रुवा (३)
असीति सꣳ हन्ति धृत्यै देवेभ्यः शुन्धस्व देवेभ्यः
शुम्भस्वेत्यवं चोक्षति प्र च किरति शुद्ध्यै
इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्वित्याह दिग्भ्य
एवैनां प्रोक्षति देवाꣳश्चेदुत्तरवेदिरुपावर्तीहैव वि
जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त
तानिन्द्रघोषो वसुभिः पुरस्तादप (४) अनुदत
मनोजवाः पितृभिर्दक्षिणतः प्रचेता रुद्रैः पश्चा-
द्विश्वकर्माऽऽदित्यैरुत्तरतो यदेवमुत्तरवेदिं प्रोक्षति
दिग्भ्य एव तद्यजमानो भ्रातृव्यान्प्र णुदत इन्द्रो
यतीन्मालावृकेभ्यः प्रायच्छत्तान्दक्षिणत उत्तर-
वेद्या आदन्यत्प्रोक्षणीनामुच्छिष्येत तद्दक्षिणत
उत्तरवेद्यै नि नयेद्यदेव तत्र क्रूरं तत्तेन शमयति
यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति (५) ॥
मिमीते नाम ध्रुवाऽर्प शुचा त्रीणि च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः) ।

सोत्तरवेदिरब्रवीत्मवान्मया कामान्व्यश्नवथेति

(व्याघारणविधिः)

ते देवा अकामयन्तासुरान्भ्रातृव्यानभि भवेमेति तेऽजुहवुः सिꣳहीरसि सपत्नसाही स्वाहेति तेऽसुरान्भ्रातृव्यानभ्यभवन्तेऽसुरान्भ्रातृव्यानभिभूयाकामयन्त प्रजां विन्देमहीति तेऽजुहवुः सिꣳहीरसि सुप्रजावनिः स्वाहेति ते प्रजामविन्दन्त ते प्रजां वित्त्वा (१) अकामयन्त पशून्विन्देमहीति तेऽजुहवुः सिꣳहीरसि रायस्पोषवनिः स्वाहेति ते पशूनविन्दन्त ते पशून्वित्त्वाऽकामयन्त प्रतिष्ठां विन्देमहीति तेऽजुहवुः सिꣳहीरस्यादित्यवनिः स्वाहेति त इमां प्रतिष्ठामविन्दन्त त इमां प्रतिष्ठां वित्त्वाऽकामयन्त देवतां आशिष उपेयामेति तेऽजुहवुः सिꣳहीरस्या वह देवान्देवयते (२) यजमानाय स्वाहेति ते देवतां आशिष उपाऽऽयन्पञ्च कृत्वो व्याघारयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धेऽक्षणया व्याघारयति तस्मादक्षण्या पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै भूतेभ्यस्त्वेति स्रुचमुद्गृह्णाति य एव देवा भूतास्तेषां तद्भागधेयं तानेव तेन प्रीणाति पौतुद्रवान्परिधीन्परि दधात्येषाम् (३) लोकानां विधृत्या अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन्ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमाऽरिष्यतीति स निलायत स यां वनस्पतिष्ववसत्तां पूतुद्रौ यामोषधीषु ताꣳ सुगन्धितेजने यां पशुषु तां पेत्वस्यान्तरा शृङ्गे तं देवताः

प्रैषमैच्छन्तमन्वावेन्दन्तमब्रुवन् (४) उप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात्तन्मे भ्रातृणां भागधेयमसदितितस्माद्यद्गृहीतस्याहुतस्य बहिः-परिधिस्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति सोऽमन्यतास्थन्वन्तो मे पूर्वे भ्रातरः प्रामेषतास्थानि शातया इति स यानि (५) अस्थान्यशातयत तत्पूतुद्रवमवद्यन्माऽसमुपमृतं तद्गुल्गुलु यदेतान्त्सँभारान्त्सं भरत्यग्निमेव तत्सं भरत्यग्निमेव तत्सं भरत्यग्नेः पुरीषमसीत्याहाग्नेर्ह्येत-त्पुरीषं यत्सँभारा अथो खल्वाहुरेते वावैनं ते भ्रातरः परि शेरे यत्पौतुद्रवाः परिधय इति (६) ॥

(वित्त्वा देवयत एषामब्रुवन्यानि चतुश्चत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः) ।

बद्धमेव स्यति वरुणपाशादेवैनं मुञ्चति प्र णेनेक्ति मेध्यमेवैनं करोति सावित्रियर्चा हुत्वा हविर्धाने प्र वर्तयति सवितृप्रसूत एवैने प्र वर्तयति वरुणो वा एष दुर्वागुभयतो बद्धो यदक्षः स यदु-त्सर्जेद्यजमानस्य गृहानभ्युत्सर्जेत्सुवाग्देव दुर्याः आ वदेत्याह गृहा वै दुर्याः शान्त्यै पत्नी (१)

(व्याघारणविधिः)

उपानक्ति पत्नी हि सर्वस्य मित्रं मित्रत्वाय यद्वै पत्नीं यज्ञस्य करोति मिथुनं तदथो पत्नियाऽएवैष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति वैष्णवीभ्यामृग्भ्यां वर्त्मनोर्जुहोति यज्ञो वै विष्णुर्यज्ञादेव रक्षाꣳस्यप हन्ति यदध्वर्युरनन्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युः (२) हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति प्राची प्रेतमध्वरं कल्पयन्ती इत्याह सुवर्गमेवैनं लोकं गमयत्यत्र रमेथां वर्ष्मन्पृथिव्या इत्याह वर्ष्म ह्येतत्पृथिव्या यद्वेवयजनꣳ शिरो वा एतद्यज्ञस्य यद्ध्रुविधानं दिवो वा विष्णवुत वा पृथिव्याः (३) इत्याशीर्पदयर्चा दक्षिणस्य हविर्धानस्य मेथीं नि हन्ति शीर्षत एव यज्ञस्य यजमान आशिषोऽव रुन्धे दण्डो वा औपरस्तृतीयस्य हविर्धानस्य वषट्कारेणाक्षमच्छिनद्यत्तृतीयं छदिर्हविर्धानयोरुदाहियते तृतीयस्य हविर्धानस्यावरुद्ध्यै शिरो वा एतद्यज्ञस्य यद्ध्रुविधानं विष्णो रराटमसि विष्णोः पृष्ठमसीत्याह तस्मादेतावद्धा शिरो विष्यूतं विष्णोः स्यूरसि विष्णोर्ध्रुवमसीत्याह वैष्णवꣳ हि देवतया हविर्धानं यं प्रथमं ग्रन्थिं ग्रथ्नीयात्तं न विस्रꣳसयेदमेहेनाध्वर्युः प्र मीयेत तस्मात्स विस्रꣳस्यः (४)॥

(पत्नीं हन्युर्वा पृथिव्या विष्यूतं विष्णोः
षट्त्रिंशतिश्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः) ।

देवस्य त्वा सवितुः प्रसव इत्यभिमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै वज्रं इव वा एषा यदाभिरभिरसि नारिरसीत्याह शान्त्यै काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्यै (१) इदमहꣳरक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याहैभ्य एवैनां लोकेभ्यः प्रोक्षति परस्तादर्वाचीं प्रोक्षति तस्मात् (२) परस्तादर्वाचीं मनुष्या ऊर्जमुप जीवन्ति क्रूरमिव वा एतत्करोति यत्खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यव ऊर्गुदुम्बर ऊर्जैवोर्जꣳ सं धयति यजमानेन संमितौदुम्बरी भवति यावानेव यजमानस्तावतीभिरास्मिन्नूर्जं दधाति पितृणाꣳ सदनमसीति बर्हिरव स्तृणाति

(सदोभिधानम्)

पितृदेवत्यम् (३) ह्येतद्यन्निखातं यद्बर्हिरन-
वस्तीर्यं मिनुयात्पितृदेवत्या निखाता स्याद्बर्हिर-
वस्तीर्यं मिनोत्यस्यामेवैनां मिनोत्यथो स्वारुह-
मेवैनां करोत्युद्दिवꣳ स्तभानाऽन्तरिक्षं पृणेत्याहेषां
लोकानां विधृत्यै द्युतानस्त्वा मारुतो मिनोत्वित्याह
द्युतानो ह स्म वै मारुतो देवानामौदुम्बरीं
मिनोति तेनैव (४) एनां मिनोति ब्रह्मवनिं
त्वा क्षत्रवनिमित्याह यथायजुरेवैतद्यतेन द्यावापृ-
थिवी आ पृणेथामित्यौदुम्बर्यौ जुहोति द्यावापृ-
थिवी एव रत्नानाकत्यान्तमन्ववस्रावयत्यान्तमेव
यजमानं तेजसाऽनक्त्यैन्द्रमसीति छदिरधि नि
दधात्यैन्द्रꣳ हि देवतया सदो विश्वजनस्य छाये-
त्याह विश्वजनस्य ह्येषा छाया यत्सदो नवच्छदि
(५) तेजस्कामस्य मिनुयाच्चिवृता स्तोमेन
संमितं तेजस्त्रिवृत्तेजस्यैव भवत्येकादशछदीन्द्रिय-
कामस्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रि-
यावैव भवति पञ्चदशछदि भ्रातृव्यवतः पञ्चदशो
वज्रो भ्रातृव्याभिभूत्यै सप्तदशछदि प्रजाकामस्य
सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविꣳशति-
छदि प्रतिष्ठाकामस्यैकविꣳशः स्तोमानां प्रतिष्ठा
प्रतिष्ठित्या उदरं वै सद ऊर्गुदुम्बरो मध्यत औदु-
म्बरीं मिनोति मध्यत एव प्रजानामूर्जं दधाति त-
स्मात् (६) मध्यत ऊर्जा मुञ्जते यजमानलोके

वै दक्षिणानि छदींष्यि भ्रातृव्यलोक उत्तराणि दक्षिणान्युत्तराणि करोति यजमानमेवार्यजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर्वर्तान्करोति व्यावृत्त्यै तस्मादरण्य प्रजा उप जीवन्ति परि त्वा गिर्वणो गिर इत्याह यथायजुरेवैतदिन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीत्याहेन्द्रꣳ हि देवतया सदो यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं न विस्रꣳसयेदमेहेनाध्वर्युः प्र मीयेत तस्मात्म विस्रꣳस्यः (७) ॥

(अपहत्यै तस्मात्पितृदेवत्यं तेनैव नवच्छदि
तस्मात्सप्तदशꣳ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ।)

शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवा हविर्धानं खायन्ते तस्माच्छीर्षन्प्राणा अधस्तात्खायन्ते तस्मादधस्तात्प्राणाः रक्षोहणो वलगहनो वैष्णवान्खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्ऋतौ देवानां प्राणेषु वलमात्मन्वत्खनन्तान्वाहुमात्रेऽन्वविन्दन्तस्माद्बाहुमात्राः खायन्त इदमहं तं वलगमुद्वपामि (१) यं नः समानो यमसमानो निचखानेत्याह द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ

(उपरवाभिधानम्)

वलगं निखनंतस्तमेवाच्छैपति संतृणत्ति तस्मात्सं-
तृण्णा अन्तरतः प्राणा न सं भिनत्ति तस्मादसं-
भिन्नाः प्राणा अपोऽवं नयति तस्मादार्द्रा अन्तरतः
प्राणा यवमतीरवं नयति (२) ऊर्वै यवः प्राणा
उपरवाः प्राणेष्वेवोर्जं दधाति बहिरवं स्तृणाति
तस्माल्लोमशा अन्तरतः प्राणा आज्येन व्याघा-
रयति तेजो वा आज्यं प्राणा उपरवाः प्राणेष्वेव
तेजो दधाति हनू वा एते यज्ञस्य यदधिषवणे न
सं तृणत्त्यसंतृण्णे हि हनू अथो खलु दीर्घसोमे
संतृत्यै धृत्यै शिरो वा एतद्यज्ञस्य यद्धविर्धानम्
(३) प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म
ग्रावाणो दन्ता मुखमाहवनीयो नासिकोत्तरवे-
दिरुदरꣳ सदो यदा खलु वै जिह्वया दर्भेऽधि
खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथो-
दरं गच्छति तस्माद्धविर्धाने चर्मन्नधि ग्रावभिर-
भिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि
भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं वेद दुह
एवैनामियं वै विराडूधस्यै त्वक्चर्मोधोऽधिषवणे
स्तना उपरवा ग्रावाणो वत्सा ऋत्विजो दुहन्ति
सोमः पयो य एवं वेद दुह एवैनाम् (४) ॥

(वपामि यवमतीरवं नयति हविर्धानमेव
त्रयोविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(विष्णियामिधानम्)

यदुभौ देवासुरा मिथस्तेषा२ सुवर्गं यद्वा अनीशानः पुरोहविषि देर्म्य उत्त-
रवेदिः सोत्तरवेदिर्वज्रं देवस्याग्नि२ शिरो वा एकादश ॥ ११ ॥

यदुभावित्याह देवानां यज्ञो देवेभ्यो न रथाय यजमानाय
परस्तादर्वाचीं नवपञ्चाशत् ॥ ५९ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
द्वितीयः प्रपाठकः ॥ २ ॥

(अथ षष्ठाष्टके तृतीयः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

चात्वालाद्विष्णियानुप वपति योनिर्वै यज्ञस्य
चात्वालं यज्ञस्य सयोनित्वाय देवा वै यज्ञं परा-
ऽजयन्त तमाग्नीध्रात्पुनरपाजयन्नेतद्वै यज्ञस्यापरा-
जितं यदाग्नीध्रं यदाग्नीध्राद्विष्णियान्विहरति यदेव
यज्ञस्यापराजितं तत एवैनं पुनस्तनुते पराजि-
त्यैव खलु वा एते यन्ति ये बहिष्पवमान२
सर्पन्ति बहिष्पवमाने स्तुते (१) आहाग्नीदग्नी-
न्वि हर बर्हिः स्तृणाहि पुरोडाशा२ अलं कुर्विति
यज्ञमेवापजित्य पुनस्तन्वाना यन्त्यङ्गारैर्द्वे सवने
वि हरति शलाकाभिस्तृतीय२ सवृक्त्वायाथो सं
भरत्येवैनद्विष्णिया वा अमुष्मिंल्लोके सोममरक्षन्ते-
भ्योऽधि सोममाऽहरन्तमन्ववायन्तं पर्यविशन्य एवं

(विष्णियाभिधानम्)

वेद विदन्ते (२) परिवेष्टारं ते सोमपीथे व्यार्ध्यन्त ते देवेषु सोमपीथमैच्छन्त तान्देवा अब्रुवन्द्वेद्वे नामनी गृह्णध्वमथ प्र वाऽऽप्स्यथ न वेत्यग्नयो वा अथ विष्णियास्तस्माद्द्विनामा ब्राह्मणोऽधृकस्तेषां ये नेदिष्ठं पर्यविशन्ते सोमपीथं प्राऽऽप्नुवन्नाहवनीयं आग्नीध्रीयो होत्रीयो मार्जाली-यस्तस्माच्चेषु जुह्वत्यतिहाय वषट्करोति वि हि (३) एते सोमपीथेनाऽऽर्ध्यन्त देवा वै याः प्राचीराहुतीरजुह्वुर्ते पुरस्तादसुरा आसन्ताश्स्तामिः प्राणुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन्ताश्स्ता-मिराद्रियन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यङ्ङासीनो विष्णियान्व्याघारयति पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान्प्रणुदते तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीचीः (४) जायन्ते प्राणा वा एते यद्विष्णिया यदध्वर्युः प्रत्यङ्विष्णियानाति-सर्पेत्प्राणान्त्सं कर्षेत्प्रमायुकः स्यान्नाभिर्वा एषा यज्ञस्य यद्धोतोर्ध्वः खलु वै नाभ्यै प्राणोऽवाङपानो यदध्वर्युः प्रत्यङ्होतारमतिसर्पेदपाने प्राणं दध्यात्प्र-मायुकः स्यान्नाध्वर्युरुप गायेद्वाग्वीर्यो वा अध्वर्यु-र्यदध्वर्युरुपगायेदुद्वात्रे (५) वाचꣳ सं प्र यच्छे-दुपदासुकाऽस्य वाक्स्याद्ब्रह्मवादिनो वदन्ति नासꣳ-स्थिते सोमेऽध्वर्युः प्रत्यङ्सदोऽतीयादथ कथा दाक्षिणानि होतुमेति यामो हि स तेषां कस्मा

अह देवा यामं वाऽयामं वाऽनु ज्ञास्यन्तीत्युत्तरे-णाऽऽग्नीध्रं परीत्य जुहोति दाक्षिणानि न प्राणा न्त्सं कर्षति न्यन्ये धिष्ण्या उप्यन्ते नान्ये याज्ञि-वर्पति तेन तान्प्रीणाति यान्न निवपति यदनुदि-शति तेन तान् (६) ॥

(स्तुते विन्दते हि वीयन्ते प्रतीचीरुद्वाव
उप्यन्ते चतुर्दश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ षष्ठाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः) ।

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्वैसर्ज-नानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रति-ष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमत आह-वनीये जुहोति सुवर्गमेवैनं लोकं गमयति देवान्वै सुवर्गं लोकं यतो रक्षाꣳस्यजिघाꣳसन्ते सोमेन राज्ञा रक्षाꣳस्यपहत्याप्तमात्मानं कृत्वा सुवर्गं लोकमायन्रक्षसामनुपलाभायाऽऽत्तः सोमो भव-त्यथ (१) वैसर्जनानि जुहोति रक्षसामपहत्यै त्वꣳ सोम तनूकृद्भ्य इत्याह तनूकृद्भ्येष द्वेषोभ्योऽन्यकृ-तेभ्य इत्याहान्यकृतानि हि रक्षाꣳस्युरु यन्ताऽसि वरूथमित्याहोरु णस्कृधीति वावैतदाह जुषाणो अप्तुराज्यस्य वेत्वित्याहाप्तुमेव यजमानं कृत्वा सुवर्गं लोकं गमयति रक्षसामनुपलाभायाऽऽ

(अग्नीषोमप्रणयनाभिधानम्)

सोमँ ददते (२) आ ग्राव्ण आ वायव्यान्या द्रोणकलशमुत्पत्नीमा नयन्त्यन्वनाꣳसि प्र वर्तयन्ति यावदेवास्यास्ति तेन सह सुवर्गं लोकमेति नयंवत्यर्चाऽऽग्नीधे जुहोति सुवर्गस्य लोकस्याभिनीत्यै ग्राव्णो वायव्यानि द्रोणकलशमाग्नीध्र उप वासयति वि ह्येनं तैर्गृह्णते यत्सहोपवासयेदपुवायेत सौम्यर्चा प्र पादयति स्वया (३) एवैनं देवतया प्र पादयत्यदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेतद्यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो देव सवितः सोम इत्याह सवितृप्रसूत एवैनं देवताभ्यः सं प्र यच्छत्येतत्त्वꣳ सोम देवो देवानुपागा इत्याह देवो ह्येष सन् (४) देवानुपैतीदमहं मनुष्यो मनुष्यानित्याह मनुष्यो ह्येष सन्मनुष्यानुपैति यदेतद्यजुर्ब्रूयादप्रजा अपशुर्यजमानः स्यात्सह प्रजया सह रायस्पोषेणेत्याह प्रजयैव पशुभिः सहेमं लोकमुपावर्तते नमो देवेभ्य इत्याह नमस्कारो हि देवानाꣳ स्वधा पितृभ्य इत्याह स्वधाकारो हि (५) पितृणामिदमहं निर्वरुणस्य पाशादित्याह वरुणपाशादेव निर्मुच्यतेऽमँहतपत आत्मनः पूर्वा तनूरादेयेत्याहुः को ह्येतद्वेद यद्बहीयान्त्स्वे वशे भूते पुनर्वा ददाति न वेति ग्रावाणो वै सोमस्य राज्ञो मलिम्लुसेना य एवं विद्वान्ग्राव्ण आग्नीध्र उपवासयति नैनं मलिम्लुसेना विन्दति (६) ॥

(अथ ददते स्वया सन्त्स्वधाकारो हि विन्दति) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः) ।

वैष्णव्यर्चा हुत्वा यूपमच्छैति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतयाऽच्छैत्यत्यन्यानगां नान्यानुपागामित्याहाति ह्यन्यानेति नान्यानुपेत्यवोक्त्वा परैरविदं परोऽवरैरित्याहावाग्घ्येनं परैर्विन्दति परोऽवरैस्त्वा जुषे (१) वैष्णवं देवयज्याया इत्याह देवयज्यायै ह्येनं जुषते देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्त्योषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः शान्त्यै स्वधितेर्वृक्षस्य बिभ्यतः प्रथमेन शकलेन सह तेजः परा पतति यः प्रथमः शकलः परापतेत्तमप्या हरेत्सतेजसम् (२) एवैनमा हरतीमे वै लोका यूपात्प्रयतो बिभ्यति दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिꣳसीरित्याहैभ्य एवैनं लोकेभ्यः शमयति वनस्पते शतवल्शो वि रोहेत्याह वनस्पतेर्वा एष उच्यते यद्यूपस्तस्मादाह वनस्पते शतवल्शो वि रोहेति सहस्रवल्शा वि वयꣳ रुहेमेत्याहाऽऽशिषमेवैतामा शास्तेऽनक्षसङ्गम् (३) वृश्चेदक्षसङ्गं वृश्चेदेवैनं यजमानस्य प्रमायुकꣳ स्याद्यं कामयेताप्रतिष्ठितः स्यादित्यारोहं तस्मै

(यूपखण्डनाभिधानम्)

वृश्चेदेष वै वनस्पतीनामप्रतिष्ठितोऽप्रतिष्ठित एव भवति यं कामयेतापशुः स्यादित्यपर्ण तस्मै शुष्कागं वृश्चेदेष वै वनस्पतीनामपशव्योऽपशुरेव भवति यं कामयेत पशुमान्त्स्यादिति बहुपर्ण तस्मै बहुशाखं वृश्चेदेष वै (४) वनस्पतीनां पशव्यः पशुमानेव भवति प्रतिष्ठितं वृश्चेत्प्रतिष्ठाकामस्यैष वै वनस्पतीनां प्रतिष्ठितो यः समे भूम्यै स्वाधोनैं रूढः प्रत्येव तिष्ठति यः प्रत्यङ्ङुपनतस्तं वृश्चेत्स हि मेध-मभ्युपनतः पञ्चारत्निं तस्मै वृश्चेद्यं कामयेतोपनमु-त्तरो यज्ञो नमेदिति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञ उपैनमुत्तरो यज्ञः (५) नमति षडरत्निं प्रति-ष्ठाकामस्य षड्वा ऋतवं ऋतुष्वेव प्रतिं तिष्ठति सप्तारत्निं पशुकामस्य सप्तपदा शाक्करी पशवः शाक्वरी पशूनेवावं रुन्धे नवारत्निं तेजस्कामस्य त्रिवृता स्तोमेन संमितं तेजस्त्रिवृत्तेजस्व्येव भवत्ये-कादशारत्निमिन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिं-न्द्रियं त्रिष्टुगिन्द्रियाण्येव भवति पञ्चदशारत्निं भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्त-दशारत्निं प्रजाकामस्य सप्तदशः प्रजापतिः प्रजा-पतेरप्त्या एकविंशत्यरत्निं प्रतिष्ठाकामस्यैक-विंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या अष्टाश्रिर्भ-वत्यष्टाक्षरा गायत्री तेजो गायत्री गायत्री यज्ञ-मुखं तेजसैव गायत्रिया यज्ञमुखेन संमितः (६)॥

(यूपस्थापनाभिधानम्)

(जुषे सतेनसमनक्षसङ्गं बहुशाखं वृश्चेदेष वै यज्ञ उपैनमुत्तरो यज्ञ आप्त्या एकान्नविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वेत्याहैभ्य एवैनं लोकेभ्यः प्रोक्षति परांञ्चं प्रोक्षति परांङ्विव हि सुवर्गो लोकः क्रूरमिव वा एतत्करोति यत्स्वनत्यपोऽवं नयति शान्त्यै यवमतीरवं नयत्यूर्ग्वै यवो यजमानेन यूपः संमितो यावानेव यजमानस्तावतीमेवास्मिन्नूर्जं दधाति (१) पितृणा२ सदनमसीति बर्हिरवं स्तृणाति पितृदेवत्या१२ ह्येतयन्निखातं यद्बर्हिरनवस्तीर्यं मिनुयात्पितृदेवत्यो निखातः स्याद्बर्हिरवस्तीर्यं मिनोत्यस्यामेवैनं मिनोति यूपशकलमवास्यति सतेजसमेवैनं मिनोति देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्ति सुपिप्पलाभ्यस्त्वौषधीभ्य इति चषालं प्रति (२) मुञ्चति तस्माच्छीर्षत ओषधयः फलं गृह्णन्त्यनक्ति तेजो वा आज्यं यजमानेनाग्निष्ठाऽग्निः संमिता यदग्निष्ठामाश्मनक्ति यजमानमेव तेजसाऽनक्त्यात्मनक्त्यान्तमेव यजमानं तेजसाऽनक्ति सर्वतः परि मृशत्यपरिवर्गमेवास्मिन्तेजो दधात्युद्दिव२ स्तभानाऽन्तरिक्षं पृणेत्याहैषां लोकानां विधृत्यै

(यूपस्थापननामधानम्)

वैष्णव्यर्चा (३) कल्पयति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया कल्पयति द्वाभ्यां कल्पयति द्विपाद्यजमानः प्रतिष्ठित्यै यं कामयेत तेजसैनं देवताभिरिन्द्रियेण व्यर्धयेयमित्यग्निष्ठां तस्याश्रीमाहवनीयादित्थं वेत्थं वाऽतिं नावयेत्तेजसैवैनं देवताभिरिन्द्रियेण व्यर्धयति यं कामयेत तेजसैनं देवताभिरिन्द्रियेण समर्धयेयमिति (४) अग्निष्ठां तस्याश्रिमाहवनीयेन सं मिनुयात्तेजसैवैनं देवताभिरिन्द्रियेण समर्धयति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतत्परिं व्ययत्यूर्ग्वै रशना यजमानेन यूपः संमितो यजमानमेवोर्जा समर्धयति नाभिदघ्ने परिं व्ययति नाभिदघ्न एवास्मा ऊर्जं दधाति तस्मान्नाभिदघ्न ऊर्जा भुञ्जते यं कामयेतोर्जैनमू (५) व्यर्धयेयमित्यूर्ध्वां वा तस्यावार्चीं वाऽवोहेदूर्जैवैनं व्यर्धयति यदिं कामयेत वर्षुकः पर्जन्यः स्यादित्यवार्चीमवोहेद्वृष्टिमेव नियच्छति यदिं कामयेतावर्षुकः स्यादित्यूर्ध्वामुदूहेद्वृष्टिमेवोद्यच्छति पितृणां निखातं मनुष्याणामूर्ध्वं निखातादा रशनाया ओषधीनाꣳ रशना विश्वेषामू (६) देवानामूर्ध्वꣳ रशनाया आ चषालादिन्द्रस्य चषालꣳ साध्यानामतिरिक्तꣳ स वा एष सर्वदेवत्यो यद्यूपो यद्यूपं मिनोति सर्वा एव देवताः प्रीणाति यज्ञेन वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त

(अग्निमन्थनाभिधानम्)

मनुष्या नोऽन्वाभविष्यन्तीति ते यूपेन योपयित्वा सुवर्गं लोकमायन्तमृषयो यूपेनैवानु प्राजानन्तद्यूपस्य यूपत्वम् (७) यद्यूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्यै पुरस्तान्मिनोति पुरस्ताद्धि यज्ञस्य प्रज्ञायते प्रज्ञातꣳ हि तद्यदतिपन्न आहुरिदं कार्यमासीदिति साध्या वै देवा यज्ञमत्यमन्यन्त तान्यज्ञो नास्पृशत्तान्यद्यज्ञस्यातिरिक्तमासीत्तदस्पृशदतिरिक्तं वा एतद्यज्ञस्य यदग्नावग्निं मथित्वा प्रहरत्यतिरिक्तमेतत् (८) यूपस्य यदूर्ध्वं चषालात्तेषां तद्भागधेयं तानेव तेन प्रीणाति देवा वै सꣳस्थिते सोमे प्र स्रुचोऽहरन्प्र यूपं तेऽमन्यन्त यज्ञवेशसं वा इदं कुर्म इति ते प्रस्तरꣳ स्रुचां निष्कर्यणमपश्यन्त्स्वरुं यूपस्य सꣳस्थिते सोमे प्र प्रस्तरꣳ हरति जुहोति स्वरुमयज्ञवेशसाय (९)॥

(दधाति प्रत्यूचा समर्धयेयामित्यूर्जैनं विश्वेषां यूपत्वमतिरिक्तमेतद्द्वि-चत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

(अथ षष्ठाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः)।

साध्या वै देवा अस्मिँल्लोक आसन्नान्यत्किंचन मिषत्तेऽग्निमेवाग्नये मेधायाऽलभन्त न ह्यन्यदालब्ध्यमविन्दन्ततो वा इमाः प्रजाः प्राजायन्त

(अग्निमन्थनाभिधानम्)

यद्ग्नावग्निं मंथित्वा प्रहरंति प्रजामेव प्रजनयति रुद्रो वा एष यदग्निर्यजमानः पशुर्यत्पशुमालभ्याग्निं मन्थेद्रुद्राय यजमानम् (१) अपि दध्यात्प्रमायुकः स्यादथो खल्वाहुरग्निः सर्वा देवता हविरेतत्यत्पशुरिति यत्पशुमालभ्याग्निं मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयत्युपाकृत्यैव मन्थ्यस्तन्नेवाऽऽलब्धं नेवानालब्धमग्नेर्जनित्रमसीत्याहाग्नेर्ह्येतज्जनित्रं वृषणौ स्थ इत्याह वृषणौ (२) ह्येतावूर्वश्यस्यायुरसीत्याह मिथुनत्वाय घृतेनाक्ते वृषणं दधाथामित्याह वृषणौ ह्येते दधाते ये अग्निं गायत्रं छन्दोऽनु प्र जायस्वेत्याह छन्दोभिरेवैनं प्र जनयत्यग्नये मथ्यमानायानु ब्रूहीत्याह सावित्रीमृचमन्वाह सवितृप्रसूत एवैनं मन्थति जातायानु ब्रूहि (३) प्रहियमाणायानु ब्रूहीत्याह काण्डेकाण्ड एवैनं क्रियमाणे समर्धयति गायत्रीः सर्वा अन्वाह गायत्रछन्दा वा अग्निः स्वेनैवैनं छन्दसा समर्धयत्यग्निः पुरा भवत्यग्निं मथित्वा प्र हरति तौ संभवन्तौ यजमानमभि सं भवतो भवतं नः समनसावित्याह शान्त्यै प्रहृत्य जुहोति जातायैवास्मा अन्नमपि दधात्याज्येन जुहोत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा (४) ॥

(यजमानमाह वृषणौ जातायानु ब्रूह्यष्टादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः)।

इषे त्वेति बर्हिरा दत्त इच्छत इव ह्येष यो यजत उपवीरसीत्याहोप ह्येनानाकरोत्युपो देवान्देवीर्विशः प्रागुरित्याह दैवीर्ह्येता विशः सतीर्देवानुपयन्ति वह्नीरुशिज इत्याहर्त्विजो वै वह्नय उशिजस्तस्मादिवमाह बृहस्पते धारया वसूनीति (१) आह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै पशूनवरुन्धे हव्या ते स्वदन्तामित्याह स्वदयत्येवैनान्देवꣳ त्वष्टर्वसु रण्वेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधाति रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवास्मै रमयति देवस्य त्वा सवितुः प्रसव इति (२) रशनामा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्या ऋतस्य त्वा देवहविः पाशेनाऽऽरभ इत्याह सत्यं वा ऋतꣳ सत्येनैवैनमृतेनाऽऽरभतेऽक्ष्णया परि हरति वध्यꣳ हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्यावृत्त्यै धर्षा मानुषानिति नि युनक्ति धृत्या अद्भ्यः (३) त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत्पशुरपां पेरुरसीत्याहैष ह्यपां पाता यो मेध्यायाऽऽरभ्यते स्वाक्तं चित्सदेवꣳ हव्यमापो देवीः

(सामिधेन्यायभिधानम्)

स्वदतैनमित्याह स्वदयत्येवैनमुपरिष्टात्प्रोक्षत्युपरिष्टादेवैनं मेध्यं करोति पाययत्यन्तरत एवैनं मेध्यं करोत्यधस्तादुपोक्षति सर्वत एवैनं मेध्यं करोति (४)॥

(वसूनीति प्रसव इत्यद्भ्योऽन्तरत एवैनं दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ षष्ठाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः)।

अग्निना वै होत्रा देवा असुरानभ्यभवन्नमयं समिध्यमानायानु ब्रूहीत्याह भ्रातृव्याभिभूत्यै सप्तदश सामिधेनीरन्वाह सप्तदशः प्रजापतिः प्रजापतेराप्त्यै सप्तदशान्वाह द्वादश मासाः पञ्चर्तवः स संवत्सरः संवत्सरं प्रजा अनु प्र जायन्ते प्रजानाः प्रजननाय देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्त्स प्रजापतिस्तूष्णीमाघारम् (१) आऽधारयत्ततो वै देवा यज्ञमन्वपश्यन्यत्तूष्णीमाघारमाधारयति यज्ञस्यानुरूप्यात्या असुरेषु वै यज्ञ आसीत्ते देवास्तूष्णी ँ होमेनावृञ्जत यत्तूष्णीमाघारमाधारयति भ्रातृव्यस्यैव तद्यज्ञं वृङ्क्ते परिधीन्त्सं मार्ष्टि पुनात्येवैनान्त्रिभिः सं मार्ष्टि त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै द्वादश सं पद्यन्ते द्वादश(२)मासाः संवत्सरः संवत्सरमेव प्रीणात्यथो

संवत्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्यै शिरो वा एतद्यज्ञस्य यदाधारोऽग्निः सर्वा देवता यदाधारमाधारयति शीर्षत एव यज्ञस्य यजमानः सर्वा देवता अव रुन्धे शिरो वा एतद्यज्ञस्य यदाधार आत्मा पशुराधारमाधायं पशुꣳ समनक्त्यात्मन्नेव यज्ञस्य (३) शिरः प्रति दधाति सं ते प्राणो वायुना गच्छतामित्याह वायुदेवत्यो वै प्राणो वायावेवास्य प्राणं जुहोति सं यजत्रैरङ्गानि सं यज्ञपतिराशिषेत्याह यज्ञपतिमेवास्याऽऽशिषं गमयति विश्वरूपो वै त्वाष्ट्र उपरिष्टात्पशुमभ्यवभीत्तस्मादुपरिष्टात्पशोर्नाव द्यन्ति यदुपरिष्टात्पशुꣳ समनक्ति मेध्यमेव (४) एनं करोत्यृत्विजो वृणीते छन्दाꣳस्येव वृणीते सप्त वृणीते सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्या एकादश प्रयाजान्यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तं प्र यजति वपामेकः परि शय आत्मैवाऽऽत्मानं परि शये वज्रो वै स्वधितिर्वज्रो यूपशकलो घृतं खलु वै देवा वज्रं कृत्वा सोममघ्नन्घृतेनाक्तौ पशुं त्रायेथामित्याह वज्रमेवैनं वशे कृत्वाऽऽ लभते (५) ॥

(आधारं पञ्चते द्वादशाऽऽलभेत पशुस्य
मेध्यमेव खलु वा अष्टादश च) ।

(पशुहिंसनाभिधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः)।

पर्यग्नि करोति सर्वहुतमेवैनं करोत्यस्कन्दायास्कन्नꣳ हि तद्यद्धुतस्य स्कन्दति त्रिः पर्यग्नि करोति त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशून्नान्वारभ्या३ इति मृत्यवे वा एष नीयते यत्पशुस्तं यदन्वारभेत प्रमायुको यजमानः स्यादथो खल्वाहुः सुवर्गाय वा एष लोकाय नीयते यत् (१) पशुरिति यन्नान्वारभेत सुवर्गाल्लोकाद्यजमानो हीयेत वपाश्रपणीभ्यामन्वारभते तन्नेवान्वारब्धं नेवानन्वारब्धमुप प्रेष्य होतर्हव्या देवेभ्य इत्याहेषितꣳ हि कर्म क्रियते रेवतीर्यज्ञपतिं प्रियधाऽऽविशतेत्याह यथायजुरेवैतदग्निना पुरस्तादिति रक्षसामपहत्यै पृथिव्याः संपृचः पाहीति बर्हिः (२) उपास्यत्यस्कन्दायास्कन्नꣳ हि तद्यद्बर्हिषि स्कन्दत्यथो बर्हिषदमेवैनं करोति पराङ्वर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्पशुभ्य एव तन्नि हूनुत आत्मनोऽनावस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेद पश्चाल्लोका वा एषा प्राच्युदानीयते यत्पत्नी नमस्त आतानेत्याहाऽऽदित्यस्य वै रश्मयः (३) आतानास्तेभ्य एव नमस्करोत्यनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै घृतस्य

कुल्यामनु सह प्रजया सह रायस्पोषेणेत्याहाऽऽ-
शिषमेवैतामा शास्त आपो देवीः शुद्धायुव इत्या-
ह यथायजुरेवैतत् (४) ॥

(लोकार्थं नीयते यद्धवीं रश्मयः
सप्तविंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीय-
प्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके नवमोऽनुवाकः) ।

पशोर्वा आलब्धस्य प्राणाञ्छुगृच्छति वाक्त
आ प्यायतां प्राणस्त आ प्यायतामित्याह प्राणेभ्य
एवास्य शुचꣳ शमयति सा प्राणेभ्योऽधि पृथिवीꣳ
शुक्प्र विशति शमहोभ्यामिति नि नयत्यहोरात्रा-
भ्यामेव पृथिव्यै शुचꣳ शमयत्योषधे त्रायस्वैनꣳ
स्वधिते मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः
(१) शान्त्यै पार्श्वत आ च्छद्यति मध्यतो हि
मनुष्या आ च्छद्यन्ति तिरश्चीनमा च्छद्यत्यनुची-
नꣳ हि मनुष्या आच्छद्यन्ति व्यावृत्त्यै रक्षसां
भागोऽसीति स्थविमतो बर्हिरक्त्वाऽपास्यत्यस्नैव
रक्षाꣳसि निरवदयत इदमहꣳ रक्षोऽधमं तमो
नयामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ
वाव पुरुषौ यं चैव (२) द्वेष्टि यश्चैनं द्वेष्टि तावु-
भावधमं तमो नयतीवेति वपामुत्खिदतीच्छत

(वपाहोमाभिधानम्)

इव होष यो यजते यदुपतृन्द्याद्रुद्रोऽस्य पशून्घातुकः स्याद्यन्नोपतृन्द्यादर्यता स्यादन्ययोपतृणत्त्यन्यया न धृत्यै घृतेन द्यावापृथिवी प्रोर्णोत्यामित्याह द्यावापृथिवी एव रसेनानक्त्यच्छिन्नः (२) रायः सुवीर इत्याह यथायजुरेवैतत्कुरुमिव वा एतत्करोति यद्वपामुत्खिदत्युर्वन्तरिक्षमन्विहीत्याह शान्त्यै प्र वा एषोऽस्माल्लोकाच्च्यवते यः पशुं मृत्यवे नीयमानमन्वारभते वपाश्रपणी पुनरन्वारभतेऽस्मिन्नेव लोके प्रति तिष्ठत्यग्निना पुरस्तादेति रक्षसामपहत्या अथो देवता एव हव्येन (४) अन्वेति नान्तमगारमति हरेद्यदन्तमगारमति हरेद्देवता अति मन्येत वायो वीहि स्तोकानामित्याह तस्माद्विभक्ताः स्तोका अवं पद्यन्तेऽग्रं वा एतत्पशूनां यद्वपाऽग्रमोषधीनां बर्हिरग्रेणैवाग्रꣳ समर्धयत्यथो ओषधीष्वेव पशून्प्रति ष्ठापयति स्वाहाकृताभ्यः प्रेष्येत्याह (५) यज्ञस्य समिष्टयै प्राणापानौ वा एतौ पशूनां यत्पृषदाज्यमात्मा वपा पृषदाज्यमभिघार्य वपामभिघारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति स्वाहोर्ध्वनभसं मारुतं गच्छतामित्याहोर्ध्वनभा ह स्म वै मारुतो देवानां वपाश्रपणी प्र हरति तेनैवैने प्र हरति विषूची प्र हरति तस्माद्विष्वञ्चौ प्राणापानौ (६)॥

(अवदानाभिधानम्)

(स्वर्गितिभ्यैवाच्छिन्नो ह्व्येनेष्येत्याह षट्चत्वारिꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके तृतीयप्रपाठके दशमोऽनुवाकः) ।

पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमा लभते वपया प्रचर्य पुरोडाशेन न चरत्यूर्वै पुरोडाश ऊर्जमेव पशूनां मध्यतो दधात्यथो पशोरेव छिद्रमपि दधाति पृषदाज्यस्योपहत्य त्रिः पृच्छति शृतꣳहवीः शमितरिति त्रिर्वत्या हि देवा योऽशृतꣳशृतमाह स एनसा प्राणापानौ वा एतौ पशूनाम् (१) यत्पृषदाज्यं पशोः खलु वा आलब्धस्य हृदयमात्माऽभि समेति यत्पृषदाज्येन हृदयमभिघारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति पशुना वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति तस्य शिरश्छित्त्वा मेधं प्राक्षारयन्त्स प्रक्षोऽभवत्तत्प्रक्षस्य प्रक्षत्वं यत्प्लक्षशाखोत्तरवाहिर्भवति समेधस्यैव (२) पशोरवं यति पशुं वै म्रियमाणꣳ रक्षाꣳस्यनु सचन्तेऽन्तरा यूपं चाऽऽहवनीयं च हरति रक्षसामपहत्यै पशोर्वा आलब्धस्य मनोऽप क्रामति मनोतायै हविषोऽवदीयमानस्यानु ब्रूहीत्याह मन एवास्यावरुन्ध एकादशावदानान्यव यति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तस्यावं (३) यति

(अवदानाभिधानम्)

हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसो यद्वै हृदयेनाभिगच्छति तज्जिह्वया वदति यज्जिह्वया वदति तदुरसोऽधि निर्वदत्येतद्वै पशोर्यथापूर्वं यस्यैवमवदायं यथाकामुत्तरेषामवद्यति यथापूर्वमेवास्य पशोरवत्तं भवति मध्यतो गुदस्यावद्यति मध्यतो हि प्राण उत्तमस्यावद्यति (४) उत्तमो हि प्राणो यदीतरं यदीतरमुभयमेवाजामि जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी तदवदानैरेवावद्यते तदवदानानामवदानत्वं देवासुराः संयत्ता आसन्ते देवा अग्निमब्रुवन्त्वया वीरेणासुरानभि भवामेति (५) सोऽब्रवीद्वरं वृणे पशोरुद्धारमुद्धरा इति स एतमुद्धारमुदहरत दोः पूर्वार्धस्य गुदं मध्यतः श्रोणिं जघनार्धस्य ततो देवा अभवन्पराऽसुरा यत्र्यङ्गाणाꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यक्ष्णयाऽवद्यति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै (६) ॥

(एतौ पशूनाꣳ समेधस्यैव तस्यावोत्तमस्यावद्यतीति पञ्चचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अनुयाजकथनम्)

(अथ षष्ठाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः ।)

मेदसा स्रुचौ प्रोर्णोति मेदोरूपा वै पशवो रूपमेव पशुषु दधाति यूषन्नवधाय प्रोर्णोति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधाति पार्श्वेन वसाहोमं प्रयौति मध्यं वा एतत्पशूनां यत्पार्श्वꣳ रसं एष पशूनां यद्वसा यत्पार्श्वेन वसाहोमं प्रयौति मध्यत एव पशूनाꣳ रसं दधाति भ्रन्ति (१) वा एतत्पशवं यत्संज्ञपयन्त्यैन्द्रः खलु वै देवतया प्राण ऐन्द्रोऽपान ऐन्द्रः प्राणो अङ्गेअङ्गे नि दध्यादित्याह प्राणापानावेव पशुषु दधाति देव त्वष्टर्भूरि ते सꣳ समेत्वित्याह त्वाष्ट्रा हि देवतया पशवो विषुरूपा यत्सलक्ष्माणो भवेत्याह विषुरूपा ह्येते सन्तः सलक्ष्माण एतर्हि भवन्ति देवत्रा यन्तम् (२) अवसे सखायोऽनु त्वा माता पितरो मदन्त्वित्याहानुमतमेवैनं मात्रा पित्रा सुवर्गं लोकं गमयत्यर्धर्चे वसाहोमं जुहोत्यसौ वा अर्धर्चं इयमर्धर्चं इमे एव रसेनानक्ति दिशो जुहोति दिश एव रसेनानक्त्यथो दिग्भ्य एवोर्जꣳ रसमव रुन्धे प्राणापानौ वा एतौ पशूनां यत्पृदाज्यं वानस्पत्याः खलु (३) वै देवतया पशवो यत्पृषदाज्यस्योपहत्याऽऽह वनस्पतयेऽनु ब्रूहि वनस्पतये प्रेष्येति प्राणापानावेव पशुषु दधात्यन्यस्यान्यस्य समवत्तꣳ समवद्यति तस्मान्नानारूपाः पशवो यूष्णोप सिञ्चति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधातीडामुप ह्वयते

(अनूयाजकथनम्)

पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते (४) चतुष्पादो हि पशवो यं कामयेतापशुः स्यादित्यमेदस्कं तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवैनं पशुभ्यो निर्भजत्यपशुरेव भवति यं कामयेत पशुमान्त्स्यादिति मेदस्वत्तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवति प्रजापतिर्यज्ञमसृजत स आज्यम् (५) पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चात्तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मध्यतः पृषदाज्येनानूयाजास्तस्मादेतन्मिश्रमिव पश्चात्सृष्ट ह्येकादशानूयाजान्यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत्पशुं यत्संज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनां यत्पृषदाज्यं यत्पृषदाज्येनानूयाजान्यजति प्राणापानावेव पशाषु दधाति (६)॥

(घ्नन्ति यन्तं खलु चतुरुप ह्वयत आज्यं यत्पृषदाज्येन षट् च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः॥ ११॥

वात्वालात्तुषर्गाय वैसर्जनानि वैष्णव्यर्चा पृथिव्यै साध्या इषे त्वेत्यग्निना पर्यग्नि पशोः पशुमालभ्य मेदसा स्रुचावेकादश॥ ११॥

वात्वालाद्देवानुपैति मुञ्चति प्रहियमाणाय पर्यग्नि पशुमालभ्य चतुष्पादो द्विषष्टिः॥ ६२॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
तृतीयः प्रपाठकः ॥ ३ ॥

(अथ षष्ठाष्टके चतुर्थः प्रपाठकः)

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ ।

यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भि-
रेवासृजत यदुपयजं उपयजंति प्रजा एव तद्यज-
मानः सृजते जघनार्धादवं द्यति जघनार्धाद्धि प्रजाः
प्रजायन्ते स्थविमतोऽवं द्यति स्थविमतो हि प्रजाः
प्रजायन्तेऽसंभिन्दन्नवं द्यति प्राणानामसंभेदाय न
पर्यावर्तयति यत्पर्यावर्तयेदुदावर्तः प्रजा ग्राहुकः
स्यात्समुद्रं गच्छ स्वाहेत्याह रेतः (१) एव
तद्दधात्यन्तरिक्षं गच्छ स्वाहेत्याहान्तरिक्षेणैवास्मै
प्रजाः प्र जनयत्यन्तरिक्षꣳ ह्यनु प्रजाः प्रजायन्ते
देवꣳ सवितारं गच्छ स्वाहेत्याह सवितृप्रसूत ए-
वास्मै प्रजाः प्र जनयत्यहोरात्रे गच्छ स्वाहेत्या-
हाहोरात्राभ्यामेवास्मै प्रजाः प्र जनयत्यहोरात्रे ह्यनु
प्रजाः प्रजायन्ते मित्रावरुणौ गच्छ स्वाहा (२)
इत्याह प्रजास्वेव प्रजातासु प्राणापानौ दधाति
सोमं गच्छ स्वाहेत्याह सौम्या हि देवतया प्रजा
यज्ञं गच्छ स्वाहेत्याह प्रजा एव यज्ञियाः करोति
छन्दाꣳसि गच्छ स्वाहेत्याह पशवो वै छन्दाꣳसि

(वसतीवर्यभिधानम्)

पशूनेवाव रुन्धे द्यावापृथिवी गच्छ स्वाहेत्याह प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परि गृह्णाति नभः (३) दिव्यं गच्छ स्वाहेत्याह प्रजाभ्य एव प्रजाताभ्यो वृष्टिं नियच्छत्यग्निं वैश्वानरं गच्छ स्वाहेत्याह प्रजा एव प्रजाता अस्यां प्रतिष्ठापयति प्राणानां वा एषोऽवद्यति योऽवद्यति गुदस्य मनो मे हार्दि यच्छेत्याह प्राणानेव यथास्थानमुपह्वयते पशोर्वा आलब्धस्य हृदयꣳ शुगृच्छति सा हृदयशूलम् (४) अभि समेति यत्पृथिव्याꣳ हृदयशूलमुद्वासयेत्पृथिवीꣳ शुचार्पयेद्यद्दुष्वपः शुचार्पयेच्छुष्कस्य चार्द्रस्य च संधावुद्वासयत्युभयस्य शान्त्यै यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति (५) ॥

(रेतो मित्रावरुणौ गच्छ स्वाहा नमो हृदयशूलं द्वाविꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः) ।

देवा वै यज्ञमाग्नीध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन्वषट्तु नु न इदमिति तद्वसतीवरीणां वसतीवरित्वं तस्मिन्प्रातर्न समशक्नुवन्तदप्सु प्रावेशयन्ता वसतीवरीरभवन्वसतीवरीर्गृह्णाति

(वसतीवर्यभिधानम्)

यज्ञो वै वसतीवरीर्यज्ञमेवाऽऽरभ्य गृहीत्वोप वसति यस्यागृहीता अभि निम्रोचेदनारब्धोऽस्य यज्ञः स्यात् (१) यज्ञं वि च्छिन्द्याज्ज्योतिष्या वा गृह्णीयाद्धिरण्यं वाऽवधाय सङ्क्राणामेव गृह्णाति यो वा ब्राह्मणो बहुयाजी तस्य कुम्भ्यानां गृह्णीयात्स हि गृहीतवसतीवरीको वसतीवरीर्गृह्णाति पशवो वै वसतीवरीः पशूनेवाऽऽरभ्य गृहीत्वोप वसति यद्द्वीपं तिष्ठन्गृह्णीयान्निर्मार्गुका अस्मात्पशवः स्युः प्रतीपं तिष्ठन्गृह्णाति प्रतिरुध्यैवास्मै पशून्गृह्णातीन्द्रः (२) वृत्रमहन्त्सो ऽपो ऽभ्यश्रियत तासां यन्मेध्यं यज्ञिय॰ सदैवमासीत्तदत्यमुच्यत ता वहन्तीरभवन्वहन्तीनां गृह्णाति या एव मेध्या यज्ञिया सदैवा आपस्तासामेव गृह्णाति नान्तमा वहन्तीरतीयाद्यदन्तमा वहन्तीरतीयाद्यज्ञमतिं मन्येत न स्थावराणां गृह्णीयाद्वरुणगृहीता वै स्थावरा यत्स्थावराणां गृह्णीयात् (३) वरुणेनास्य यज्ञं ग्राहयेद्यद्वै दिवा भवत्यपो रात्रिः प्र विशति तस्मात्ताम्रा आपो दिवा दृढश्रे यन्नक्तं भवत्यपोऽहः प्र विशति तस्मात्सन्द्रा आपो नक्तं दृढश्रे छायायैवाऽऽतपतश्च संधौ गृह्णात्यहोरात्रयोरेवास्मै वर्ण गृह्णाति हविष्मतीरिमा आप इत्याह हविष्कृतानामेव गृह्णाति हविष्मा॰ अस्तु (४) सूर्य इत्याह सङ्क्राणामेव गृह्णात्यनुष्टुभा गृह्णाति वाग्वा अनुष्टुग्वाचैवैनाः सर्वया गृह्णाति चतुष्पदयर्चा

(सोमोपावहरणकथनम्)

गृह्णाति त्रिः सादयति सप्त सं पद्यन्ते सप्तपदा शक्करी पशवः शक्करी पशूनेवाव रुन्धेऽस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्वाहपत्य उपसादयेदस्मिँल्लोके पशुमान्त्स्याद्यदा-हवनीयेऽमुष्मिन् (५) लोके पशुमान्त्स्यादुभ-योरुप सादयत्युभयो रेवैनं लोकयोः पशुमन्तं करोति सर्वतः परि हरति रक्षसामपहत्या इन्द्राग्नि-योर्भागधेयीः स्थेत्याह यथायजुरेवैतदाग्नीध्र उप वासयत्येतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदेव यज्ञस्यापराजितं तदेवैना उप वासयति यतः खलु वै यज्ञस्य वितंतस्य न क्रियते तदनु यज्ञꣳ रक्षाꣳस्यव चरन्ति यद्बर्हन्तीनां गृह्णाति क्रियमा-णमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय न ह्येता ईलयन्त्या तृतीयसवनात्परि शेरे यज्ञस्य संतत्यै (६)

(स्यादिन्द्रो गृह्णीयादस्त्वमुष्मिन्क्रियते

षड्विꣳशतिश्च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः) ।

ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यः सोममुपावहरन्त्सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह

पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह
देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैन॰
सर्वाभ्य उपावहरति पुरा वाचः (१) प्रवदितोः
प्रातरनुवाकमुपाकरोति यावत्येव वाक्तामव रुन्धेऽ-
पोऽग्रेऽभिव्याहरति यज्ञो वा आपो यज्ञमेवामि
वाचं वि सृजति सर्वाणि छन्दा॰स्यन्वाह पशवो वै
छन्दा॰सि पशूनेवाव रुन्धे गायत्रिया तेजस्कामस्य
परि दध्यात्त्रिष्टुभेन्द्रियकामस्य जगत्या पशुकामस्या-
नुष्टुभा प्रतिष्ठाकामस्य पङ्क्त्या यज्ञकामस्य विरा-
जाऽन्नकामस्य शृणोत्वग्निः समिधा हवम् (२)
म इत्याह सवितृप्रसूत एव देवताभ्यो निवेद्यापोऽच्छै-
त्यप इष्य होतरित्याहिषित॰ हि कर्म क्रियते मैत्रा-
वरुणस्य चमसाध्वर्यवा द्रवेत्याह मित्रावरुणौ वा
अपां नेतारौ ताभ्यामेवैना अच्छैति देवीरापो अपां
नपादित्याहाऽऽहुत्यैवैना निष्क्रीय गृह्णात्यथो ह्वि-
ष्कृतानामेवाभिघृतानां गृह्णाति (३) कार्षिरसी-
त्याह शमलमेवाऽऽसामप प्लावयति समुद्रस्य
वोऽक्षित्या उन्नय इत्याह तस्मादुद्यमानाः पीयमाना
आपो न क्षीयन्ते योनिर्वै यज्ञस्य चात्वालं यज्ञो
वसतीवरीर्होतृचमसं च मैत्रावरुणचमसं च स॰-
स्पृश्य वसतीवरीर्व्यानयति यज्ञस्य सयोनित्वा-
याथो स्वादेवैना योनेः प्र जनयत्यध्वर्योऽवेरपा३
इत्याहैतेमनन्नमुरुतेमाः पश्येति वावैतदाह यद्य-
ग्निष्टोमो जुहोति यदुक्थ्यः परिधौ नि मार्ष्टि

(सोमोन्मानकथनम्)

यजुर्वेदस्त्रो यजुर्वेदस्त्र पद्यते यज्ञक्रतूनां व्यावृत्त्यै (४) ॥

(वाचो इर्वमभिधृतानां गृह्णात्युत पञ्चविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

देवस्य त्वा सवितुः प्रसव इति ग्रावाणमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै पशवो वै सोमो व्यान उपाꣳशुसवनो यदुपाꣳशुसवनमभि मिमीते व्यानमेव पशुषु दधातीन्द्राय त्वेन्द्राय त्वेति मिमीत इन्द्राय हि सोम आह्रियते पञ्च कृत्वो यजुषा मिमीते (१) पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पञ्च कृत्वस्तूष्णीं दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धे श्वात्राः स्थ वृत्रतुर इत्याहैष वा अपाꣳ सोमपीथो य एवं वेद नाप्स्वार्तिमार्च्छति यत्ते सोम दिवि ज्योतिरित्याहेभ्य एवैनमू (२) लोकेभ्यः सं भरति सोमो वै राजा दिशोऽभ्यव्यायत्स दिशोऽनु प्राविशत्प्रागपागुदगधरागित्याह दिग्भ्य एवैनꣳ सं भरत्यथो दिश एवास्मा अव रुन्धेऽभ्व नि ष्वरेत्याह कामुका एनꣳ स्त्रियो भवन्ति य एवं वेद यत्ते सोमादाभ्यं नाम जागृवीति

(उपांशुग्रहकथनम्)

(३) आहैष वै सोमस्य सोमपीथो य एवं वेद न सौम्यामार्तिमार्च्छति घ्नन्ति वा एतत्सोमं यदभिषुण्वन्त्यꣳशूनपं गृह्णाति त्रायत एवैनं प्राणा वा अꣳशवः पशवः सोमोऽꣳशून्पुनरपि सृजति प्राणानेव पशुषु दधाति द्वौद्वावपि सृजति तस्माद्द्वौद्वौ प्राणाः (४)

(यजुषा मिमीते एनं जागृवीति चतुश्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः) ।

प्राणो वा एष यदुपाꣳशुर्यदुपाꣳश्वग्रा ग्रहा गृह्यन्ते प्राणमेवानु प्र यन्त्यरुणो ह स्माऽऽहौपवेशिः प्रातःसवन एवाहं यज्ञꣳ सꣳ स्थापयामि तेन ततः सꣳस्थितेन चरामीत्यष्टौ कृत्वोऽग्रेऽभि षुणोत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेव तेनाऽऽप्नोत्येकादश कृत्वो द्वितीयमेकादशाक्षरा त्रिष्टुप्त्रैष्टुभं माध्यंदिनं (१) सवनं माध्यंदिनमेव सवनं तेनाऽऽप्नोति द्वादश कृत्वस्तृतीयं द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाऽऽप्नोत्येताꣳह वाव स यज्ञस्य सꣳस्थितिमुवाचास्कन्दायास्कन्नꣳ हि तद्यद्यज्ञस्य सꣳस्थितस्य

(उपांशुग्रहकथनम्)

स्कन्दत्यथो खल्वाहुर्गायत्री वाव प्रातःसवने नातिवाद इत्यनतिवादुक एनं भ्रातृव्यो भवति य एवं वेद तस्मादुष्टावष्टौ (२) कृत्वोऽभिषुत्य ब्रह्मवादिनो वदन्ति पवित्रवन्तोऽन्ये ग्रहा गृह्यन्ते किंपवित्र उपाꣳशुरिति वाक्पवित्र इति ब्रूयाद्बृहस्पतये पवस्व वाजिन्नित्याह वाचैवैनं पवयति वृष्णो अꣳशुभ्यामित्याह वृष्णो ह्येतावꣳशू यौ सोमस्य गर्भस्तिपूत इत्याह गर्भस्तिना ह्येनं पवयति देवो देवानां पवित्रमसीत्याह देवो ह्येषः (३) सन्देवानां पवित्रं येषां भागोऽसि तेभ्यस्त्वेत्याह येषाꣳ ह्येष भागस्तेभ्य एनं गृह्णाति स्वांकृतोऽसीत्याह प्राणमेव स्वमकृत मधुमतीर्न इषस्कृधीत्याह सर्वमेवास्मा इदꣳ स्वदयति विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु प्राणान्दधाति मनस्त्वा (४) अष्टवित्याह मन एवाश्नुत उर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो हि प्राणः स्वाहा त्वा सुभवः सूर्यायेत्याह प्राणा वै स्वभंवसो देवास्तेष्वेव परोक्षं जुहोति देवेभ्यस्त्वा मरीचिपेभ्य इत्याहाऽऽदित्यस्य वै रश्मयो देवा मरीचिपास्तेषां तद्भागधेयं तानेव तेन प्रीणाति यदि कामयेत वर्षुकः पर्जन्यः (५)स्यादिति नीचा हस्तेन नि मृज्याद्वृष्टिमेव नि यच्छति यदि

(अन्तर्यामग्रहकथनम्)

कामयेतावर्षुकः स्यादित्युत्तानेन नि मृज्याद्वृष्टि-
मेवोद्यच्छति यद्यभिचरेदमुं जह्यथ त्वा होष्यामीति
ब्रूयादाहुतिमेवैनं प्रेप्सन्हन्ति यद्दूरे स्यादा त-
मितोस्तिष्ठेत्प्राणमेवास्यानुगत्य हन्ति यद्यभिचरे-
दमुष्य (६) त्वा प्राणे सादयामीति सादयेदसन्नो
वै प्राणः प्राणमेवास्य सादयति षड्भिरृग्भिः
पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति त्रिः
पवयति त्रय इमे लोका एभिरेवैनं लोकैः
पवयति ब्रह्मवादिनो वदन्ति कस्मात्सत्यात्रयः
पशूनाꣳ हस्तादाना इति यन्त्रिरुपाꣳशु हस्तेन
विगृह्णाति तस्मात्रयः पशूनाꣳ हस्तादानाः पुरुषो
हस्ती मर्कटः (७) ॥

(माध्यंदिनमष्टावष्टावेव मनस्त्वा पर्जन्योऽमुष्य पुरुषो द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः) ।

देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा
उपाꣳशौ यज्ञꣳ सꣳस्थाप्यमपश्यन्तमुपाꣳशौ सꣳ-
स्थापयन्तेऽसुरा वज्रमुद्यत्य देवानभ्यायन्त ते देवा
विभ्यत इन्द्रमुपाधावन्तानिन्द्रोऽन्तर्यामेणान्तरधत्त
तदन्तर्यामस्यान्तर्यामत्वं यदन्तर्यामो गृह्यते भ्रातृ-
व्यानेव तद्यजमानोऽन्तर्धत्तेऽन्तस्तौ (१) दृंहामि
द्यावापृथिवी अन्तरुर्वन्तरिक्षमित्यहिमेव लोकैर्य-

(ऐन्द्रवायवग्रहकथनम्)

जमानो भ्रातृव्यानन्तर्धत्ते ते देवा अमन्यन्तेन्द्रो वा इदमभूद्यद्वय॰ स्म इति तेऽब्रुवन्मघवन्ननु न आ भजेति सजोषा देवैरवरैः परैश्चेत्यब्रवीद्ये चैव देवाः परे ये चावरे तानुभयान् (२) अन्वाभजत्सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चावरे तानुभयान्वाभजत्यन्तर्यामे मघवन्मादयस्वेत्याह यज्ञादेव यजमानं नान्तरेत्युपयामगृहीतोऽसीत्याहापानस्य धृत्यै यदुभावपवित्रौ गृह्येयातां प्राणमपानोऽनु न्यृच्छेत्प्रमायुकः स्यात्पवित्रवानन्तर्यामो गृह्यते (३) प्राणापानयोर्विधृत्यै प्राणापानौ वा एतौ यदुपा॰श्वन्तर्यामौ व्यान उपा॰शुसवनो यं कामयेत प्रमायुकः स्यादित्य॰स्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ विच्छिनत्ति ताजक्प्र मीयते यं कामयेत सर्वमायुरियादिति स॰स्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ सं तनोति सर्वमायुरेति (४) ॥

(त उभयान्गृह्यते चतुश्चत्वारि॰शच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः)।

वाग्वा एषा यदैन्द्रवायवो यदैन्द्रवायवाग्रहा गृह्यन्ते वाचमेवानु प्र यन्ति वायुं देवा अब्रुवन्त्सोम॰ राजान॰ हनामेति सोऽब्रवीद्वरं वृणै

(ऐन्द्रवायवग्रहकथनम्)

मदग्रा एव वो ग्रहा गृह्यान्ता इति तस्मादैन्द्रवायवाग्रा ग्रहा गृह्यन्ते तमघ्नन्सोऽपूयत्तं देवा नोपाधृष्णुवन्ते वायुमब्रुवन्निमं नः स्वदय (१) इति सोऽब्रवीद्वरं वृणै मह्येवत्यान्येव वः पात्राण्युच्यान्ता इति तस्मान्नानादेवत्यानि सन्ति वायव्यान्युच्यन्ते तमेभ्यो वायुरेवास्वदयत्तस्माद्यत्पूयति तत्प्रवाते विषजन्ति वायुर्हि तस्य पवयिता स्वदयिता तस्य विग्रहणं नाविन्दन्त्साऽदितिरब्रवीद्वरं वृणा अथ मया वि गृह्णीध्वं मह्येवत्या एव वः सोमाः (२) सन्ना असन्नित्युपयामगृहीतोऽसीत्याहादितिर्वै त्यास्तेन यानि हि दारुमयाणि पात्राण्यस्यैतानि योनेः संभूतानि यानि मृन्मयानि साक्षात्तान्यस्यै तस्मादेवमाह वाग्वै पराच्यव्याकृताऽवदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वाग्युयते तस्मात्सक्तदिन्द्राय मध्यतो गृह्यते द्विर्वायवे द्वौ हि स वरानवृणीत (३)।

(स्वदय सोमाः सहाष्टाविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(मैत्रावरुणग्रहकथनम्)

अथ षष्ठाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः)।

मित्रं देवा अब्रुवन्त्सोमꣳ राजानꣳ हनामेति सोऽब्रवीन्नाहꣳ सर्वस्य वा अहं मित्रमस्मीति तमब्रुवन् हनामैवेति सोऽब्रवीद्वरं वृणै पयसैव मे सोमꣳ श्रीणान्निति तस्मान्मैत्रावरुणं पयसा श्रीणन्ति तस्मात्पशवोऽपाक्रामन्मित्रः सन्कूरमकरिति कूरमिव खलु वा एषः (१) करोति यः सोमेन यजते तस्मात्पशवोऽपक्रामन्ति यन्मैत्रावरुणं पयसा श्रीणाति पशुभिरेव तन्मित्रꣳ समर्धयति पशुभिर्यजमानं पुरा खलु वावैवं मित्रोऽवेदप मत्करूरं चक्रुषः पशवः क्रमिष्यन्तीति तस्मादेवमवृणीत वरुणं देवा अब्रुवन्त्वयाऽꣳशुवा सोमꣳ राजानꣳ हनामेति सोऽब्रवीद्वरं वृणै मह्यं च (२) एवैष मित्राय च सह गृह्याता इति तस्मान्मैत्रावरुणः सह गृह्यते तस्माद्राज्ञा राजानमꣳशुवा घ्नन्ति वैश्येन वैश्यꣳ शूद्रेण शूद्रं न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा मित्रावरुणावब्रुवन्निदं नो वि वासयतमिति तावब्रूतां वरं वृणावहा एक एवाऽऽवत्पूर्वो ग्रहो गृह्याता इति तस्मादैन्द्रवायवः पूर्वो मैत्रावरुणाद्गृह्यते प्राणापानौ ह्येतौ यदुपाꣳश्वन्तर्यामौ मित्रौऽहरजनयद्वरुणो रात्रिं ततो वा इदं व्यौच्छद्यन्मैत्रावरुणो गृह्यते व्युष्ट्यै (३)॥

(एष चैन्द्रवायवो द्वात्रिꣳशतिश्च)

(आश्विनग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः)

यज्ञस्य शिरोऽच्छिद्यत ते देवा अश्विनावब्रुव-
न्भिषजौ वै स्थ इदं यज्ञस्य शिरः प्रति धत्तमिति
तावब्रूतां वरं वृणावहै ग्रह एव नावत्रापि गृह्यता-
मिति ताभ्यामेतमाश्विनमगृह्णन्ततो वै तौ यज्ञस्य
शिरः प्रत्यधत्तां यदाश्विनो गृह्यते यज्ञस्य निष्क्रीत्यै
तौ देवा अब्रुवन्नपूतौ वा इमौ मनुष्यचरौ (१)
भिषजाविति तस्माद्ब्राह्मणेन भेषजं न कार्यमपूतो
ह्येष १ षोऽमेध्यो यो भिषक्तौ बर्हिष्पवमानेन पव-
यित्वा ताभ्यामेतमाश्विनमगृह्णन्तस्माद्बर्हिष्पमाने
स्तुत आश्विनो गृह्यते तस्मादेवं विदुषा बर्हिष्प-
वमान उपसद्यः पवित्रं वै बर्हिष्पवमान आत्मान-
मेव पवयते तयोस्त्रेधा भैषज्यं वि न्यदधुरग्नौ तृती-
यमप्सु तृतीयं ब्राह्मणे तृतीयं तस्मादुदपात्रम् (२)
उपनिधाय ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्या-
द्यावदेव भेषजं तेन करोति समधुकमस्य कृतं
भवति ब्रह्मवादिनो वदन्ति कस्मात्सत्यादेकपात्रा
द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति यदेकपात्रा
गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो द्विपात्रा हूयन्ते
तस्माद्द्यौर्बहिष्टात्प्राणाः प्राणा वा एते यद्विदे-
वत्याः पशव इडा यदिडां पूर्वां द्विदेवत्येभ्य उप-

(शुक्रामान्थिग्रहकथनम्)

ह्वयेत (३) पशुभिः प्राणानन्तर्दधीत प्रमायुकः स्याद्दिदेवत्यान्भक्षयित्वेडामुप ह्वयते प्राणानेवास्त्मन्धित्वा पशूनुप ह्वयते वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवं भक्षयति तस्मात्पुरस्ताद्वाचा वदति पुरस्तान्मैत्रावरुणं तस्मात्पुरस्ताच्चक्षुषा पश्यति सवंतः परिहारमाश्विनं तस्मात्सवंतः श्रोत्रेण शृणोति प्राणा वा एते यद्दिदेवत्याः (४) अरिक्तानि पात्राणि सादयति तस्मादरिक्ता अन्तरतः प्राणा यतः खलु वै यज्ञस्य वितंतस्य न क्रियते तदनु यज्ञꣳ रक्षाꣳस्यव चरन्ति यदरिक्तानि पात्राणि सादयति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्याꣳ सादयति वाच्येव वाचं दधात्यृतीयसवनात्परि शेरे यज्ञस्य संतत्यै (५) ॥

(मनुष्यचरावुदपात्रमुपह्वयेत द्विदेवत्याः षट्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः) ।

बृहस्पतिर्देवानां पुरोहित आसीच्छण्डामर्कावसुराणां ब्रह्मण्वन्तो देवा आसन्ब्रह्मण्वन्तोऽसुरास्ते ऽन्योऽन्यं नाशकनुवन्नभिभवितुं ते देवाः शण्डा-

(शुक्रामन्थिग्रहकथनम्)

मर्काय॒पाव॒न्नय॒न्त तावब्रूतां वरं वृणावहै ग्रहा-
वेव नावत्रापि गृह्येतामिति ताभ्यामेतौ शुक्रामन्थि-
नावगृह्णन्ततो देवा अभवन्पराऽसुरा यस्यैवं विदुषः
शुक्रामन्थिनौ गृह्येते भवत्यात्मना परा (१)
अस्य भ्रातृव्यो भवति तौ देवा अपनुद्याऽऽत्मन
इन्द्रायाजुह्वुरपनुदै शण्डामर्कौ सहामुनेति ब्रू-
याद्यं द्विष्याद्यमेव द्वेष्टि तेनैनौ सहापं नुदते स
प्रथमः संस्कृतिर्विश्वकर्मेत्येवैनावात्मन इन्द्रायाजु-
हवुरिन्द्रो ह्येतानि रूपाणि करिक्रदचरदसौ वा
आदित्यः शुक्रश्चन्द्रमा मन्थ्यंपिगृह्य प्राञ्चौ निः
(२) क्रामतस्तस्मात्प्राञ्चौ यन्तौ न पश्यन्ति
प्रत्यञ्चावावृत्य जुह्वतस्तस्मात्प्रत्यञ्चौ यन्तौ पश्यन्ति
चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ नासि-
कोत्तरवेदिरभितः परिक्रम्य जुहुतस्तस्मादभितो
नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते
सर्वतः परिं क्रामतो रक्षसामपहत्यै देवा वै याः
प्राचीराहुतीरजुह्वुर्ये पुरस्तादसुरा आसन्ताꣳस्ता-
भिः प्र (३) अनुदन्त याः प्रतीचीर्ये पश्चादसुरा
आसन्ताꣳस्ताभिरपानुदन्त प्राचीरन्या आहुतयो
हूयन्ते प्रत्यञ्चौ शुक्रामन्थिनौ पश्चाच्चैव पुरस्ताच्च
यजमानो भ्रातृव्यान्प्र णुदते तस्मात्परांचीः प्रजाः
प्र वीयन्ते प्रतीचीर्जायन्ते शुक्रामन्थिनौ वा अनु
प्रजाः प्र जायन्तेऽग्नीश्वाऽऽधाश्च सुवीराः प्रजाः

(आग्रयणग्रहकथनम्)

प्रजनयन्परीहि शुक्रः शुक्रशोचिषा (४) सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेत्याहेता वै सुवीरा या अत्रीरेताः सुप्रजा या आर्या य एवं वेदाऽत्र्यस्य प्रजा जायते नाऽऽर्या प्रजापतेरक्ष्यश्वयत्तत्परांऽपतच्चद्विकङ्कतं प्राविंशत्तद्विकङ्कते नारमत तद्यवं प्राविंशत्तद्यवेऽरमत तद्यवस्य (५) यवत्वं यद्वैकङ्कतं मन्थिपात्रं भवति सक्तुभिः श्रीणाति प्रजापतेरेव तच्चक्षुः सं भरति ब्रह्मवादिनो वदन्ति कस्मात्सत्याग्मन्थिपात्रꣳ सदो नाश्नुत इत्यार्तपात्रꣳ हीति ब्रूयाद्यदश्नुवीतान्धोऽध्वर्युः स्यादार्तिमार्छेत्तस्मान्नाश्नुते (६) ॥

(आत्मना परा निष्प शुक्रशोचिषा यवस्य सप्तविꣳशच)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके चतुर्थप्रपाठक एकादशोऽनुवाकः)।

देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा आग्रयणाग्रान्ग्रहानपश्यन्तानगृह्णत ततो वै तेऽग्रं पर्यायन्यस्यैवं विदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानां पर्येति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयाद्भ्रातृव्यस्यैव रुक्त्वाऽग्रꣳ समानानां पर्येति ये देवा दिव्येकादश स्थेत्याह (१) एतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वेभ्यो गृह्णात्येष ते योनि-

(आग्रयणग्रहकथनम्)

विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येष देवतया वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णन् साऽमन्यत वागन्तर्यन्ति वै मेति साऽऽग्रयणं प्रत्याऽमंच्छत्तदा-ग्रयणस्याऽऽग्रयणत्वम् (२) तस्मादाग्रयणे वाग्वि सृज्यते यत्तूष्णीं पूर्वे ग्रहा गृह्यन्ते यथा त्सारीर्यति म आख्त इर्यति नाप रात्स्यामीत्युपावसृजत्येवमेव तदध्वर्युरांग्रयणं गृहीत्वा यज्ञमारभ्य वाचं वि सृजते त्रिर्हि करोत्युद्गातृनेव तद्वृणीते प्रजापतिर्वा एष यदाग्रयणो यदाग्रयणं गृहीत्वा हिं करोति प्रजापतिरेव (३) तत्प्रजा अभि जिघ्रति तस्माद्वत्सं जातं गौरभि जिघ्रत्यात्मा वा एष यज्ञस्य यदा-ग्रयणः सर्वतनेसदनेऽभि गृह्णात्यात्मनेव यज्ञꣳ सं तनोत्युपावसृजा नयति रेत एव तद्धत्ते धत्ते ऽधस्तादुप गृह्णाति प्रजनयत्येव तद्ब्रह्मवादिनो वदन्ति कस्मा-त्तस्यात्रायत्री कनिष्ठा छन्दसाꣳ सती सर्वाणि सवनानि वहतीत्येष वै गायत्रियै वत्सो यदाग्रय-णस्तमेव तदभिनिवर्तꣳ सर्वाणि सवनानि वहति तस्माद्वत्समपाकृतं गौरभि नि वर्तते (४) ॥

(आहाऽऽग्रयणत्वं प्रजापतिरेवेति विꣳशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके चतुर्थप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

(उक्थ्यग्रहकथनम्)

यज्ञेन वा उपयद्भिर्देवा वै यज्ञमार्भ्राग्रे ब्रह्मवादिनः स त्वै देवस्य भ्रातृणं प्राणो वा उपाश्वग्रा देवा वा उपाश्वौ वाग्वै मित्रं यज्ञस्य शिरो बृहस्पतिर्दे-वा वा आग्रयणाग्रानेकादश ॥ ११ ॥

यज्ञेन लोके पशुमान्स्यात्सर्वनं माध्यंदिनं वाग्वा अरिंकाने तत्प्रजा एकपञ्चाशत् ॥ ५१ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया षष्ठाष्टके चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ षष्ठाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः।

हरिः ॐ ।

इन्द्रो वृत्राय वज्रमुदयच्छत्स वृत्रो वज्रादुद्यता-दबिभेत्सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्यं प्रायच्छ-त्तस्मै द्वितीयमुदयच्छत्सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति (१) तस्मा उक्थ्यमेव प्रायच्छत्तस्मै तृतीयमुदयच्छत्तं विष्णुर-न्वतिष्ठत जहीति सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्य-मेव प्रायच्छत्तं निर्भीयं भूतमहन्यज्ञो हि तस्य मायाऽऽसीद्यदुक्थ्यो गृह्यते इन्द्रियमेव (२) तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते इन्द्राय त्वा

(ध्रुवग्रहकथनम्)

बृहद्वते वयस्वत इत्याहेन्द्राय हि स तं प्रार्यच्छ-
त्तस्मै त्वा विष्णवे त्वेत्याह यदेव विष्णुरन्वतिष्ठत
जहीति तस्माद्विष्णुमन्वाभजति त्रिर्निगृह्णाति त्रिर्हि
स तं तस्मै प्रायच्छदेष ते योनिः पुनर्हविरसीत्याह
पुनः पुनः (३) ह्यस्माद्गृह्णाति चक्षुर्वा एत-
द्यज्ञस्य यदुक्थ्यस्तस्मादुक्थ्यꣳ हुतꣳ सोमा
अन्वायन्ति तस्मादात्मा चक्षुरन्वेति तस्मादेकं यन्तं
बहवोऽनु यन्ति तस्मादेको बहूनां भद्रो भवति
तस्मादेकां बह्वीर्जाया विन्दते यदिं कामयेताध्वर्यु-
रात्मानं यज्ञयज्ञसेनार्पयेयमित्यन्तराऽऽहवनीयं च
हविर्धानं च तिष्ठन्नव नयेत् (४) आत्मानमेव
यज्ञयज्ञसेनार्पयति यदिं कामयेत यजमानं यज्ञ-
यज्ञसेनार्पयेयमित्यन्तरा सदोहविर्धाने तिष्ठन्नव नये-
द्यजमानमेव यज्ञयज्ञसेनार्पयति यदिं कामयेत
सदस्यान्यज्ञयज्ञसेनार्पयेयमिति सदं आलभ्याव
नयेत्सदस्यानेव यज्ञयज्ञसेनार्पयति (५) ॥

इतीन्द्रियमेव पुनःपुनर्नयेन्नयेत्त्रिꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः)।

आयुर्वा एतद्यज्ञस्य यद्ध्रुव उत्तमो ग्रहाणां
गृह्यते तस्मादायुः प्राणानामुत्तमं मूर्धानं दिवो

(ऋतुग्रहकथनम्)

अरतिं पृथिव्या इत्याह मूर्धानमेवैनꣳ समानानां करोति वैश्वानरमृताय जातमग्निमित्याह वैश्वानरꣳ हि देवतयाऽऽयुरुभयतोवैश्वानरो गृह्यते तस्मादुभयतः प्राणा अधस्ताच्चोपरिष्टाच्चार्धिनोऽन्ये ग्रहा गृह्यन्तेऽर्धी ध्रुवस्तस्मात् (१) अर्ध्यवाङ्प्राणोऽन्येषां प्राणानामुपोत्तेऽन्ये ग्रहाः साद्यन्तेऽनुपोत्ते ध्रुवस्मादस्थनाऽन्याः प्रजाः प्रतितिष्ठन्ति माꣳसेनान्या असुरा वा उत्तरतः पृथिवीं पर्याचिकीर्षन्तां देवा ध्रुवेणाद्ꣳहन्तद्ध्रुवस्य ध्रुवत्वं यद्ध्रुव उत्तरतः साद्यते धृत्या आयुर्वा एतद्यज्ञस्य यद्ध्रुव आत्मा होता यद्धोतृचमसे ध्रुवमवनयत्यात्मन्नेव यज्ञस्य (२) आयुर्दधाति पुरस्तादुक्थस्यावनीय इत्याहुः पुरस्ताद्ध्यायुषो भुङ्क्ते मध्यतोऽवनीय इत्याहुर्मध्यमेन ह्यायुषो भुङ्क्त उत्तरार्धेऽवनीय इत्याहुरुत्तमेन ह्यायुषो भुङ्क्ते वैश्वदेव्यामृचि शस्यमानायामवं नयति वैश्वदेव्यो वै प्रजाः प्रजास्वेवाऽऽयुर्दधाति ३) ॥

(अर्धी ध्रुवस्तस्मादेव यज्ञस्यैकाचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः)।

यज्ञेन वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते संवत्सरेण योप-

(ऋतुग्रहकथनम्)

यित्वा सुवर्गं लोकमायन्तमृषय ऋतुग्रहैरेवानु प्राजानन्यद्दतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य प्रज्ञात्यै द्वादश गृह्यन्ते द्वादश मासाः संवत्सरः सांवत्सरस्य प्रज्ञात्यै सह प्रथमौ गृह्येते सहोत्तमौ तस्माद्द्वौद्वावृतू उभयतोमुखमृतुपात्रं भवति कः (१) हि तद्वेद यत ऋतूनां मुखमृतुना प्रेष्येति षट्कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणात्यृतुभिरिति चतुश्चतुष्पद एव प्रीणाति द्विः पुनर्ऋतुनाऽऽह द्विपद एव प्रीणात्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुस्तस्माच्चतुष्पादः पशव ऋतूनुप जीवन्ति द्विः (२) पुनर्ऋतुनाऽऽह तस्माद्द्विपादश्चतुष्पदः पशूनुप जीवन्त्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुर्द्विः पुनर्ऋतुनाऽऽहाऽऽक्रमणमेव तत्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै नान्योऽन्यमनु प्रपद्येत यदन्योऽन्यमनुप्रपद्येतर्तूर्ऋतुमनु प्र पद्येतर्तवो मोहुकाः स्युः (३) प्रसिद्धमेवाध्वर्युर्दक्षिणेन प्र पद्यते प्रसिद्धं प्रतिप्रस्थातोत्तरेण तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेणोपयामगृहीतोऽसि स२सर्पोऽस्य२हस्पत्याय त्वेत्याहास्ति त्रयोदशो मास इत्याहुस्तमेव तत्प्रीणाति (४)॥

(को जीवन्ति द्विः स्युश्चतुस्रि२शच्च)।

(मरुत्वतीयमाहेन्द्रग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः)

सुवर्गाय वा एते लोकाय गृह्यन्ते यद्दृतुग्रहा ज्योतिरिन्द्राग्नी यदैन्द्राग्नमृतुपात्रेण गृह्णाति ज्योतिरेवास्मा उपरिष्टाद्दधाति सुवर्गस्य लोकस्यानुख्यात्या ओजोभृतौ वा एतौ देवानां यदिन्द्राग्नी यदैन्द्राग्नो गृह्यत ओज एवाव रुन्धे वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजा असावादित्यः शुक्रो यदैश्वदेवꣳ शुक्रपात्रेण गृह्णाति तस्मादसावादित्यः (१) सर्वाः प्रजाः प्रत्यङ्ङुदेति तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजास्तेजः शुक्रो यद्वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति प्रजास्वेव तेजो दधाति (२) ॥

(तस्मादसावादित्यास्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः)।

इन्द्रो मरुद्भिः सांविद्येन माध्यंदिने सवने वृत्रमहन्यन्माध्यंदिने सवने मारुत्वतीया गृह्यन्ते वार्त्रघ्ना एव ते यजमानस्य गृह्यन्ते तस्य वृत्रं

जघ्नुषꣳ ऋतवोऽमुह्यन्त्स ऋतुपात्रेण मरुत्वतीयानगृ-
हणात्ततो वै स ऋतून्प्राजानद्ऋतुपात्रेण मरुत्व-
तीया गृह्यन्ते ऋतूनां प्रज्ञात्यै वज्रं वा एतं यज-
मानो भ्रातृव्याय प्र हरति यन्मरुत्वतीया उदेव
प्रथमेन (१) यच्छति प्र हरति द्वितीयेन
स्तृणुते तृतीयेनाऽऽयुधं वा एतद्यजमानः सꣳ
स्कुरुते यन्मरुत्वतीया धनुरेव प्रथमो ज्या द्वितीय
इषुस्तृतीयः प्रत्येव प्रथमेन धत्ते वि सृजति द्विती-
येन विध्यति तृतीयेनेन्द्रो वृत्रꣳ हत्वा परां परावर्त-
मगच्छदपाराधमिति मन्यमानः स हरितोऽभवत्स
एतान्मरुत्वतीयानात्मस्परणानपश्यत्तानगृह्णीत(२)
प्राणमेव प्रथमेनास्पृणुतापानं द्वितीयेनाऽऽत्मानं
तृतीयेनाऽऽत्मस्परणा वा एते यजमानस्य गृह्यन्ते
यन्मरुत्वतीयाः प्राणमेव प्रथमेन स्पृणुतेऽपानं
द्वितीयेनाऽऽत्मानं तृतीयेनेन्द्रो वृत्रमहन्तं देवा
अब्रुवन्महान्वा अयमभूद्यो वृत्रमवधीदिति तन्म-
हेन्द्रस्य महेन्द्रत्वꣳ स एतं माहेन्द्रमुद्धारमुदहरत
वृत्रꣳ हत्वाऽन्यासु देवतास्वधि यन्माहेन्द्रो गृह्यत
उद्धारमेव तं यजमान उद्धरतेऽन्यासु प्रजास्वधि
शुक्रपात्रेण गृह्णाति यजमानदेवत्यो वै माहेन्द्र-
स्तेजः शुक्रो यन्माहेन्द्रꣳ शुक्रपात्रेण गृह्णाति
यजमान एव तेजो दधाति (३) ॥

(प्रथमेनागृह्णीत देवतास्वष्टाविꣳशतिश्च)।

(आदित्यग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः)।

अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्तस्या उच्छेषणमददुस्तत्प्राश्नात्सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचत्साऽमन्यतोच्छेषणान्म इमेऽज्ञत यदग्रे प्राशिष्यामीतो मे वसीयाꣳसो जनिष्यन्त इति साऽग्रे प्राश्नात्सा रेतोऽधत्त तस्यै व्यृद्धमाण्डमजायत साऽऽदित्येभ्य एव (१) तृतीयमपचद्भोगाय म इदꣳ श्रान्तमस्त्विति तेऽब्रुवन्वरं वृणामहै योऽतो जायाता अस्माकꣳ स एकोऽसद्योऽस्य प्रजायामूध्याता अस्माकं भोगाय भवादिति ततो विवस्वानादित्योऽजायत तस्य वा इयं प्रजा यन्मनुष्यास्तास्वेक एवर्धो यो यजते स देवानां भोगाय भवति देवा वै यज्ञात् (२) रुद्रमन्तरायन्स आदित्यानन्वाक्रमत ते द्विदेवत्यान्प्रापद्यन्त तान्न प्रति प्रायच्छन्तस्मादपि वध्यं प्रपन्नं न प्रति प्रयच्छन्ति तस्माद्द्विदेवत्येभ्य आदित्यो निगृह्यते यदुच्छेषणादजायन्त तस्मादुच्छेषणादगृह्यते तिसृभिर्ऋग्भिर्गृह्णाति माता पिता पुत्रस्तदेव तन्मिथुनमुल्बं गर्भो जरायु तदेव तत् (३) मिथुनं पशवो वा एते यदादित्य उर्ग्दधि दुग्धा मध्यतः

(सावित्रवैश्वदेवग्रहकथनम्)

श्रीणात्यूर्जमेव पशूनां मध्यतो दधाति शृतात-
ङ्क्येन मेध्यत्वाय तस्मादामा पक्वं दुहे पशवो वा
एते यदादित्यः परिश्रित्य गृह्णाति प्रतिरुध्यैवास्मै
पशून्गृह्णाति पशवो वा एते यदादित्य एष रुद्रो
यदग्निः परिश्रित्य गृह्णाति रुद्रादेव पशूनन्तर्दधाति
(४) एष वै विवस्वानादित्यो यदुपाꣳशुसवनः
स एतमेव सोमपीथं परि शय आ तृतीयसवना-
द्विवस्व आदित्येष ते सोमपीथ इत्याह विवस्वन्त-
मेवाऽऽदित्यꣳ सोमपीथेन समर्धयति या दिव्या
वृष्टिस्तया त्वा श्रीणामीति वृष्टिकामस्य श्रीणी-
याद्वृष्टिमेवाव रुन्धे यदि ताजक्प्रस्कन्देद्वर्षुकः
पर्जन्यः स्याद्यदि चिरमवर्षुको न सादयत्यसन्नाद्धि
प्रजाः प्रजायन्ते नानु वषट्करोति यदनुवषट्कु-
र्याद्रुद्रं प्रजा अन्ववसृजेन्न हुत्वाऽन्वीक्षेत यदन्वी-
क्षेत चक्षुरस्य प्रमायुकꣳ स्यात्तस्मान्नान्वीक्ष्यः
(५) ॥

(एव यज्ञाज्जरायु तदेव तदन्तर्दधाति न
सप्तविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

अन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति प्र-
जापतिर्वा एष यदाग्रयणः प्रजानां प्रजननाय न
सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट्क-

(सावित्रवैश्वदेवग्रहकथनम्)

रोति यदनुवषट्कुर्याद्रुद्रं प्रजा अन्ववसृजेदेष वै गायत्रो देवानां यत्सवितैष गायत्रियै लोके गृह्यते यदाग्रयणो यदन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति स्वादेवैनं योनेर्निगृह्णाति विश्वे (१) देवास्तृतीयꣳ सवनं नोदयच्छन्ते सवितारं प्रातःसवनभागꣳ सन्तं तृतीयसवनमभि पर्यणयन्ततो वै ते तृतीयꣳ सवनमुदयच्छन्यत्तृतीयसवने सावित्रो गृह्यते तृतीयस्य सवनस्योद्यत्यै सवितृपात्रेण वैश्वदेवं कलशादगृह्णाति वैश्वदेव्यो वै प्रजा वैश्वदेवः कलशः सविता प्रसवानामीशे यत्सवितृपात्रेण वैश्वदेवं कलशादगृह्णाति सवितृप्रसूत एवास्मै प्रजाः प्र (२) जनयति सोमे सोममभि गृह्णाति रेत एव तद्दधाति सुशर्माऽसि सुप्रतिष्ठान इत्याह सोमे हि सोममभिगृह्णाति प्रतिष्ठित्या एतस्मिन्वा अपि ग्रहे मनुष्येभ्यो देवेभ्यः पितृभ्यः क्रियते सुशर्माऽसि सुप्रतिष्ठान इत्याह मनुष्येभ्य एवैतेन करोति बृहदित्याह देवेभ्य एवैतेन करोति नम इत्याह पितृभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्येष योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येषः (३) ॥

(विश्वे म पितृभ्य एवैतेन करोत्येकान्नविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः) ।

प्राणो वा एष यदुपाꣳशुर्यदुपाꣳशुपात्रेण प्रथमश्चोत्तमश्च ग्रहो गृह्यते प्राणमेवानु प्रयन्ति प्राणमनूद्यन्ति प्रजापतिर्वा एष यदाग्रयणः प्राण उपाꣳशुः पत्नीः प्रजाः प्रजनयन्ति यदुपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णाति प्रजानां प्रजननाय तस्मात्प्राणं प्रजा अनु प्र जायन्ते देवा वा इतइतः पत्नीः सुवर्गम् (१) लोकमजिगाꣳसन्त सुवर्गं लोकं न प्राजानन्त एतं पात्नीवतमपश्यन्तमगृह्णत ततो वै सुवर्गं लोकं प्राजानन्यत्पात्नीवतो गृह्यते सुवर्गस्य लोकस्य प्रज्ञात्यै स सोमो नातिष्ठत स्त्रीभ्यो गृह्यमाणस्तं घृतं वज्रं कृत्वाऽघ्नन्तं निरिन्द्रियं भूतमगृह्णन्तस्मान्स्त्रियो निरिन्द्रिया अदायादीरपि पापात्पुꣳस उपस्तितरम् (२) वदन्ति यदघृतेन पात्नीवतꣳ श्रीणाति वज्रेणैवैनं वशे कृत्वा गृह्णात्युपयामगृहीतोऽसीत्याहेयं वा उपयामस्तस्मादिमां प्रजा अनु प्र जायन्ते बृहस्पतिसुतस्य त इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयतीन्दो इत्याह रेतो वा इन्दू रेत एव तद्दधातीन्द्रियाव इति (३) आह प्रजा वा इन्द्रियं प्रजा एवास्मै प्र जनयत्यग्ना३ इत्याहाग्निर्वै रेतोधाः पत्नीव इत्याह मिथुनत्वाय सजूर्देवेन त्वष्ट्रा सोमं पिबेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधाति देवा वै

(हारियोजनग्रहकथनम्)

त्वष्टारमजिघाꣳसन्त्स पत्नीः प्रापद्यत तं न प्रति प्रायच्छन्तस्मादपि (४) वध्यं प्रपन्नं न प्रति प्र यच्छन्ति तस्मात्पात्नीवते त्वष्ट्रेऽपि गृह्यते न सादयत्यासन्नाद्धि प्रजाः प्रजायन्ते नानु वषट्क-रोति यदनुवषट्कुर्याद्रुद्रं प्रजा अन्ववसृजेयुन्नानु-वषट्कर्यादशान्तमग्नीत्सोमं भक्षयेदुपाꣳश्वनु वष-ट्करोति न रुद्रं प्रजा अन्ववसृजति शान्तमग्नी-त्सोमं भक्षयत्यग्नीन्नेष्टुरुपस्थमा सीद (५) नेष्टः पत्नीमुदानयत्याहाग्नीदेव नेष्टरि रेतो दधाति नेष्टा पत्नियामुद्वात्रा सं ख्यापयति प्रजापतिर्वा एष यद्धोता प्रजानां प्रजननायाप उप प्र वर्त-यति रेत एव तत्सिञ्चत्यूरुणोप प्र वर्तयत्यूरुणा हि रेतः सिच्यते नग्नंकृत्योरुप प्र वर्तयति यदा हि नग्न ऊरुभवत्यथ मिथुनी भवतोऽथ रेतः सिच्यतेऽथ प्रजाः प्र जायन्ते (६) ॥

(पत्नीः सुवर्गमुपस्तितरामिन्द्रियाव इत्यपि सीद मिथुन्यष्टौ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः) ।

इन्द्रो वृत्रमहन्तस्य शीर्षकपालमुदौब्जत्स द्रोणकलशोऽभवत्तस्मात्सोमः समस्रवत्स हारियो-जनोऽभवत्तं व्यचिकित्सज्जुहवानी ३ मा हौषा ३-मिति सोऽमन्यत यद्धोष्याम्यꣳ होष्यामि यन्न

होष्यामि यज्ञवेशसं करिष्यामीति तमभ्रियत होतुः सोऽग्निरब्रवीन्न मय्यामः होष्यसीति तं धानाभिरश्रीणात् (१) तः शृतं भूतमजुहो-द्यद्धानाभिर्हारियोजनः श्रीणाति शृतत्वाय शृत-मेवैनं भूतं जुहोति बह्वीभिः श्रीणात्येवावतीरेवा-स्यामुष्मिल्लोके कामदुघा भवन्त्यथो खल्वाहुरेता वा इन्द्रस्य पृश्नयः कामदुघा यद्धारियोजनीरिति तस्माद्बह्वीभिः श्रीणीयादक्षसामे वा इन्द्रस्य हरी सोमपानौ तयोः परिधय आधानं यदग्रहत्य परिधीञ्जुहुयादन्तराधानाभ्याम् (२) घासं प्र य-च्छेत्प्रहृत्य परिधीञ्जुहोति निराधानाभ्यामेव घासं प्र यच्छत्युन्नेता जुहोति यातयामेव ह्येतर्ह्यध्वर्युः स्वगाकृतो यदध्वर्युर्जुहुयाद्यथा विमुक्तं पुनर्युनक्ति तादृगेव तच्छीर्षन्नधिनिधाय जुहोति शीर्षतो हि स समभवद्विक्रम्य जुहोति विक्रम्य हीन्द्रो वृत्र-महन्त्समृद्ध्यै पशवो वै हारियोजनीर्यत्संभि-न्द्यादल्पाः (३) एनं पशवो भुञ्जन्त उप तिष्ठे-रन्यन्न संभिन्द्याद्बहव एनं पशवोऽभुञ्जन्त उप तिष्ठेरन्मनसा सं बाधत उभयं करोति बहव एवैनं पशवो भुञ्जन्त उप तिष्ठन्त उन्नेतर्युपहवमिच्छन्ते य एव तत्र सोमपीथस्तमेवाव रुन्धत उत्तरवेद्यां नि वपति पशवो वा उत्तरवेदिः पशवो हारियोजनीः पशुष्वेव पशून्प्रति ष्ठापयन्ति (४) ॥

(अश्रीणादन्तराधानाभ्यामल्पाः स्थापयन्ति)।

(आग्रयणादीनां पुनर्ग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः)।

ग्रहान्वा अनु प्रजाः पशवः प्र जायन्त उपाꣳश्वन्तर्यामावजावयः शुक्रामन्थिनौ पुरुषा ऋतुग्रहानेकशफा आदित्यग्रहं गावं आदित्यग्रहो भूयिष्ठाभिर्क्रग्मिगृह्यते तस्माद्गावः पशूनां भूयिष्ठा यत्त्रिरुपाꣳशु हस्तेन विगृह्णाति तस्माद्द्वौ त्रीनजा जनयत्यथावयो भूयसीः पिता वा एष यदाग्रयणः पुत्रः कलशो यदाग्रयण उपदस्येत्कलशाद्गृह्णीयाद्यथा पिता (१) पुत्रं क्षित उपधावति तादृगेव तद्यत्कलशं उपदस्येदाग्रयणाद्गृह्णीयाद्यथा पुत्रः पितरं क्षित उपधावति तादृगेव तदात्मा वा एष यज्ञस्य यदाग्रयणो यदाग्रहो वा कलशो वोपदस्येदाग्रयणाद्गृह्णीयादात्मन एवार्धं यज्ञं निष्क्रीत्यविज्ञातो वा एष गृह्यते यदाग्रयणः स्याल्या गृह्णाति वायव्येन जुहोति तस्मात् (२) गर्भेणाविज्ञातेन ब्रह्महाऽवभृथमव यन्ति परा स्थालीरस्यन्त्युद्वायव्यानि हरन्ति तस्मात्स्त्रियै जातं पराऽस्यन्त्युत्पुमाꣳसꣳ हरन्ति यत्पुरोरुचमाह यथा वस्यस आहरति तादृगेव तद्यद्ग्रहं गृह्णाति यथा वस्यस आहृत्य प्राऽऽह तादृगेव तद्यत्सादयति

(सोमपात्रस्तुति)

यथा वस्यस उपनिधायापक्रामति तादृगेव तद्यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद्दृढं पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टादुपयामा ऋचा यज्ञस्य धृत्यै (२) ॥

(यथा पिता तस्मादपक्रामति तादृगेव तद्यदृष्टादृशं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

प्राच्यानि पात्राणि युज्यन्ते नाच्यानि यानि पराचीनानि प्रयुज्यन्तेऽमुमेव तैर्लोकमभि जयति परोऽक्ष्व ह्यसौ लोको यानि पुनः प्रयुज्यन्त इममेव तैर्लोकमभि जयति पुनः पुनरिव ह्ययं लोकः प्राच्यानि पात्राणि युज्यन्ते नाच्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वोषधयः परा भवन्ति याश्च पुनः (१) प्रयुज्यन्ते तान्यन्वोषधयः पुनरा भवन्ति प्राच्यानि पात्राणि युज्यन्ते नाच्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वारण्याः पशवोऽरण्यमप यन्ति यानि पुनः प्रयुज्यन्ते तान्यनु ग्राम्याः पशवो ग्राममुपावयन्ति यो वै ग्रहाणां निदानं वेद निदानवान्भवत्याज्यमित्युक्थं तद्वै ग्रहाणां निदानं यदुपाꣳशु शꣳसति तत् (२) उपाꣳश्वन्तर्यामयोर्यदुच्चैस्तादितरेषां ग्रहाणामेतद्वै

(सोमपात्रस्तुतिः)

ग्रहाणां निदानं य एवं वेद निदानवान्भवति यो वै ग्रहाणां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते स्थालीभिरन्ये ग्रहा गृह्यन्ते वायव्यैरन्य एतद्वै ग्रहाणां मिथुनं य एवं वेद प्र प्रजया पशुभिर्मिथुनैर्जायत इन्द्रस्त्वष्टुः सोममभीषहाऽपिबत्स विष्वङ् (३) व्यार्च्छत्स आत्मन्नारमणं नाविन्दत्स एतानेनुसवनं पुरोडाशानपश्यत्तानिरवपत्तैर्वै स आत्मन्नारमणमकुरुत तस्मादनुसवनं पुरोडाशा निरुप्यन्ते तस्मादनुसवनं पुरोडाशानां प्राश्नीयादात्मन्नेवाऽऽरमणं कुरुते नैनꣳ सोमोऽति पवते ब्रह्मवादिनो वदन्ति नर्चा न यजुषा पङ्क्तिराप्यतेऽथ किं यज्ञस्य पाङ्क्तत्वमिति धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद्यज्ञस्य पाङ्क्तत्वम् (४)॥

(भवन्ति यानि पुनः शꣳसति तद्विष्वङ्किं चतुर्दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः॥ ११॥

इन्द्रो वृत्रायाऽऽयुर्वै यज्ञेन सुवर्गायेन्द्रो मरुद्भिरदितिरन्तर्यामपात्रेण प्राण उपाꣳशुपात्रेणेन्द्रो वृत्रमहन्तस्य ग्रहान्वै पान्यानि पात्राण्येकादश॥ ११॥

इन्द्रो वृत्राय पुनर्हन्तुनाऽऽह मिथुनं पशवो नेष्टः पत्नीमुपाꣳशवन्तर्यामयोर्द्वे चत्वारिꣳशत्॥ ४२॥

हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके पञ्चमः प्रपाठकः॥ ५॥

(दक्षिणाहोमकथनम्)

(अथ षष्ठाष्टके षष्ठः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्दक्षिणानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमते सदोऽभ्यैति सुवर्गमेवैनं लोकं गमयति सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोत्यमुमेवैनं लोकꣳ समारोहयति नयवत्यर्चाऽऽग्नीध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै दिवं गच्छ सुवः पतेति हिरण्यम् (१) हुत्वोद्गृह्णाति सुवर्गमेवैनं लोकं गमयति रूपेण वो रूपमभ्यैमीत्याह रूपेण ह्यासाꣳ रूपमभ्यैति यद्धिरण्येन तुथो वो विश्ववेदा वि भजत्वित्याह तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा वि भजति तेनैवैना वि भजत्येतत्ते अग्ने राधः (२) ऐति सोमꣳयुतमित्याह सोमꣳयुतꣳ ह्यस्य राध ऐति तन्मित्रस्य पथा नयेत्याह शान्त्या ऋतस्य पथा प्रेत चन्द्रदक्षिणा इत्याह सत्यं वा ऋतꣳ सत्येनैवैना ऋतेन वि भजति यज्ञस्य पथा सविता नयन्तीरित्याह यज्ञस्य ह्येताः पथा यन्ति यद्दक्षिणा ब्राह्मणमद्य राध्यासम् (३) ऋषिमार्षेयमित्याहैष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान्तस्मादेवमाह वि सुवः पश्य व्यन्तरिक्षमित्याह सुवर्गमेवैनं लोकं गमयति यतस्व सदस्यैरित्याह मित्र-

(समिष्टयजुर्होमकथनम्)

त्वायास्मद्धात्रा देवत्रा गच्छत मधुमतीः प्रदातारमा विशतेत्याह वयमिह प्रदातारः स्मोऽस्मानमुत्र मधुमतीरा विशतेति (४) वावैतदाह हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिरेव पुरस्ताद्धत्ते सुवर्गस्य लोकस्यानुख्यात्या अग्नीधेददात्यग्निर्मुखानेवर्त्विग्भ्रीणाति ब्रह्मणे ददाति प्रसूत्यै होत्रे ददात्यात्मा वा एष यज्ञस्य यद्धोताऽऽत्मानमेव यज्ञस्य दक्षिणाभिः समर्धयति (५) ॥

[हिरण्यꣳ राधो राध्यासं मधुमतीरा विशतेत्यष्टाविꣳशच्च] ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः)

समिष्टयजूꣳषि जुहोति यज्ञस्य समिष्टयै यद्वै यज्ञस्य क्रूरं यद्विलिष्टं यदत्येति यन्नात्येति यदतिकरोति यन्नापि करोति तदेव तैः प्रीणाति नव जुहोति नव वै पुरुषे प्राणाः पुरुषेण यज्ञः संमितो यावानेव यज्ञस्तं प्रीणाति षड्ऋतवः षड्वा ऋतवः ऋतूनेव प्रीणाति त्रीणि यजूꣳषि (१) त्रय इमे लोका इमानेव लोकान्प्रीणाति यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छेत्याह यज्ञपतिमेवैनं गमयति स्वां योनिं गच्छेत्याह स्वामेवैनं योनिं गमयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीर इत्याह यजमान एव वीर्यं

(अवभृथयजुर्होमकथनम्)

दधाति वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ यत्सृञ्जयान्बहुयाजिनोऽयंयजो यज्ञे (२) यज्ञं प्रत्यतिष्ठिपा३ यज्ञपता३ विति स होवाच यज्ञ पताविति सत्याद्वै सृञ्जयाः परा बभ्रुरिति होवाच यज्ञे वाव यज्ञः प्रतिष्ठाप्य आसीद्यजमानस्यापराभावायेति देवा गातुविदो गातुं वित्त्वा गातुमित्येत्याह यज्ञ एव यज्ञं प्रति ष्ठापयति यजमानस्यापराभावाय (३)॥

(यजूंषि यज्ञ एकचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ षष्ठाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः)।

अवभृथयजूंषि जुहोति यदेवार्वाचीनमेकहायनादेनः करोति तदेव तेरव यजतेऽपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव यजते वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति साम्ना प्रस्तोताऽन्ववैति साम वै रक्षोहा रक्षसामपहत्यै त्रिनिधनमुपैति त्रय इमे लोका एभ्य एव लोकेभ्यो रक्षाꣳसि (१) अप हन्ति पुरुषः पुरुषो निधनमुपैति पुरुषःपुरुषो हि रक्षस्वी रक्षसामपहत्या उरुꣳ हि राजा वरुणश्चकारेत्याह प्रतिष्ठित्यै शतं ते राजन्भिषजः सहस्रमित्याह भेषजमेवास्मै करोत्यभिष्टितो वरुणस्य पाश इत्याह वरुणपाशमेवाभि

(अवभृथयजुर्होमकथनम्)

तिष्ठति बर्हिरसि जुहोत्याहुतीनां प्रतिष्ठित्या अथो अग्निवत्येव जुहोत्यपबर्हिषः प्रयाजान् (२) यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चत्याज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेति वरुणं यजति वरुणपाशादेवैनं मुञ्चत्यग्नीवरुणौ यजति साक्षादेवैनं वरुणपाशान्मुञ्चत्यपबर्हिषावनूयाजौ यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चति चतुरः प्रयाजान्यजति द्वावनूयाजौ षट्सम्पद्यन्ते षड्वा ऋतवः (३) ऋतुष्वेव प्रति तिष्ठत्यवभृथ निचङ्कुणेत्याह यथोदितमेव वरुणमव यजते समुद्रे ते हृदयमप्स्वन्तरित्याह समुद्रे ह्येनन्तर्वरुणः सं त्वा विशन्त्वोषधीरुताऽऽप इत्याहाद्भिरेवैनमोषधीभिः सम्यञ्चं दधाति देवीराप एष वो गर्भ इत्याह यथायजुरेवैतत्पशवो वै (४) सोमो यद्भिन्दूनां भक्षयेत्पशुमान्स्याद्वरुणस्त्वेनं गृह्णीयाद्यन्न भक्षयेदपशुः स्यान्नैनं वरुणो गृह्णीयादुपस्पृश्यमेव पशुमान्भवति नैनं वरुणो गृह्णाति प्रतियुतो वरुणस्य पाश इत्याह वरुणपाशादेव निर्मुच्यतेऽप्रतीक्षमा यन्ति वरुणस्यान्तर्हित्या एषोऽस्येधिषीमहीत्याह समिधैवाग्निं नमस्यन्त उपायन्ति तेजोऽसि तेजो मयि धेहीत्याह तेज एवाऽऽत्मन्धत्ते (५)॥

(रक्षाꣳसि प्रयाजानुतवो वै नमस्यन्तो द्वादश च)

(यूपैकादशिनीकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके
षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः)

स्फ्येन वेदिमुद्धन्ति रथाक्षेण वि मिमीते यूपं मिनोति त्रिवृतमेव वज्रꣳ संभृत्य यजमानाय प्र हरति स्तृत्यै यदन्तर्वेदि मिनुयाद्द्यावलोकमभि जयेद्यद्बहिर्वेदि मनुष्यलोकं वेद्यन्तस्य संधौ मिनोत्युभयोर्लोकयोरभिजित्या उपरसंमितं मिनुयात्पितृलोककामस्य रशनासंमितं मनुष्यलोककामस्य चषालसंमितमिन्द्रियकामस्य सर्वेभ्यस्मान्प्रतिष्ठाकामस्य ये त्रयो मध्यमास्तान्त्समान्पशुकामस्यैतान्वै (१) अनु पशव उपतिष्ठन्ते पशुमानेव भवति व्यतिषजेदितरान्प्रजयैवैनं पशुभिर्व्यतिषजति यं कामयेत प्रमायुकः स्यादिति गर्तमितं तस्य मिनुयादुत्तरार्धं वर्षिष्ठमथ ह्रसीयाꣳसमेषा वै गर्तमित्यस्यैवं मिनोति ताजक्प्र मीयते दक्षिणार्धं वर्षिष्ठं मिनुयात्सवर्गकामस्याथ ह्रसीयाꣳसमाक्रमणमेव तत्कृतं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै (२) यदेकस्मिन्यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकाꣳ रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेत्स्त्र्येवास्य जायते यं कामयेत

(पञ्चैकादशिनीकथनम्)

पुमानस्य जायेतेत्यान्तं तस्य प्र वेष्टयेत्पुमानेवास्यै (३) जायतेऽसुरा वै देवान्दक्षिणत उपानयन्तान्देवा उपशयेनैवापानुदन्त तदुपशयस्योपशयत्वं यद्दक्षिणत उपशय उपशये भ्रातृव्यापनुत्त्यै सर्वे वा अन्ये यूपाः पशुमन्तोऽथोपशय एवापशुस्तस्य यजमानः पशुर्यन्न निर्दिशेदार्तिमार्छेद्यजमानोऽसौ ते पशुरिति निर्दिशेद्यं द्विष्याद्यमेव (४) द्वेष्टि तमस्मै पशुं निर्दिशति यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयान्न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यान्प्रजापतिः प्रजा असृजत सोऽन्नाद्येन व्यार्ध्यत स एतामेकादशिनीमपश्यत्तया वै सोऽन्नाद्यमवारुन्ध यद्दश यूपा भवन्ति दशाक्षरा विराडन्नं विराड्विराजवान्नाद्यमवरुन्धे (५) य एकादशः स्तनं एवास्यै स दुह एवैनां तेन वज्रो वा एषा सं मीयते यदेकादशिनी सेश्वरा पुरस्तात्प्रत्यञ्चं यज्ञꣳ संमर्दितोर्यत्पात्नीवतं मिनोति यज्ञस्य प्रयुक्त्यै सयत्वाय (६) ॥

(वै सर्वष्टयै पुमानेवास्य रुमेव रुन्धे विश्शच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः)

प्रजापतिः प्रजा असृजत स रिरिषानोऽमन्यत स एतामेकादशिनीमपश्यत्तया वै स आयुरिन्द्रियं वीर्यमात्मन्नधत्त प्रजा इव खलु वा एष सृजते यो

(पञ्चैकादशिनीकथनम्)

यजते स एतर्हि रिरिचान इव यदेषैकादशिनी भवत्यायुरेव तयेन्द्रियं वीर्यं यजमान आत्मन्धत्ते प्रैवाऽऽग्नेयेन वापयति मिथुनꣳ सारस्वत्या करोति रेतः (१) सौम्यन दधाति प्र जनयति पौष्णेन बार्हस्पत्यो भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयति वैश्वदेवो भवति वैश्वदेव्यो वै प्रजाः प्रजा एवास्मै प्र जनयतीन्द्रियमेवैन्द्रेणाव रुन्धे विंश मारुतेनोजो बलमैन्द्राग्नेन प्रसवाय सावित्रो निर्वरुणत्वाय वारुणो मध्यत ऐन्द्रमा लंभते मध्यत एवेन्द्रियं यजमाने दधाति (२) पुरस्तादैन्द्रस्य वैश्वदेवमा लंभते वैश्वदेवं वा अन्नमन्नमेव पुरस्ताद्धत्ते तस्मात्पुरस्तादन्नमद्यत ऐन्द्रमालभ्य मारुतमा लंभते विड्वै मरुतो विशमेवास्मा अनु बध्नाति यदिं कामयेत योऽवंगतः सोऽप रुध्यतां योऽपरुद्धः सोऽवं गच्छत्वित्यैन्द्रस्य लोके वारुणमा लंभेत वारुणस्य लोक ऐन्द्रम् (३) य एवावंगतः सोऽप रुध्यते योऽपरुद्धः सोऽवं गच्छति यदिं कामयेत प्रजा मुह्येयुरिति पशून्यतिषजेत्प्रजा एव मोहयति यदंभिवाहतोऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयाद्दक्षिणत उदञ्चमा लंभतेऽपवाहतोऽपां प्रजानामवरुणग्राहाय (४) ॥

(रेतो यजमाने दधाति लोक ऐन्द्रꣳ सप्तत्रिꣳशच्च) ।

(सौम्यचरुकथनम्)

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः)।

इन्द्रः पत्न्या मनुमयाजयत्तां पर्याग्निकृतामुद्-सृजत्तया मनुराभ्रोद्यत्पर्याग्निकृतं पात्नीवतमुत्सृजति यामेव मनुर्ऋद्धिमाभ्रोत्तामेव यजमान ऋध्नोवि यज्ञस्य वा अप्रतिष्ठिताद्यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु परा भवति यदाज्येन पात्नीवतꣳ संꣳस्थापयति यज्ञस्य प्रतिष्ठित्यै यज्ञं प्रतितिष्ठन्तं यजमानोऽनु प्रति तिष्ठतीष्टं वपया (१) भवत्यनिष्टं वशयाऽथ पात्नीवतेन प्र चरति तीर्थ एव प्र चरत्यथो एतर्ह्येवास्य यामꣳस्त्वाष्ट्रो भवति त्वष्टा वै रेतसः सिक्तस्य रूपाणि वि करोति तमेव वृषाणं पत्नीष्वपि सृजति सोऽस्मै रूपाणि वि करोति (२) ॥

(वपया षट्त्रिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः)।

घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति यत्सौम्यो भवति यथा मृतायानुस्तरणीं घ्नन्ति तादृगेव तद्यदुत्तरार्धे वा मध्ये वा जुहुयादेवताभ्यः समदं दध्याद्दक्षिणार्धे जुहोत्येषा वै पितॄणां दिक्स्वायामेव दिशि पितृभिरवदयत उन्नेतृभ्यो हरन्ति साम-

(सौम्यचरुकथनम्)

देवत्यो वै सौम्यो यदेव साग्नश्छम्बट्कुर्वन्ति तस्यैव स शान्तिरवं (१) ईक्षन्ते पवित्रं वै सौम्य आत्मानमेव पवयन्ते य आत्मानं न परिपश्येदितासुः स्यादभिदर्दिं कृत्वाऽवेक्षेत तस्मिन्ह्यात्मानं परिपश्यत्यथो आत्मानमेव पवयते यो गतमनाः स्यात्सोऽवेक्षेत यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति मन एवाऽऽत्मन्दाधार (२) न गतमना भवत्यप वै तृतीयसवने यज्ञः क्रामतीजानादनीजानमभ्याभावैष्णव्यर्चा घृतस्य यजत्याग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं च दाधारोपाꣳशु यजति मिथुनत्वाय ब्रह्मवादिनो वदन्ति मित्रो यज्ञस्य स्विष्टं युवते वरुणो दुरिष्टं कं तर्हि यज्ञः कं यजमानो भवतीति यन्मैत्रावरुणीं वशामालभते मित्रेणैव (३) यज्ञस्य स्विष्टꣳ शमयति वरुणेन दुरिष्टं नाऽऽर्तिमार्छति यजमानो यथा वै लाङ्गलेनोर्वरां प्रभिन्दन्त्येवमृक्सामे यज्ञं प्र भिन्तो यन्मैत्रावरुणीं वशामालभते यज्ञायैव प्रभिन्नाय मर्त्यमन्ववास्यति शान्त्यै यातयामानि वा एतस्य छन्दाꣳसि य ईजानश्छन्दसामेष रसो यद्वशा यन्मैत्रावरुणीं वशामालभते छन्दाꣳस्येव पुनरा प्रीणात्यथातयामत्वायाथो छन्दःस्वेव रसं दधाति (४) ॥

(अथ दाधार मित्रेणैव प्रीणाति षट्चं) ।

(अतिग्राह्यग्रहकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः)।

देवा वा इन्द्रियं वीर्यं१ व्यभजन्त ततो यदत्य शिष्यत तदतिग्राह्या अभवन्तदतिग्राह्याणामतिग्राह्यत्वं यदतिग्राह्या गृह्यन्त इन्द्रियमेव तद्वीर्यं यजमान आत्मन्धत्ते तेज आग्नेयेनेन्द्रियमैन्द्रेण ब्रह्मवर्चसꣳ सौर्येणोपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्याश्चके पृष्ठानि यत्पृष्ठ्येन गृह्णीयात्प्राञ्चं यज्ञं पृष्ठानि सꣳ शृणीयुर्यदुक्थ्यें (१) गृह्णीयात्प्रत्यञ्चं यज्ञमतिग्राह्याः सꣳ शृणीयुर्विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सवीर्यत्वाय प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्स प्रियास्तनूरप न्यधत्त तदतिग्राह्या अभवन्वितनुस्तस्य यज्ञ इत्याहुर्यस्यातिग्राह्या न गृह्यन्त इत्यप्यग्निष्टोमे ग्रहीतव्या यज्ञस्य सतनुत्वाय देवता वै सर्वाः सदृशीरासन्ता न व्यावृतमगच्छन्ते देवाः (२) एत एतान्ग्रहानपश्यन्तानगृह्णताऽऽग्नेयमग्निरैन्द्रमिन्द्रः सौर्यꣳ सूर्यस्ततो वै तेऽन्याभिर्देवताभिर्व्यावृतमगच्छन्यस्यैवं विदुष एते ग्रहा गृह्यन्ते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छतीमे लोका ज्योतिष्मन्तः समावद्वीर्याः कार्या इत्याहुराग्नेयेनास्मिँल्लोके ज्योतिर्धत्त ऐन्द्रेणान्तरिक्ष इन्द्रवायू हि सयुजौ सौर्येणा-

(अदाभ्यग्रहकथनम्)

मुष्मिँल्लोके (३) ज्योतिर्धत्ते ज्योतिष्मन्तोऽस्मा इमे लोका भवन्ति समावद्वीर्यानेनान्कुरुत एतान्वै ग्रहान्त्सम्बाविश्ववयसावित्तां ताभ्यामिमे लोकाः परांश्चश्चार्वांश्च प्राभुर्यस्यैवं विदुष एते ग्रहा गृह्यन्ते प्रास्मा इमे लोकाः परांश्चश्चार्वांश्च भान्ति (४) ॥

(उक्तेषु देवा अमुष्मिँल्लोके एकाधिकचत्वारिंशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके नवमोऽनुवाकः) ।

देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा अदाभ्ये छन्दांस्सि सवनानि समस्थापयन्ततो देवा अभवन्पराऽसुरा यस्यैवं विदुषोऽदाभ्यो गृह्यते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति यद्वै देवा असुरानदाभ्येनादभ्नुवन्तददाभ्यस्यादाभ्यत्वं य एवं वेद दभ्नोत्येव भ्रातृव्यं नैनं भ्रातृव्यो दभ्नोति (१) एषा वै प्रजापतेरतिमोक्षिणी नाम तनूर्यददाभ्य उपनद्धस्य गृह्णात्यतिमुक्त्या अतिं पाप्मानं भ्रातृव्यं मुच्यते य एवं वेद भ्रान्ति वा एतत्सोमं यदभिषुण्वन्ति सोमे हन्यमाने यज्ञो हन्यते यज्ञे यजमानो ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते येन जीवन्त्सुवर्गं लोकमेतीति जीवग्रहो

(अंशुग्रहकथनम्)

वा एष यदद्भ्योऽनभिषुतस्य गृह्णाति जीवन्तमेवैनꣳ सुवर्गं लोकं गमयति वि वा एतयज्ञं छिन्दन्ति यददाभ्ये सꣳस्थापयन्त्यꣳशूनपि सृजति यज्ञस्य संतत्यै (२) ॥

(दभ्रोत्यनभिषुतस्य गृह्णात्येकाचत्वारिꣳशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ षष्ठाष्टके षष्ठप्रपाठके दशमोऽनुवाकः)।

देवा वै प्रथमाद्ग्रहानगृह्णत स एतं प्रजापतिरꣳशुमपश्यत्तमगृह्णीत तेन वै स आप्नोत्यस्यैवं विदुषोऽꣳशुर्गृह्यत ऋध्नोत्येव सकृदभिषुतस्य गृह्णाति सकृद्धि स तेनाऽऽप्नोन्मनसा गृह्णाति मन इव हि प्रजापतिः प्रजापतेराप्त्या औदुम्बरेण गृह्णात्यूर्ग्वा उदुम्बर ऊर्जमेवावरुन्धे चतुःस्रक्ति भवति दिक्षु (१) एव प्रतितिष्ठति यो वा अꣳशोरायतनं वेदाऽऽयतनवान्भवति वामदेव्यमिति साम तद्वा अꣳस्याऽऽयतनं मनसा गायमानो गृह्णात्यायतनवानेव भवति यदध्वर्युरꣳशुं गृह्णन्नार्धयेदुभाभ्यां नर्ध्येताध्वर्यवे च यजमानाय च यदर्धयेदुभाभ्यामृध्येतानवानं गृह्णाति सैवास्यर्धिर्हिरण्यमभि व्यनित्यमृतं वै हिरण्यमायुः प्राण आयुषैवामृतमभि धिनोति शतमानं भवति

(षोडशिग्रहकथनम्)

शतायुः पुरुष शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति (२) ॥

(दिक्स्वनिर्वि विंशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके षष्ठप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ षष्ठाष्टके षष्ठप्रपाठक एकादशोऽनुवाकः) ।

प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्स रिरिचानोऽमन्यत स यज्ञानाꣳ षोडशधेन्द्रियं वीर्यमात्मानमभि समक्षिदत्तत्षोडश्यभवन्न वै षोडशी नाम यज्ञोऽस्ति यद्वाव षोडशꣳ स्तोत्रꣳ षोडशꣳ शस्त्रं तेन षोडशी तत्षोडशिनः षोडशित्वं यत्षोडशी गृह्यत इन्द्रियमेव तद्वीर्यं यजमान आत्मन्धत्ते देवेभ्यो वै सुवर्गो लोकः (१) न प्राभवꣳ एतꣳ षोडशिनमपश्यन्तमगृह्णत ततो वै तेभ्यः सुवर्गो लोकः प्राभवद्यत्षोडशी गृह्यते सुवर्गस्य लोकस्याभिजित्या इन्द्रो वै देवानामनुजावर आसीत्स प्रजापतिमुपाधावत्तस्मा एतꣳ षोडशिनं प्रायच्छत्तमगृह्णीत ततो वै सोऽग्रे देवतानां पर्येयस्यैवं विदुषः षोडशी गृह्यते (२) अग्रमेव समानानां पर्येति प्रातःसवने गृह्णाति वज्रो वै षोडशी वज्रः प्रातःसवनꣳ स्वादेवैनं योनेर्निगृह्णाति सवनेसवनेऽभि गृह्णाति सवनात्सवनादेवैनं प्र जनयति तृतीयसवने पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी

(षोडशिग्रहकथनम्)

पशवस्तृतीयसवनं वज्रेणैवास्मै तृतीयसवनात्पशून् नव रुन्धे नोक्थ्ये गृह्णीयात्प्रजा वै पशव उक्थानि यदुक्थ्ये (३) गृह्णीयात्प्रजां पशूनस्य निर्दहेदतिरात्रे पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी वज्रेणैवास्मै पशूनवरुध्य रात्रिंयोपरिष्टाच्छमयत्यप्यग्निष्टोमे राजन्यस्य गृह्णीयाद्व्यावृत्कामो हि राजन्यो यजते साह्न एवास्मै वज्रं गृह्णाति स एनं वज्रो भूत्वा इन्धे निर्वा दहत्येकविꣳशꣳ स्तोत्रं भवति प्रतिष्ठित्यै हरिवच्छस्यत इन्द्रस्य प्रियं धाम (४) उपाऽऽप्नोति कनीयाꣳसि वै देवेषु छन्दाꣳस्यासञ्ज्यायाꣳस्यसुरेषु ते देवाः कनीयसा छन्दसा ज्यायश्छन्दोऽभि व्यशꣳसन्ततो वै तेऽसुराणां लोकमवृञ्जत यत्कनीयसा छन्दसा ज्यायश्छन्दोऽभि विशꣳसति भ्रातव्यस्यैव तल्लोकं वृङ्क्ते षडक्षराण्यति रेचयन्ति षड्वा ऋतव ऋतूनेव प्रीणाति चत्वारि पूर्वाण्यव कल्पयन्ति (५) चतुष्पद एव पशूनव रुन्धे द्वे उत्तरे द्विपद एवाव रुन्धेऽनुष्टुभमभि सं पादयन्ति वाग्वा अनुष्टुप्तस्मात्प्राणाना वागुत्तमा समयाविषिवे सूर्ये षोडशिनः स्तोत्रमुपाकरोत्येतस्मिन्वै लोक इन्द्रो वृत्रमहन्त्साक्षादेव वज्रं भ्रातृव्याय प्रहरत्यरुणपिशङ्गोऽश्वो दक्षिणेतद्वै वज्रस्य रूपꣳ समृद्ध्यै (६)॥

(षोडशिग्रहकथनम्)

(लोको विदुषः षोडशी गूहते यदुक्थ्ये धाम कल्पयन्ति

सप्तचत्वारिंशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके

षष्ठप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

सुवर्गाय वै दक्षिणानि सन्नियजूंष्यवभृथयजूंषि स्फ्येन वेदिं प्रजापतिरिन्द्रो भूत्वा देवा वा इन्द्रियं देवा वा अर्द्धाम्ये देवा वै प्रवाहुकप्रजापतिः स रिरिचानः स यज्ञानां षोडशावेकादश ॥ ११ ॥

सुवर्गाय यजति प्रजाः सौम्येन गृहपतिमाग्नेयं गृहपतिमात्मजां पशून्त्सचत्वारिंशत् ॥ ४३ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां षष्ठाष्टके

षष्ठः प्रपाठकः ॥ ६ ॥

मूलक्रमेण षष्ठाष्टके—प्र० ६ अ० ६६

भाष्यक्रमेण षष्ठकाण्डे—प्र० ६ अ० ६६

मूलक्रमेणाऽऽदितः समष्टयङ्काः—अष्ट० ६ प्र० ३९ अ० ५३४

भाष्यक्रमेणाऽऽदितः समष्टयङ्काः—का० ६ प्र० ३९ अ० ५२९

समाप्तोऽयं कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः

षष्ठः काण्डः ।

अथ सभाष्यकृष्णयजुर्वेदीयतैत्तिरीयसंहितायां

सप्तमं काण्डम् ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
चयनब्राह्मणं काण्डे पञ्चमे स्फुटमीरितम् ।
षष्ठे तु काण्डे सोमस्य मन्त्राणां ब्राह्मणं क्रमात् ॥ २ ॥
उक्तं मन्त्रास्त्वाद्यकाण्डे द्वितीयादिप्रपाठकैः ।
त्रिभिरुक्ता ब्राह्मणं च व्याख्यातं तत्र तैः सह ॥ ३ ॥
षट्स्युः प्रपाठकाः षष्ठे काण्डे प्रत्येकमेषु च ।
एकादशानुवाकाः स्युस्तदर्थान्वक्ष्यनुक्रमात् ॥ ४ ॥
प्राग्वंशं क्षुरकर्मादिसंस्कृतः प्रविशेदिति ।
आद्ये प्रोक्तं द्वितीये तु दीक्षाहुतय ईरिताः ॥ ५ ॥
कृष्णाजिनेन वस्त्रेण दीक्षा मेखलया तथा ।
कुर्यात्तृतीये तत्प्रोक्तं तथा कृष्णविषाणया ॥ ६ ॥
चतुर्थे दण्डमादाय मुष्टीकरणवाग्यमौ ।
कृत्वाऽसौ दीक्षितो भूत्वा नियमाननु तिष्ठति ॥ ७ ॥
पञ्चमे प्रायणीया स्यात्षष्ठे त्वरुणया क्रयः ।
सप्तमे तत्प्रकारः स्यादष्टमे पदसंग्रहः ॥ ८ ॥
सोमोन्मानं तु नवमे दशमेऽन्यैश्च तत्क्रयः ।
एकादशे क्रीतसोमं शकटेन नयेदिति ॥ ९ ॥
प्रपाठकेऽस्मिन्प्रथमेऽनुवाकार्थाः समीरिताः ।
प्रपाठके द्वितीयेऽनुवाकार्थान्क्रमादनुवे ॥ १० ॥
आतिथ्येष्टिरिहाऽऽद्ये स्यात्तानूनप्त्रं द्वितीयके ।
तथाऽवान्तरदीक्षा च तृतीये तूपसद्भवेत् ॥ ११ ॥
वेदिरुक्ता चतुर्थेऽथ पञ्चमे व्रतनिर्णयः ।
षष्ठे काम्या यागभूमिः सप्तमे वेदिरुत्तरा ॥ १२ ॥

व्याधारणं त्वष्टमे स्याद्धविर्धानप्रवनन्तरे ।
दशमे तु सदः प्रोक्तं प्रोक्ता उपरवाः परे ॥ १३ ॥
प्रपाठकेऽनुवाकार्था द्वितीयेऽस्मिन्नुदीरिताः ।
तृतीयस्याऽऽदिमे सर्वे चिष्णियाः स्युर्द्वितीयके ॥ १४ ॥
अग्नीषोमप्रणयनं तृतीये यूपखण्डनम् ।
चतुर्थे स्थापयेद्यूपं वह्निं मथ्नाति पञ्चमे ॥ १५ ॥
नियुनक्ति पशुं षष्ठे सप्तमेघेन्यस्तु सप्तमे ।
आवारौ च प्रयाजाश्च ह्यष्टमे हिंसनं पशोः ॥ १६ ॥
नवमे स्याद्वपाहोमोऽवदानानि त्वनन्तरे ।
एकादशे त्वनूयाजास्तृतीयोऽयं प्रपाठकः ॥ १७ ॥
गृह्यागश्चतुर्थाद्ये वसतीवर्य ईरिताः ।
द्वितीयेभ्य तृतीये सोमोपावहरणं श्रुतम् ॥ १८ ॥
सोमोन्मानं चतुर्थे स्यात्पञ्चमादिषु सप्तसु ।
उपांशुप्रमुखा आग्रयणान्ता हि ग्रहाः श्रुताः ॥ १९ ॥
उपांशुरन्तर्यामश्च तृतीयश्चैन्द्रवायवः ।
मैत्रावरुणनामा स्यादाश्विनाख्यग्रहस्तथा ॥ २० ॥
शुक्रामन्थिग्रहावाग्रयणस्तुर्यः प्रपाठकः ।
उक्थ्यग्रहः पञ्चमाद्ये द्वितीये ध्रुव ईरितः ॥ २१ ॥
ऋतुग्रहास्तृतीये स्युरैन्द्राग्रस्तु चतुर्थके ।
मरुत्वतीया माहेन्द्रश्चेत्येते पञ्चमे श्रुताः ॥ २२ ॥
स्यादादित्यग्रहः षष्ठे सावित्रः सप्तमे तथा ।
वैश्वदेवोऽथाष्टमे हि श्रुतः पात्नीवतो ग्रहः ॥ २३ ॥
हारियोजनसंज्ञस्तु नवमे ग्रह ईरितः ।
क्षये त्वाग्रयणादीनां दशमे स्यात्पुनर्ग्रहः ॥ २४ ॥
*सोमपात्रस्तुतिस्त्वन्त्ये पञ्चमोऽयं प्रपाठकः ।
षष्ठाद्ये दक्षिणाहोमः समिष्टयजुरुत्तरे ॥ २५ ॥

* एतदर्धस्थाने ख. च. पुस्तकयोः 'सवनीयपुरोडाशविधिरेकादशे स्थितः । प्रपाठके पञ्चमेऽनुवाकार्था एवमीरिताः' एतादृशः श्लोको वर्तते ।

१ क. °णाद्यं स°।

(ज्योतिष्टोमतदङ्गसंस्थारूपाग्निष्टोमयोर्विधानम्)

तृतीयेऽह्नि भृथस्तुर्ये यूपैकादशिनी स्मृता ।
पश्चैकादशिनी तूर्ध्वे षष्ठे पात्नीवतः पशुः ॥ २६ ॥
सौम्यश्चरुः सप्तमे स्यादतिग्राह्यास्तथाऽष्टमे ।
अदाभ्यो नवमे तद्वदंशुस्तु दशमे श्रुतः ॥ २७ ॥
षोडश्येकादशे प्रोक्त एवं षष्ठः समापितः ।
एकाहाहीनसत्राणि सोमभेदा इमे त्रयः ॥ २८ ॥
वर्ण्यन्ते सप्तमे काण्डे मन्त्राः केऽप्यश्वमेधगाः ।
ज्योतिष्टोमः सोमयागप्रकृतिः स तु सप्तधा ॥ २९ ॥
अग्निष्टोमो ज्योतिर्भेदैर्मूलप्रकृतिरादिमः ।
स्तोमा ज्योतींषि यस्यासौ ज्योतिष्टोमः स ईरितः ॥ ३० ॥
त्रिवृत्पञ्चदशः सप्तदशः स्तोमास्त्रयो मताः ।
तथैकविंश एतानि ज्योतींषीत्यभ्यधाच्छ्रुतिः ॥ ३१ ॥

सोऽयमेतादृशो ज्योतिष्टोम आदौ विधीयते ।

(इति भाष्यकारोपोद्घातः) ।

(अथ कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमोऽष्टकः) ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

हरिः ॐ ।

प्रजननं ज्योतिरग्निर्देवतानां ज्योतिर्विराट्छन्दसां ज्योतिर्विराड्वाचोऽग्नौ सं तिष्ठते विराजमभि सं पद्यते तस्मात्तज्ज्योतिरुच्यते द्वौ स्तोमौ प्रातःसवनं वहतो यथा प्राणश्चापानश्च द्वौ माध्यंदिनꣳ सवनं यथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं यथा वाक्च प्रतिष्ठा च पुरुषसंमितो वा एष यज्ञोऽस्थूरिः (१) यं कामं कामयते तमेतेनाभ्यश्नुते सर्वꣳ ह्यस्थूरिणाऽभ्यश्नुतेऽग्निष्टोमेन वै

प्रजापतिः प्रजा असृजत ता अग्निष्टोमेनैव पर्यगृह्णात्तासां परिगृहीतामश्वतरोऽत्यप्रवत तस्यानुहाय रेत आऽदत्त तदूर्दभे न्यमार्ट्तस्माद्वर्दभो द्विरेता अथों आहुर्वडबायां न्यमार्डिति तस्माद्वडबा द्विरेता अथों आहुरोषधीषु (२) न्यमार्डिति तस्मादोषधयोऽनभ्यक्ता रेभन्त्यथों आहुः प्रजासु न्यमार्डिति तस्मात्रयो जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि तस्माद्वर्हिष्यनवक्लृप्तः सर्ववेदसे वा सहस्रे वाऽवक्लृप्तोऽति ह्यप्रवत य एवं विद्वानग्निष्टोमेन यजते प्राजाताः प्रजा जनयति परि प्रजाता गृह्णाति तस्मादाहुर्ज्येष्ठयज्ञ इति (३ प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाग्रेऽयजत प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथंतरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्या मुखतो ह्यसृज्यन्तोरसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवताऽन्वसृज्यत त्रिष्टुप्छन्दो बृहत् (४) साम राजन्यो मनुष्याणामविः पशूनां तस्मात्ते वीर्यावन्तो वीर्यादध्यसृज्यन्त मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपꣳ साम वैश्यो मनुष्याणां गावः पशूनां तस्मात्ते आद्या अन्नधानादध्यसृज्यन्त

(ज्योतिष्टोमतदायसंस्थारूपाग्निष्टोमयोर्विधानम्)

तस्माद्भूयाꣳसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त पञ्च एकविꣳशं निरमिमीत वर्मनुष्टुप्छन्दः (५) अन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनां तस्माच्चौ भूतसंक्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात्पादावुप जीवतः पञ्च ह्यसृज्येतां प्राणा वै त्रिवृदर्धमासाः पञ्चदशाः प्रजापतिः सप्तदशस्त्वय इमे लोका असावादित्य एकविꣳश एतस्मिन्वा एते श्रिता एतस्मिन्प्रतिष्ठिता य एवं वेदैतस्मिन्नेव श्रयत एतस्मिन्प्रतितिष्ठति (६) ॥

(अस्थूरिरोषधीषु ज्येष्ठयज्ञ इति बृहदनुष्टुप्छन्दः प्रतिष्ठिता नवं च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः)।

तमेवं ज्योतिष्टोमं विधातुं दृष्टान्तत्रयेण ज्योतिष्ट्वं तावद्दर्शयति—

प्रजननमिति। मनुष्याणां मध्ये प्रजोत्पादनं ज्योतिः। अपत्यरहितास्तु म्लानमुखास्तमःसदृशा भवन्ति। देवतानां मध्ये ज्योतिराग्निः। अन्यासां देवतानां गृहमध्ये यथा दीपापेक्षा नैवमग्नेरन्यापेक्षाऽस्ति। छन्दसां मध्ये विराट्छन्दो ज्योतिः। दीप्तिवाचकेन राजतिधातुना व्यवहियमाणत्वात्। तदेवत्रिविधमपि लोकप्रसिद्धं ज्योतिः सोमयागे संपादयितुं शक्यते। प्रजोत्पत्तिसाधनरूपत्वं तावद्दृश्यते—" अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत " इति। अग्निरूपत्वं विराड्रूपत्वं चात्रैव संपाद्यते। या वाचो विराट्त्वदुपलक्षिता दश-

---

१ ख. घ. च. °वनत्वं ज्यो°।

संख्या दशाक्षरा विराडिति श्रुतेः, सेयं संख्याऽग्नौ समाप्यते। तथा हि—प्रातःसवने बहिष्पवमानाख्यस्तोत्रस्य त्रिवृत्स्तोमः। तत्र त्रिषु सूक्तेष्वेकैकस्मिंस्तिस्र ऋच इत्येवं नव स्तोत्रियाः। तथा तस्मिन्नेव सवने चतुर्ष्वाज्यस्तोत्रेषु पञ्चदशस्तोमे सति षष्टिः स्तोत्रीयाः संपद्यन्ते। तथा माध्यंदिनसवने माध्यंदिनपवमानाख्यस्तोत्रस्य पञ्चदशस्तोमे सति पञ्चदश स्तोत्रीयाः संपद्यन्ते। तथाऽस्मिन्नेव सवने चतुर्षु पृष्ठस्तोत्रेषु सप्तदशस्तोमे सत्यष्टषष्टिः स्तोत्रीयाः संपद्यन्ते। तथा तृतीयसवन आर्भवपवमानाख्यस्तोत्रस्य सप्तदशस्तोत्रे सति सप्तदश स्तोत्रीयाः संपद्यन्ते। यद्यपि माध्यंदिनपवमानार्भवपवमानयोः सूक्तभेदादृचोऽत्यन्तं बहवः सन्ति तथाऽपि स्तोत्रमतस्तोमपर्युक्त्या गणनेयमित्यविरोधः। तथा तस्मिन्नेव सवने यज्ञायज्ञियस्तोत्रस्यैकविंशस्तोमे सत्येकविंशतिसंख्याकाः स्तोत्रीयाः संपद्यन्ते। तदेवं प्रातःसवन एकोनसप्ततिर्माध्यंदिनसवने त्र्यशीतिस्तृतीयसवनेऽष्टात्रिंशदिति मिलित्वा नवत्यधिकाः शतसंख्याकाः स्तोत्रीया भवन्ति। ताश्च दशभिर्विभक्ताः सत्य एकोनविंशतिविराड्रूपाः संपद्यन्ते। सेयं संपद्यमाना स्तोत्रीयाख्या वाचः संबन्धिनी विराडुपलक्षिता दशसंख्याऽग्नौ समाप्यते। अन्तिमस्य यज्ञायज्ञियस्तोत्रस्याऽऽग्नेयत्वात्। अग्निर्हि तत्र प्रतिपाद्यते। यज्ञायज्ञा वो अग्नय इत्यान्नानात्। अतोऽग्निरूपत्वं विराड्रूपत्वं च सोमयागस्य सिद्धम्। यस्मादयं सोमयागो विराड्रूपमभिसंपद्यते तस्माद्विराड्रूपत्वात्प्रजोत्पत्तिहेतुत्वाच्च सोमयागस्वरूपं ज्योतिरित्युच्यते।

तदेवं विधेयस्य सोमयागस्य संबन्धिनि ज्योतिष्टोमनाम्नि ज्योतिरित्ययमंशः प्रतिपादितः। अथावशिष्टमंशं प्रतिपादयति—

द्वाविति। तत्र त्रिवृत्स्तोमो बाहिष्पवमानाख्यं स्तोमं वहति निष्पादयति। पञ्चदशस्तोमश्चत्वार्याज्यस्तोत्राणि वहति। एवं द्वौ स्तोमौ प्रातःसवनं निर्वहतः। यथा लोके पुरुषस्य प्राणापानौ जीवनं निर्वहतस्तद्वत्। ततः पञ्चदशस्तोमो माध्यंदिनं पवमानस्तोत्रं वहति। सप्तदशस्तोमश्चत्वारि पृष्ठस्तोत्राणि वहति। एवं द्वौस्तोमौ माध्यंदिनसवनं वहतः। यथा पुरुषस्य चक्षुःश्रोत्रे रूपदर्शनशब्दश्रवणव्यवहारं वहतस्तद्वत्। सप्तदशस्तोम आर्भवपवमानं वहति। एकविंशस्तोमो यज्ञायज्ञियस्तोत्रं वहति। एवं द्वौ स्तोमौ तृतीयसवनं वहतः। यथा पुरुषस्य वागिन्द्रियं पादेन्द्रियं चाभिवदनगमनव्यवहारं वहतस्तद्वत्। अति

(ज्योतिष्टोमतदाद्यसंस्थारूपाग्निष्टोमयोर्विधानम्)

तिष्ठन्ति मार्गे यया पादेन्द्रियमवृच्या सेयं प्रतिष्ठा । तदेवं स्तोमैर्निष्पन्नोऽयं सोमयागः पुरुषसदृशो नतु स्थूरिः, केनाप्यङ्गेन न्यूनः स्थूरिरित्युच्यते, नत्वयं न्यूनः, प्राणापानादिकृत्स्नपुरुषावयवसाम्यरूप प्रतिपादितत्वात् । एवं स्तोमरूपत्वे सिद्धे सति ज्योतीरूपाः स्तोमा अग्नेति व्युत्पत्त्या ज्योतिष्टोम इत्युच्यते । एतदेवाभिप्रेत्यान्यत्राऽऽम्नातम्—" तदाहुः । कतमानि वाव तानि ज्योतींषि । य एतस्य स्तोमा इति त्रिवृत्पञ्चदशः सप्तदश एकविंशः। एतानि वाव तानि ज्योतींषि । य एतस्य स्तोमाः" इति । स्तोमानां च स्वरूपविशेषः प्रथमकाण्डे राजसूयप्रकरणे समिधमातिष्ठत्यनुवाके सामब्राह्मणोदाहरणेन विस्पष्टः प्रतिपादितः ।

तदेवं ज्योतिष्टोमनामव्युत्पादनमुखेन विधेयार्थप्रशंसा संपादिता । इदानीं तद्विधिमुन्नयति—

यमिति। एतेन ज्योतिष्टोमेन सर्वकामानां(णां)प्राप्तुं शक्यत्वादिमं ज्योतिष्टोमं कुर्यादित्याभिप्रायः । यस्माल्लोकेऽप्यस्थूरिणा सर्वावयवसंपूर्णेन साधनेन तत्फलं सर्वमप्यश्नुते तस्मादत्रापि स्तोमसंपूर्णेनानेन सर्वकामप्राप्तियुक्ता ।

इत्थं ज्योतिष्टोमं सर्वसोमयागप्रकृतिभूतं विधाय तदीयासु सप्तसंस्थासु मध्ये प्रथमसंस्थारूपमग्निष्टोमं विधातुं प्रस्तौति—

अग्निष्टोमेनेति । पुरा किलसृक्षुः प्रजापतिरग्निष्टोमेन साधनेन प्रजाः सृष्ट्वा तेनैव स्वाधीनतया परिगृहीतवान् । तासां परिगृहीतानां प्रजानां मध्ये गर्दभाश्वाभ्यामुत्पादितः संकीर्णजातिरश्वतरः । सोऽयं प्रजापतिपरिग्रहमुल्लङ्घ्यात्यन्तदूरं गतः । स च प्रजापतिस्तस्याश्वस्य पृष्ठतो गत्वा तदीयं शरीरगतं तारभूतं रेत आदाय गर्दभशरीरे न्यमार्ट् नितरां मृष्टवान् । अत एत गर्दभो द्विविधरेतोयुक्तः । गर्दभजातेरश्वतरजातेश्चोत्पादनेन द्विविधत्वम् । अपि चान्ये केचिदभिज्ञा एवमाहुः—वडबायामश्वयोषिति नितरां मृष्टवानिति । तस्मादियं वडबा रेतोद्वययुक्ता । साऽप्यश्वजातिमश्वतरजातिं चोत्पादयति । अपि चान्येऽभिज्ञा एवमाहुः—ओषधीषु नितरां मृष्टवानिति । अत एवौषधयो मनुष्याणामिव घृततैलाभ्यङ्गाभावेऽपि तारधिक्येन वर्धन्ते स्निग्धवद्दृश्यन्त इत्यर्थः । अपि

१ घ. ङ. च. °के सोम° ।

(ज्योतिष्टोमतदाद्यसंस्थारूपाग्निष्टोमयोर्विधानम्)

चान्येऽभिज्ञा एवमाहुः—प्रजासु मनुष्यजातिषु नितरां मृष्टवानिति । अत एव क्वचिदेकस्मिन्गर्भे शरीरद्वयमुत्पद्यते । यस्मादयमश्वतरः प्रजापत्यपहृतरेतस्कस्तस्माच्चपुंसकवदयं प्रजामुत्पादयितुमसमर्थः । यस्माच्चायं निःसारस्तस्मादेव यज्ञेऽप्ययोग्यः । यस्तु यज्ञविशेषः सर्वस्वदक्षिणाकः सहस्रदक्षिणाको वा तदर्थं नियमेन दान्ययोग्यः । रेतोराहित्येऽप्यतिलङ्घ्य गन्तुं समर्थत्वादतिलङ्घितप्राक्तनदक्षिणाके यज्ञे योग्यो भवति । 'अश्वतरं साहस्रे सर्ववेदसे च ददाति' इति सूत्रकारवचनात् ।

इदानीं विधत्ते—

य एवमिति । अग्निष्टोमयाजी पूर्वमनुत्पन्नाः प्रजा उत्पादयितुमुत्पन्नाश्च स्वाधीनत्वेन परिग्रहीतुं समर्थो भवति । यस्मात्सर्वेषां देवानां मध्ये ज्येष्ठः प्रजापतिः सृष्टिसाधनत्वेनाग्र एतेनायजत तस्माज्ज्येष्ठेनेष्टत्वात्प्रथममिष्टत्वाच्चाग्निष्टोमो ज्येष्ठयज्ञः सर्वेषामुक्थ्यादीनां मूलप्रकृतिभूत इत्यर्थः । अग्निविषयेण यज्ञायज्ञा वो अग्नय इति मन्त्रेण संपाद्यमानो योऽयमेकविंशः स्तोमस्तेन समाप्यमानत्वादयमग्निष्टोम इत्युच्यते ।

तस्य च प्रजोत्पादनसाधनत्वं यत्पूर्वमुक्तम्—" अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत " इति, तदिदं मुखादिस्थानचतुष्टयेन प्रपञ्चयितुं मुखजन्यां सृष्टिं दर्शयति—

प्रजापतिरिति । सिसृक्षुः प्रजापतिस्वत्साधनत्वेनाग्निष्टोममनुष्ठाय तत्सामर्थ्येन सत्यसंकल्पः सन्स्वकीयान्मुखात्त्रिवृदादय उत्पद्यन्तामिति संकल्प्य तथैव निर्मितः तन्मादौ त्रिवृत्स्तोमः सृष्टः । तमनु देवतानां मध्येऽग्निः । तमप्यनु च्छन्दसां मध्ये गायत्री सृष्टा । तामप्यनु साम्नां मध्ये रथंतरं सृष्टम् । तदप्यनु मनुष्याणां मध्ये ब्राह्मणः सृष्टः । तमप्यनु पशूनां मध्येऽजः सृष्टः । यस्मादेते मुखतः सृष्टास्तस्मान्मुख्या वक्ष्यमाणेभ्यः श्रेष्ठाः ।

अथ द्वितीयस्थानादुत्पत्तिं दर्शयति—

उरसो बाहुभ्यामिति । पूर्ववदुच्चारयेयम् । वीर्ययुक्ताद्बाहुदेशादुत्पन्नत्वात्तेषामपि सामर्थ्याधिक्यम् ।

अथ तृतीयस्थानादुत्पत्तिं दर्शयति—

मध्यत इति । मध्यत उदरप्रदेशात् । यस्मादन्नाधारादुदरादसृज्यन्त तस्मा-

---

१ ख. घ. च. °तुष्यादिजा° । २ ख. च. ङ. च. उत्पाद्य° ।

(ज्योतिष्टोमउदाद्यसंस्थारूपाग्निष्टोमयोर्विधानम्)

दाद्या भोग्याः। वैश्या वाणिज्येन धनसंपादकत्वाद्भोग्याः। गावश्च क्षीरदिसंपादनेन भोग्याः। यस्मादतिबहून्विश्वान्देवानन्वेते वैश्याः सृष्टास्तस्माद्वाणिज्यकर्तारो लोके भूयांसः।

अथ चतुर्थस्थानादुत्पत्तिं दर्शयति—

पत्त एकविंशमिति। पत्तः पादतः। भूतानां पूर्वोत्पन्नानां ब्राह्मणादीनां संक्रामः सम्यगाक्रमणं तदधीनत्वेनावस्थानमित्यर्थः। सोऽयं भूतसंक्रामो ययोरश्वशूद्रयोस्तावुभौ भूतसंक्रामिणौ। शूद्राणां वर्णत्रयपरिचर्यामुख्यत्वेन तदधीनत्वम्। अश्वानां च वहनेन तदधीनत्वम्। अत्र पूर्वस्थानेभ्य इव पादतो न काचिद्देवता सृष्टा, तस्माद्देवतामनु सृज्यत्वाभावाच्छूद्रो यज्ञे प्रवर्तितुं न योग्यः। यस्मादश्वशूद्रौ पादत उत्पन्नौ तस्मात्पादाविव तयोर्जीवनसाधनम्। शूद्रो हि ब्राह्मणाद्याज्ञया पद्भ्यां यत्र क्वापि गमनागमने कुर्वञ्जीवति। अश्वश्च ब्राह्मणादिवाहिपादैर्यत्र क्वापि गच्छन्खाद्यं लभते।

एवं सृष्टिसाधनमग्निष्टोमं प्रशंसितुं सृष्टिं प्रपञ्च्य तत्र प्रकृतोपयुक्तान्स्तोमान्विशेषतः प्रशंसति—

प्राणा इति। बहिष्पवमानस्तोत्रे सूक्तानां त्रित्वादेकैकस्मिन्सूक्ते भक्तीनां त्रित्वाच्च तदीयस्य स्तोमस्य त्रिवृत्त्वम्। प्राणापानव्यानानां चोर्ध्वाधोमध्यवर्तिनां त्रित्वात्तत्साम्यम्। अर्धमासगतानां रात्रीणां संख्यया पञ्चदशस्तोमसाम्यम्। प्रजापतिरूपाणामाश्रावयेत्यादीनामक्षराणां संख्यया सप्तदशस्तोमसाम्यम्। आदित्यस्य संख्यैकविंशस्तोमसाम्यं वक्तुं त्रय इमे लोका इत्यनेन ब्राह्मणान्तरं प्रत्यभिज्ञाप्यते। तच्च ब्राह्मणान्तरमेवमाम्नातम्—" द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः " इति। एतस्मिन्नेकविंशस्तोमे पूर्वोक्तास्त्रिवृदादय आश्रिताः। अधिकसंख्यायामल्पसंख्यान्तर्भावात्। किंचैतस्मिन्नेव स्तोमाः प्रतिष्ठिताः समाप्ताः नह्येकविंशादूर्ध्वमग्निष्टोमे कश्चिदधिकः स्तोमो विद्यते। य एवमेतस्य महिमानं वेद स एतस्मिन्नाश्रितः प्रतिष्ठितो भवति। अग्निष्टोममनुष्ठातुं फलं प्राप्तुं च योग्यो भवतीत्यर्थः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

---

१ ख. घ. ङ. च. °श्वादीनां

(स्तोमानां संभूयकारित्वकथनम्)

(अथ सप्तमाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः)।

प्रातःसवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति सप्तदशेन प्राजापत्येन प्रजननेनैकविꣳशाय ज्योतिर्दधदेति स्तोम एव तत्स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्र णयति यावन्तो वै स्तोमास्तावन्तः कामास्तावन्तो लोकास्तावन्ति ज्योतीꣳष्येतावत एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीꣳष्यव रुन्धे (१) ॥

(तावन्तो लोकास्त्रयोदश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके सोमयागानामाद्यो ज्योतिष्टोमस्तदीयसप्तसंस्थानामाद्यसंस्थारूपोऽग्निष्टोमश्चेत्युक्तम् विहितम् ।

अथ तत्र स्तोमानां मुख्यत्वं दर्शयितुं द्वितीयेऽनुवाके स्तोमानां संभूयकारित्वं तावदादौ दर्शयति—

प्रातःसवन इति । आदौ प्रजापतिरग्निष्टोममनुतिष्ठन्प्रातःसवनकाल उपास्मै गायता नर * इत्येतस्मिन्मन्त्रगतेन गायत्रेण च्छन्दसा युक्तस्तावता परितोषं प्राप्य त्रिवृत्स्तोमसिद्ध्यर्थं ज्योतिर्दधत्तद्विषयप्रसारितां मनोवृत्तिं धारयन्नेति प्रवर्तते, त्रिवृत्स्तोम इत्थं प्रयोक्तव्य इति विचारयन्नेवाऽऽस्त इत्यर्थः । स च स्तोमो ब्रह्मवर्चसप्रदत्वाच्चक्षूपः । तेन ब्रह्मवर्चसरूपेण त्रिवृत्स्तोमेन तुष्टोऽप्यपरितुष्टः पञ्च-

* सर्वपुस्तकेषु ' इत्येतस्मिन्मन्त्रगतेन ' इति वर्तते तदयुक्तमिति प्रतिभाति ।

१ क. °नुक्तिवाक्यम् ।

(अतिरात्रविधुन्नयनम्)

दशस्तोमाय मनोवृत्तिं धारयन्नास्ते। स च पञ्चदशः शारीरबलस्येन्द्रियसामर्थ्यस्य च हेतुत्वात्तदुभयात्मकः। तेनापि युक्तः पुनः सप्तदशस्तोमानुष्ठानाय मनोवृत्तिं धारयन्प्रवर्तते। स च स्तोमः संख्ययाऽऽश्रावयेत्याद्यक्षरसाम्यात्तदक्षरात्मकप्रजापतिसंबन्धि(न्धी) प्रजोत्पत्तिहेतुश्च। तादृशेन स्तोमेन युक्तोऽपि पुनरेकविंशस्तोमानुष्ठानाय मनोवृत्तिं धारयन्प्रवर्तते। तदेवं स्तोम एव पूर्वोक्तस्तोमरूप एव सन्नुत्तरस्तोमाय तज्ज्योतिर्मनोवृत्तिं धारयन्प्रवर्तते। अपि च तथा प्रवृत्तः सन्नुत्तरस्तोममभिमुरूपेण प्रणयति।

इत्थं स्तोमानां संभूयकारित्वं दर्शितम्। अथ स्तोमान्प्रशंसति—

यावन्त इति। स्तोमा यावन्तो यावत्संख्याकास्तावन्त एव कामाः काम्यानि फलानि तैर्निष्पाद्यानि। तच्च पूर्वमेव सूचितम्। त्रिवृता ब्रह्मवर्चसं निष्पद्यते। पञ्चदशेनौजो वीर्यं च। सप्तदशेन प्रजास्वामित्वं प्रजोत्पादकत्वं च। तत्रयमत्रैव सूचितम्। एकविंशेन प्रतिष्ठोत्पाद्यते। तच्च पूर्वानुवाक एतस्मिन्प्रतितिष्ठतीति सूचितम्। एवं सति यावन्तः स्तोमास्तावन्तः कामाः संख्याः। तत्फलभोगाधारभूता देहा लोकास्तेऽपि तावन्त एव। तेषु देहेषु तत्फलानुभवा एव ज्योतींषि। तान्यपि तावन्त्येव।

इत्थं स्तोमान्प्रशस्य योऽग्निष्टोमेन यजते तस्य फलं प्रशंसति—**एतावत इति**।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ सप्तमाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः)।

ब्रह्मवादिनो वदन्ति सत्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति यस्य त्रिवृतमन्तर्यन्ति प्राणास्तस्यार्यन्ति प्राणेषु मेऽर्य-सदिति खलु वै यज्ञेन यजमानो यजते यस्य पञ्चदशमन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽर्य-

१ ख. घ. च. वृत्तिरूपं धा°। २ ख. निष्पाद्य°। ३ ख. च. °कत्वम्। एत°। ४ ङ. घ. ङ. च. °भव ए°।

सदिति खलु वै यज्ञेन यजमानो यजते यस्य सप्तदशमन्तर्यन्ति (१) प्रजां तस्यान्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्यैकविꣳशमन्तर्यन्ति प्रतिष्ठां तस्यान्तर्यन्ति प्रतिष्ठायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य त्रिणवमन्तर्यन्त्यृतूꣳश्च तस्य नक्षत्रियां च विराजमन्तर्यन्त्यृतुषु मेऽप्यसन्नक्षत्रियायां च विराजीति (२) खलु वै यज्ञेन यजमानो यजते यस्य त्रयस्त्रिꣳशमन्तर्यन्ति देवतास्तस्यान्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यो वै स्तोमानामवमं परमतां गच्छन्तं वेद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत्परमो य एवं वेद परमतामेव गच्छति (३) ॥

(सप्तदशमन्तर्यन्ति विराजीति चतुश्चत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः) ।

प्रथमानुवाकविहिते ज्योतिष्टोमे पुरुषं परोचयितुं द्वितीयेऽनुवाके स्तोमप्रशंसा कृता । अग्निष्टोमस्य तु प्राथम्यं "तस्मादाहुर्ज्येष्ठयज्ञः" इतिवाक्येनोक्तम् । तत्प्राथम्यवत्प्राथम्यमतिरात्रस्यापि वैकल्पिकमस्ति । अत एव सूत्रकारेणोक्तम्—'अग्निष्टोमः प्रथमयज्ञोऽतिरात्रमेके पूर्वं समामनन्ति' इति ।

तस्यैतस्यातिरात्रस्य तृतीयानुवाके विधिमुन्नयति—

ब्रह्मवादिन इति । यः पुरुषोऽग्निष्टोममनुतिष्ठति स पुनः सर्वस्तोमेन यक्ष्येऽथ तदा स एवं मुख्यो यष्टेति ब्रह्मवादिन आहुः । तस्मात्सर्वस्तोममनुतिष्ठेदिति

(अतिरात्रविध्युन्नयनम्)

विधिरुन्नेयः। अग्निष्टोमे चत्वार एव स्तोमास्त्रिवृदादयः। अतिरात्रे तु त्रिणवत्रयस्त्रिंशावपि स्तोमौ विधेते। तस्मादयं सर्वस्तोमः।

तत्रान्वयव्यतिरेकाभ्यां प्रथमस्तोमं प्रशंसति—

यस्य त्रिवृतमिति। यस्य यजमानस्य यागे वर्तमाना ऋत्विजस्त्रिवृत्स्तोममन्तरितं कुर्युस्तस्य स्तोमस्य प्राणरूपत्वाच्च ऋत्विजस्तस्य यजमानस्य प्राणानेवान्तरितान्कुर्वन्ति। न त्वेतद्युक्तम्। अयं यजमानो हि प्राणेष्वपि मे भागित्वमस्तित्वत्यभिप्रेत्य यज्ञमनुतिष्ठति। तस्मात्त्रिवृत्स्तोमोऽवश्यंभावी।

अथ द्वितीयस्तोमं प्रशंसति—

यस्य पञ्चदशमिति। पञ्चदशस्य वीर्यसाधनत्वाच्चदन्तराये वीर्यस्यान्तरायः। अन्यत्पूर्ववत्। अथ तृतीयस्तोमं प्रशंसति—

यस्य सप्तदशमिति। पूर्ववत्।

अथ चतुर्थस्तोमं प्रशंसति—

यस्यैकविꣳशमिति। पूर्ववत्।

अथ पञ्चमं स्तोमं प्रशंसति—

यस्य त्रिणवमिति। ऋतुत्वेन त्रिणवस्य स्तुतिः शाखान्तरे द्रष्टव्या। अतस्त्रिणवस्यान्तराय ऋतूनामेवान्तरायो भवति। त्रिणवस्तोमे सप्तविंशतिसंख्याकाः स्तोमीया नक्षत्राणि च कृत्तिकादीनि सप्तविंशतिसंख्याकानि। विराट्शब्दोऽपि विविधराज्यवाची नक्षत्रेष्टिषु श्रूयमाणं फलसमूहमुपलक्षयति। तथा सति त्रिणवान्तरायेण नक्षत्रसंबन्धिन्या विराजोऽन्तरायः। शेषं पूर्ववत्।

अथ षष्ठं स्तोमं प्रशंसति—

यस्य त्रयस्त्रिꣳशमिति। त्रिष्वपि लोकेषु प्रत्येकमेकादशसंख्याका देवताः। ताश्च "ये देवा दिव्येकादश स्थ" इति मन्त्रे समाम्नाताः। तथा सति त्रयस्त्रिंशस्तोमान्तराये त्रयस्त्रिंशस्तोमाख्य (ख्या) साम्यात्तासां देवतानामन्तरायो भवति। सोऽयमन्तरायोऽनुपपन्नः। देवतासु यत्फलं तदपि मे भूयादित्यभिप्रेत्य यजमानेन यष्टुं प्रवृत्तत्वात्। तदेवमतिरात्रविवक्षया सर्वे स्तोमाः प्रशस्ताः। सन्ति हि कस्मिंश्चिदतिरात्रे सर्वे स्तोमाः। अत एव सूपरिष्टाद्धास्यति—' सर्वस्तोमोऽतिरात्र उत्तरम् ' इति।

तथाऽन्यमतिरात्रगतं विशेषं विधित्सयाऽऽह प्रशंसति—

यो वा इति । स्तोमानां मध्ये ह्रूनसंख्याकस्तोत्रियोपेतस्त्रिवृत्स्तोमोऽवमः स एवोत्तमः तस्य च परमत्वादन्ते प्रयोगः । अतिरात्रे हि तथा प्रयुज्यते । त्रिवृदार्धवरः संधिरिति चरमे संधिस्तोत्रे त्रिवृतो विधानात् । य एवं वेदेति पुनर्वचनमुपसंहारार्थम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः ।)

अङ्गिरसो वै सत्रमासत ते सुवर्गं लोकमायन्नेषां ह हविष्माꣳश्च ह हविष्कृच्चाहीयेतां तावेकामयेताꣳ सुवर्गं लोकमियावेति तावेतं द्विरात्रमपश्यतां तमाऽहरतां तेनायजेतां ततो वै तौ सुवर्गं लोकमैतां य एवं विद्वान्द्विरात्रेण यजते सुवर्गमेव लोकमेति तावैतां पूर्वेणाह्नाऽगच्छतामुत्तरेण (१) अभिप्लवः पूर्वमहर्भवति गतिरुत्तरं ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाव रुन्धे सर्वस्तोमोऽतिरात्र उत्तरꣳ सर्वस्याऽऽप्त्यै सर्वस्यावरुद्ध्यै गायत्रं पूर्वेऽहन्त्साम भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमात्मन्धत्ते त्रैष्टुभमुत्तर ओजो वै वीर्यं त्रिष्टुगोज एव वीर्यमात्मन्धत्ते रथंतरं पूर्वं (२) अहन्त्साम भवतीयं वै रथंतरमस्यामेव प्रतिं तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रतिं तिष्ठति तदाहुः कं जगती चानुष्टुप्चेतिं वैरूपसं पूर्वेऽहन्त्साम भवति तेन

---

१ क. °मः । त° । २ ख. °तरसं° ।

(आङ्गिरसद्विरात्राहीनविधिकथनम्)

जगत्यै नैति षोडश्युत्तरे तेनानुष्टुभोऽर्धाऽऽहुर्यत्समानेऽर्धमासे स्यातामन्यतरस्याह्नो वीर्यमनुपद्येतेत्यभावाय स्यातां पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरं नानैवार्धमासयोर्भवतो नानावीर्ये भवतो हविर्ध्मन्निधनं पूर्वमहर्भवति हविष्कृन्निधनमुत्तरं प्रतिष्ठित्यै (३)।

(उत्तरेण रथंतरं पूर्वेऽन्वेकविंशतिश्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयानुवाके सर्वस्तोमोऽतिरात्र उक्तः। सचैकाह इति सर्वेऽप्येकाहा एतेनोपलक्षिताः। अथाहीना द्विरात्रादयः क्रमेणोच्यन्ते। चत्वारो हि द्विरात्रभेदाः। तत्र व्युष्टिद्विरात्रो राज्ञां विहितः।

अथाङ्गिरसां द्विरात्रो विधीयते—

अङ्गिरसो वा इति। अङ्गिरसो महर्षयो यदा सत्रमनुष्ठाय स्वर्गं प्राप्तास्तदानीं तेषां मध्ये हविष्मान्हविष्कृदित्येतौ पुरुषावनुष्ठानेन स्वर्गतात्रपि हीनौ स्या (नावभव)ताम्। तौ पुनः स्वर्गप्राप्तिं कामयमानौ द्विरात्राख्यं यागं तत्साधनत्वेन निश्चित्य तृतीयां सामग्रीं संपाद्य तदनुष्ठानेन स्वर्गं प्राप्तौ। अतोऽन्योऽपि स्वर्गप्राप्तये द्विरात्रेण यजेत।

अथाहर्विशेषं विधत्ते—

तावैतामिति। तौ हविष्पद्धविष्कृन्नामानावृषी द्विरात्रगतेन पूर्वेणाह्ना स्वर्गं प्रविष्टौ। अत्र सर्वत्राहःशब्देनैकदिनसाध्यस्तोमप्रयोग उपलक्ष्यते। अभिप्लवाख्यः कश्चित्षडहयागविशेषः। तस्य च प्रथमदिने ज्योतिष्टोमप्रथमसंस्थारूपोऽग्निष्टोमो विहितोऽस्ति। स एवात्राभिप्लवशब्देनोपलक्ष्यते। सोऽत्र पूर्वमहर्भं-

---

१ क. ख. ङ. च. °ष्टोमः प्र°।

(आङ्गिरसद्विरात्राहीनविधिकथनम्)

वति, पूर्वदिनेऽनुष्ठेय इत्यर्थः । गम्यते स्वर्गो येनातिरात्रेण सोऽयमतिरात्रविशेषो गतिः । स च गतिरुत्तरमहर्भवति, द्वितीयदिने सोऽतिरात्रोऽनुष्ठेय इत्यर्थः ।

उक्तार्थस्पष्टीकरणद्वारेण स्तोमविशेषान्विधत्ते—

ज्योतिष्टाम इति । अभिप्लव इत्यस्य व्याख्यानं ज्योतिष्टोम इति । तत्र हि ज्योतिष्टोमे निरूपितास्त्रिवृदादयश्चत्वारः स्तोमाः क्रियन्ते । तदनुष्ठानेन तेजः प्राप्नोति । सर्वस्तोमैरुपेतोऽतिरात्र इत्यनेन त्रिणवत्रयस्त्रिंशस्तोमाभ्यां सहिता अशेषस्तोमा उक्ताः । तेन च सर्वमप्यप्राप्यं प्राप्यते, स्वाधीनं च भवति । द्वादशभिः स्तोत्रैरुपेतोऽग्निष्टोम एकोनविंशद्भिः(वा)स्तोत्रैरुपेतोऽतिरात्र इति तयोर्भेदः ।

अथ होतारं प्रति प्रयोक्तव्ये स्तोत्रे दिनभेदेन सामविशेषं विधत्ते—

गायत्रमिति । गायत्रीछन्दस्कायामृच्युत्पन्नं गायत्रमेतच्चामै(म)कं साम, तदेतद्धोतुराभिमुख्येन पठनीये स्तोत्रे गायेत् । तदेतत्पूर्वेऽह्नि द्रष्टव्यम् । गायत्र्या अग्निना सहोत्पन्नत्वात्तेजस्त्वं, ब्राह्मणैरनुष्ठेयत्वाद्ब्रह्मवर्चसत्वं, तदुभयमनेन साम्ना स्वस्मिन्समापयन्ति । यद्यपि त्रैष्टुभारूप्यं किंचित्साम नास्ति तथाऽपि त्रिष्टुप्छन्दस्कायामुत्पन्नत्वात्त्रैष्टुभमित्युच्यते । तदेतदुत्तरदिने गायेत् । तेन शारीरं बलमिन्द्रियसामर्थ्यं च प्राप्नोति ॥

अथ पृष्ठस्तोत्रसामविशेषं चोदकप्राप्तविकल्पनिवारणाय नियमयति—

रथंतरमिति । प्रकृतौ तु बृहद्रथंतरयोरैच्छिको विकल्पः । इह तु दिनभेदेन व्यवस्था ॥

पुनरपि दिनभेदेन व्यवस्थितं सामान्तरं विधत्ते—

तदाहुरिति । अत्र ब्रह्मवादिनश्चोदयन्ति—अत्र विद्यमाने द्वे एवाह्नी, तयोः पूर्वस्मिन्गायत्र्यामुत्पन्नं साम गीतं, तदुत्तरस्मिंस्तु त्रिष्टुभ्युत्पन्नं साम गीतं, न खत्र तृतीयचतुर्थे अहनी विद्येते । ततो जगत्यनुष्टुभौ द्वाववतिष्ठेते इति । तत्राभिज्ञाः सामान्तरविधानमुखेनोत्तरमाहुः—यद्बृहत्यामृच्युत्पन्नं वैखानसाख्यं साम तत्पूर्वदिने गायेत् । बृहती च षट्त्रिंशदक्षरा सती चतुर्वारमावर्त्यमाना जगतीत्वं संपद्यते । अष्टाचत्वारिंशदक्षराणां जगतीनां तिसृणामक्षरसंख्यया बृहतीचतुष्टयसमानत्वात् । तेन वैखानससाम्नाऽयं द्विरात्रयागो जगत्याः सकाशान्नापैति । षोडशिशब्देन षोडशस्तोत्रे गीयमानं गौरिवीताख्यं सामोच्यते । तच्चो-

१ ख. घ. ङ. च. °मेन नि° ।

(आङ्गिरसद्विरात्राहीनविधिकथनम्)

त्तरेऽहनि गायेत्। तदाधारभूतामृचमवलम्ब्य पूर्ववदनुष्टुभं संपादयेत् तेन षोड-
शी(शि) साम्नाऽयं द्विरात्रोऽनुष्टुभः सकाशान्नापैति ॥

अथ दिनद्वयस्य पक्षव्यवस्थां विधत्ते—

अथाऽऽहुरिति। शुक्लः कृष्णो वैक एव पक्षः समानोऽर्धमासः। तस्मिन्नेव यद्युभे अहनी स्यातां तदानीमेकपक्षगतत्वादेकस्याह्नो यावद्वीर्यं तावदेव भवेत्। इतरस्य वीर्यं तु लुप्येत। अतः कृष्णपक्षस्यान्तिमदिने प्रथममहः कर्तव्यम्। शुक्लपक्षस्य प्रथमदिने द्वितीयमहः। एवं सति भिन्नार्धमासवर्तित्वाद्भिन्नवीर्ये भवतः ॥

अथ दिनभेदेन निधनविशेषं विधत्ते—

हविष्मन्निति। पञ्चधा विभक्तस्य साम्नः पञ्चमैभागो निधनम्। हविष्म-च्छब्दरूपं निधनं यस्मिन्नहनि तद्धविष्मन्निधनं, पूर्वाह्णे हविष्मदितिशब्दः प्रयोक्तव्य इत्यर्थः। एवमितरत्रापि। उत्तरस्मिन्नहनि हविष्कृच्छब्द इत्यर्थः। निधनयोर्द्वित्वात्पादसदृशत्वेन प्रतिष्ठित्यै संपद्यते।

अत्र मीमांसा—

दशमाध्यायस्य पञ्चमपादे चतुर्थाधिकरणे चिन्तितम्—

द्विरात्रादौ द्वादशाहप्रायणीयादिकः क्रमः।
आद्यन्तौ वर्जयित्वा वा विशेषाभावतोऽग्रिमैः ॥
द्वादशाहे द्वितीयस्य द्विरात्रे प्रथमत्वतः।
जागतस्यान्तरायाच्च विध्यन्तो दशरात्रगः ॥

अहीनरूपस्य द्वादशाहस्य विकृतयो द्विरात्रत्रिरात्रादयः। तेषु किं द्वादशाहस्य प्रथममहः प्रायणीयसंज्ञकमारभ्य क्रमेण विध्यन्तः प्रवर्तते, किंवा प्रायणीयोदय-नीयावाद्यन्तौ वर्जयित्वा तन्मध्यगतस्य विध्यन्तः प्रवर्तत इति संशयः। इद-मग्रमहरुपादेयमिदं वर्जनीयमिति विशेषनियामकाभावादादित आरभ्य प्रवर्तत इति पूर्वः पक्षः। द्विरात्रं प्रकृत्यैवमाम्नायते—'यत्प्रथमं तद्द्वितीयं यद्द्वि-तीयं तत्तृतीयम्' इति। अयमर्थः—द्विरात्रस्य यत्प्रथममहरनुष्ठेयं तद्द्वादशा-हस्य द्वितीयमिति। एवमुत्तरत्रापि योज्यम्। तदेवत्प्रायणीयवर्जने लिङ्गम् तथा जगतीमन्तर्धन्वीति जागतस्याह्नोऽन्तराय आम्नायते। तच्च वर्जने लि-ङ्गम्। एवमादिभिर्लिङ्गैरुभयं वर्जयित्वाऽवशिष्टो विध्यन्तो यत्र यावानपेक्षित-स्तत्र तावान्प्रवर्तयितव्य इत्यवगन्तव्यम् ॥

तत्रैव त्रयोदशाधिकरणेऽन्यच्चिन्तितम्—

द्विरात्रेऽङ्गिरसां षोडश्यप्राप्तः किं विधीयते ।
परिसंख्यायते वाऽऽद्यश्चोदकाच्छीघ्रबुद्धितः ॥
अनारम्भविधेः प्राप्तौ परिसंख्याऽतिदेशतः ।
विकल्पोऽन्यद्विरात्रेषु प्रोक्तं वृत्तिकृतो मतम् ॥

सन्ति बहवो द्विरात्राः । तेष्वङ्गिरसां द्विरात्रे श्रूयते—' वैखानसं पूर्वेऽह-न्साम भवति, षोडश्युत्तरे ' इति । सोऽयं षोडश्यप्राप्तः सन्विधीयते । न च चोदकात्प्राप्तिः शङ्कनीया, प्रत्यक्षवचनस्य शीघ्रभवृत्तेः । चोदको ह्यानुमानिक-त्वेन विलम्बित इति प्राप्ते ब्रूमः—मा भूच्चोदकः । अस्ति ह्यनारम्भाधीतं प्रत्यक्षं विध्यन्तरम्—' उत्तरेऽहन्द्विरात्रस्य गृह्यते ' इति । तेषु(न) सर्वेषु द्विरात्रेषु प्राप्तः सन्नङ्गिरसां द्विरात्र एव नान्येषु द्विरात्रेष्विति परिसंख्यायते । ततोऽङ्गिरसां द्विरात्रे नियमेन षोडशी गृह्यत इतरेष्वतिरात्रविकृतित्वेनाति-देशाद्विकल्प्यते । तदेतद्वृत्तिकारमतम् ॥

तत्रैव भाष्यकारमतेनाऽऽरचयति—

परिसंख्या पूर्वपक्षे(क्षो) न सा युक्ता विदोषतः ।
प्राप्तस्यान्या(स्यैवा)नुवादेन विधेये सा न शक्यते ॥

वृत्तिकारस्य सिद्धान्तरूपा या परिसंख्या सैव भाष्यकारमते पूर्वः पक्षः । सिद्धान्तस्तु षोडश्युत्तर इत्यर्थं विधिरेव न भवति । विधित्सितवैखानसस्तोमवा-क्यशेषत्वेनार्थवत्त्वात् । अतः परिसंख्या दोषत्रयोपेता नात्र कल्पनीया । प्राप्तस्य विध्यर्थस्य परित्यागः । अप्राप्तस्य निषेधार्थस्य स्वीकारः । अन्यत्र प्राप्तस्य बाध इति दोषत्रयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः) ।

आपो वा इदमग्रे सलिलमासीत्तस्मिन्प्रजाप-

---

१ क. ख. घ. ङ. च. °स्तु नैव षो° । २ च. °र्थवादत्वात् ।

(गर्गत्रिरात्राभिधानम्)

तिर्वायुर्भूत्वाऽचरत्स इमामपश्यत्तां वराहो भूत्वाऽहरत्तां विश्वकर्मा भूत्वा व्यमार्ट्सासाऽप्रथत सा पृथिव्यभवत्तत्पृथिव्यै पृथिवित्वं तस्यामश्राम्यत्प्रजापतिः स देवानसृजत वसून्रुद्रानादित्यान्ते देवाः प्रजापतिमब्रुवन्प्र जायामहा इति सोऽब्रवीत् (१) यथाऽहं युष्माꣳस्तपसाऽसृक्ष्येवं तपसि प्रजनन-मिच्छध्वमिति तेभ्योऽग्निमायतनं प्रायच्छदेतेनाऽऽयतनेन श्राम्यतेति तेऽग्निनाऽऽयतनेनाश्राम्यन्त संवत्सर एकां गामसृजन्त तां वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्रायच्छन्नेताꣳ रक्षध्वमिति तां वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राजायत त्रीणि च (२) शतानि त्रयस्त्रिꣳशतं चाथ सैव सहस्रमभवत्ते देवाः प्रजापतिमब्रुवन्त्सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत्त इमं लोकमजयन्तच्चाददुः स उक्थ्येन रुद्रानयाजयन्तेऽन्तरिक्षमजयन्तच्चाददुः सोऽतिरात्रेणाऽऽदित्यानयाजयत्तेऽमुं लोकमजयन्तच्चाददुस्तदन्तरिक्षम् (३) व्यवैर्यत तस्माद्रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं वै मध्यममहस्त्रिरात्रस्य वि हि तदवैर्यतेति त्रैष्टुभं मध्यमस्याह्न आज्यं भवति संयानानि सूक्तानि शꣳसति षोडशिनꣳ शꣳसत्यह्नो धृत्या अशिथिलंभावाय तस्मात्त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथातिरात्र एषां

लोकानां विधृत्यै त्रीणित्रीणि शतान्यनूचीनाह-
मव्यवच्छिन्नानि ददाति (४) एषां लोकानामनु
संतत्यै दशतं न वि च्छिन्द्याद्विराजं नेद्विच्छिन-
दानीत्यथ या सहस्रतम्यासीत्तस्यामिन्द्रश्च वि-
ष्णुश्च व्यायच्छेतां स इन्द्रोऽमन्यतानया वा
इदं विष्णुः सहस्रं वक्ष्यत इति तस्यामकल्पेतां
द्विभागं इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत
उभा जिग्ययुरिति तां वा एतामच्छावाकः (५)
एव शंसत्यथ या सहस्रतमी सा होत्रे देयेति
होतारं वा अभ्यतिरिच्यते यदतिरिच्यते होताऽ-
नाप्तस्याऽऽपयिताऽथाऽऽहुरुन्नेत्रे देयेत्यतिरिक्ता वा
एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजामथाऽऽहुः
सर्वेभ्यः सदस्येभ्यो देयेत्यथाऽऽहुरुद्गात्रे सा
वशां चरेदित्यथाऽऽहुर्ब्रह्मणे चाग्नीधे च देयेति
(६) द्विभागं ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै
ब्रह्मा वैष्णवोऽग्नीध्यथैव तावकल्पेतामित्यथाऽऽ-
हुर्या कल्याणी बहुरूपा सा देयेत्यथाऽऽहुर्या द्वि-
रूपोभयतएनी सा देयेति सहस्रस्य परिगृहीत्यै
तद्वा एतत्सहस्रस्यायनꣳ सहस्रꣳ स्तोत्रीयाः
सहस्रं दक्षिणाः सहस्रसंमितः सुवर्गो लोकः सुव-
र्गस्य लोकस्याभिजित्यै (७) ॥

(अब्रवीच्च यदन्तरिक्षं ददात्यच्छावाकश्च देयेति
सप्तचत्वारिꣳशच्च)।

(गर्गत्रिरात्राग्निधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थे द्विरात्रोऽभिहितः। अथ त्रिरात्रं विधातुं काचिदारव्यायिकोच्यते। तस्यां चाऽऽख्यायिकायामादौ पृथिव्युत्पत्तिं दर्शयति—

आपो वा इति। इदमिदानीं दृश्यमानं गिरिनदीसमुद्रादिकं जगत्पृथिव्युत्पत्तेः पूर्वं सलिलमासीत्। तस्मिन्नेव सलिले केवला आप एव ननु भूतान्तरं तत्कार्यं वा किंचिदपि नाऽऽसीत्। तदानीं प्रजापतिर्मूर्तस्य शरीरस्यावस्थातुं स्थानाभावाद्वायुरूपो भूत्वा तस्मिन्सलिले सर्वत्राचरत्। चरित्वा च सलिले निमग्नां भूमिं दृष्ट्वा स्वयं वराहो भूत्वा दंष्ट्राग्रेण तां भूमिं जलस्योपर्याहरत्। आहृत्य च वराहरूपमुत्सृज्य विश्वकर्मा भूत्वा विशेषेण मार्जनं कृत्वा तत्रत्यं द्रवमपनीय तां विस्तारितवान्। तत इयं दृश्यमाना सर्वप्राण्याधारभूता पृथिव्यभवत्। प्रथनादेव पृथिवीनाम संपन्नम् ॥

अथ देवसृष्टिं गोसृष्टिं च क्रमेण दर्शयति—

तस्यामिति। तस्यां भूमौ स प्रजापतिः स्वेनैव शरीरेणावस्थाय सिसृक्षुरश्राम्यत्तपः कृतवान्। तस्माच्च तपःसामर्थ्यात्त्रीन्वस्वादिदेवगणानसृजत। ते च वस्वादयः प्रजापतिं प्रति प्रजोत्पादनोपायं पप्रच्छुः। स च प्रजापतिर्मद्वत्तपसि कृते सति पश्चाद्यूयमुत्पादनमिच्छतेत्युक्त्वा होमाख्यस्य तपस आधारभूतमग्निं दत्त्वा तेनाग्निना होमलक्षणं तपः कुरुतेत्युक्तवान्। ते च संवत्सरं तथा कृत्वा तदन्ते सर्वेऽप्येकां गामसृजन्त। तां च गां स प्रजापतिर्वसुभ्यो रक्षणार्थं दत्तवान्। सा च रक्षिता सती वस्वर्थं गवां शतत्रयं त्रयस्त्रिंशतं चोत्पादयामास। ततः प्रजापतिस्तामेव गां रुद्रेभ्यो दत्तवान्। रुद्रार्थमपि सा तथैवोत्पादयामास। एवमादित्यार्थमप्युत्पादयामास। तमिमं (दिदं) पर्यायत्रयं संगृह्य श्रुतिरेकेनैव वाक्येनोदाजहार। तत्र त्रेधा वाक्यं विभज्य योजयितव्यम्। एवं सत्येकोनसहस्रं गवां संपन्नम्। येयं सहस्रतमी गौः सेयं सहस्रसंख्यापूरण्यभवत् ॥

अतः सहस्रदक्षिणाकेन त्रिरात्रयागेन(ण) याजनं दर्शयति—

ते देवा इति। वसुरुद्रादित्याः सर्वे मिलित्वा गोसहस्रदक्षिणाकयज्ञार्थं

प्रजापतिं प्रार्थयामासुः । स च प्रजापतिर्देवगणत्रयं विभज्य त्रिषु दिनेषु क्रमाद-ग्निष्टोमोक्थ्यावतिरात्रैर्याजितवान् । द्वादशस्तोत्रोऽग्निष्टोमः । पञ्चदशस्तोत्र उक्थ्यः । एकोनत्रिंशत्स्तोत्रोऽतिरात्रः । ते च त्रैलोक्यत्रयमजयन् । स्वकीयं स्वकीयं तत्तद्धोषणं च दक्षिणार्थमृत्विग्भ्यो दत्तवन्तः ॥

अथोक्थ्यरूपे मध्यमेऽहनि कांश्चिच्छंसनविशेषान्विधत्ते—

तदन्तरिक्षमिति । यदन्तरिक्षं रुद्रैर्जितं तदन्तरिक्षं व्यवेर्यत विशीर्णमभूत्। गृहरूपं लोकसंस्थानं भग्नमभूदित्यर्थः । तस्माद्रुद्राणामायतनमन्तरिक्षलोकस्थानं विशीर्णमभूत्तस्मादायतनाभावाद्रुद्राः कोपाविष्टाः सन्तः सर्वत्र प्राणिघातिनोऽ-भवन् । यस्मात्फलभूतमन्तरिक्षं विशीर्णमभूत्तस्मात्तत्साधनमात्रं त्रिरात्रयागस्य मध्यममहः केनापि वैकल्येन शिथिलमित्येवमभिज्ञा आहुः । तस्मान्मध्यमस्याहनो दाढर्येन शैथिल्यपरिहाराय कानिचिच्छस्त्राण्यनुष्ठेयानि । त्रिष्टुप्छन्दस्कायामृ-च्युत्पन्नं त्रैष्टुभं होतुराज्यशस्त्रं शंसनीयम् । तथा संयानाख्यानि दाशतय्यां प्रसिद्धानि सूक्तानि शंसेत् । तथा षोडश्याख्यमपि शस्त्रं शंसेत् ॥

इत्थमाख्यायिकां प्रस्तुत्य मध्यमे विशेषांश्च विधाय त्रिरात्रयागस्याहार्वैशे-षान्विधत्ते—

तस्मादिति । यस्माद्रुस्वादिभिरहस्त्रयेण लोकत्रयजयायाहस्त्रयसंघातरूप-मनुष्ठितं तस्मात्त्रिरात्रयागमनुतिष्ठेदित्यर्थः ॥

यदुक्तं सूत्रकारेण—' सहस्रं दक्षिणास्त्रीणि शतानि त्रयस्त्रिंशतं च प्रथ-मेऽहनि ददात्येवं द्वितीये तृतीये च साहस्र्यतिरिच्यते ' इति, तदिदं विधत्ते—

त्रीणित्रीणीति । अनुक्रमेणाश्वेति प्रवर्तत इत्यनूचीनं, तादृशं च तदहश्वा-नूचीनाहं प्रतिदिनमित्यर्थः । प्रतिदिनमावीच्छस्त्राणि यथा भवन्ति तथा त्रीणि त्रीणि शतानि ददाति । त्रयस्त्रिंशत्संख्यापा अप्येतदुपलक्षणम् । तथा सत्ये-कैकस्मिन्दिने त्रयस्त्रिंशदधिकं गवां शतत्रयं दद्यादित्यर्थो भवति । एतच्च लोकानां भूरादीनां संतत्यै भवति ॥

यदुक्तं सूत्रकारेण—' दक्षिणानयने न्यूना दशधा नयेत् ' इति, तदेतद्वि-धत्ते—

दशतं नेति । दशानां वर्गो दशत्तस्य वर्गस्य विच्छेदं न कुर्यात् । वेदैर्-

१ ख. च. °त्. सहस्रा°।

(गर्गत्रिरात्राभिधानम्)

क्षिणस्यां दिश्यवस्थिता गाः प्राग्वंशसदसोमध्येन यदोत्तरस्यां दिशि दक्षिणार्धं नयति तदानीमेकैकं दशकं सहैव नयेत्। न तु दशतो न्यूनं नयेत्। दशसंख्याया विराड्रूपत्वात् विराजं नैव विच्छिन्नां करोमीति नेतुरभिप्रायः। यत्तु त्रिंशत उपरि त्रयमधिकं तदपि चरमेण दशकेन सह नयेत्। न्यूनत्वस्यैवात्र [दशधेति] विधानात् ॥

एवमेकोनसहस्रे त्रिषु दिनेषु दत्ते सति सहस्रतमी परिशिष्यते। तद्दानं तु बहुधा विकल्पितं प्रदर्शयितुं प्रस्तौति—

अथ येति। क्लृप्तिः कल्पनं, तयैव क्लृप्त्या तस्यां सहस्रतम्यां गवि निमित्तभूतायां ममैवेयं भूयादित्येवमिन्द्रश्च विष्णुश्च परस्परं कलहं कुरुतः। तदानीमिन्द्रो मनस्येवमचिन्तयत्—तां गां गृहीत्वा विष्णुरनया गवा सहस्रमिदं सर्वं मां वर्जयित्वा स्वाधीनं करिष्यति, तस्मान्मयेऽप्येवाधिकेन भागेन भवितव्यमिति। ततस्तावुभौ तस्यां गव्यकल्पेतां व्यवस्थां कृतवन्तौ। इन्द्रो द्विभागे व्यवस्थितः। विष्णुस्तृतीये भागे व्यवस्थितः। तदेतमर्थमभिलक्ष्य काचिदृग्वेदेऽप्यृगनूच्यते। सा च भागत्रयप्रतिपादिका। तस्याश्च प्रतीकम् ' उभा जिग्यथुः ' इत्येतत्। इयं चोपरितनेऽनुवाके समाम्नास्यते ॥

अथैतस्या ऋचः शंसननियमं विधत्ते—

तां वेति। विकल्पितेषु दानपक्षेषु प्रथमं पक्षमाह—

अथ येति। प्रतिदिनं त्रयस्त्रिंशदधिकशतत्रये साम्येन दत्ते सति सेयं सहस्रतम्यतिरिच्यते। यत्तु द्रव्यं यागेऽतिरिक्तं भवति तत्सर्वं होतारमभिलक्ष्यैवातिरिच्यते। होता ह्यनाप्तस्य सर्वस्य फलस्य प्रापयिता। तस्माद्धोत्रे सहस्रतमी देयेत्याद्यः पक्षः ॥

द्वितीयं पक्षं दर्शयति—

अथाऽऽहुरिति। एषा गौः सहस्रस्य मध्येऽतिरिक्तवीर्या। उन्नेताऽप्यृत्विजां मध्येऽतिरिक्तवीर्यः। अत एव हि हारियोजनपक्षे श्रूयते—' उन्नेतर्युपहवमिच्छन्ते ' इति। तस्मादियमुन्नेत्रे देयेत्येवं केचिदाहुः ॥

तृतीयं पक्षं दर्शयति—

अथाऽऽहुः सर्वेभ्य इति। अत्रोपपत्तिर्बहिरेव द्रष्टव्या। ' यावन्तो वै सदस्यास्ते सर्वे दक्षिण्याः ' इत्यन्यत्राऽऽम्नातम्। तस्मात्सदस्येभ्यो देया ॥

---

१ क. ङ. तथैव।

चतुर्थं पक्षं दर्शयति--

अथेति । अत्राप्युपपत्तिः पूर्ववत् । दिनत्रये विभागसाम्येन दक्षिणा दत्ता। इयं चैका भागवैषम्यं च न युक्तम् । अतो यज्ञभूमेरुद्वर्तां कृत्वा स्ववशत्वेन यथा चरति तथा कुर्यात् ॥

पञ्चमं पक्षं दर्शयति--

अथाऽऽहुर्ब्रह्मण इति । इन्द्रस्य विष्णोश्च या भागकल्पिस्तद्वत्तदीययोर्ब्रह्माग्नीध्रयोर्देया ॥

षष्ठं पक्षं दर्शयति--

अथाऽऽहुर्येति । इयं वै सहस्रतमी न कस्मैचिद्देया । किं त्वेतत्प्रतिनिधिरूपा या काचित्कल्याणी बहुक्षीरादिगुणवती विचित्रवर्णा सा दातव्या ॥

सप्तमं पक्षं दर्शयति--

अथाऽऽहुर्येति । या गौः शुक्लकृष्णवर्णाभ्यामुपेतत्वेन द्विरूपा, पार्श्वद्वये शुक्लकेशोपेतत्वादुभयत एनी, सहस्रसंख्यापूर्त्यर्थं तादृशी काचिद्देया ॥

तदिदं सहस्रदानोपेतं कर्म प्रशंसति--

तद्वा एतदिति । त्रिरात्राख्यं यत्कर्मोक्तं तदेतत्सहस्रसंख्याकफलस्य प्राप्तिहेतुः । यस्मादत्र त्रिषु दिनेषु मिलित्वा स्तोत्रीया ऋचः सहस्रं विद्यन्ते, दक्षिणाश्चोक्तरीत्या सहस्रं गावः, स्वर्गलोकश्च सुखाधिक्याद्भूलोकसहस्रेण समानः, [तस्मात्] तादृशस्य स्वर्गस्याभिजयायेदं कर्म योग्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः) ।

सोमो वै सहस्रमविन्दत्तामिन्द्रोऽन्वविन्दत्तौ यमो न्यागच्छत्तावब्रवीदस्तु मेऽत्रापीत्यस्तु ही३ इत्यब्रूता३ स यम एकस्यां वीर्यं पर्यपश्यदियं वा अस्य सहस्रस्य वीर्यं बिभर्तीति तावब्रवीदियं ममास्त्वेतद्युवयोरिति तावब्रूता३ सर्वे वा एतदे-

(सहस्रतम्यभिधानम्)

तस्यां वीर्यम् (१) परि पश्यामोऽशमा हरामहा इति तस्यामꣳशमाऽहरन्त तामप्सु प्रावेशयन्त्सोमायोदेहीति सा रोहिणी पिङ्गलैकहायनी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत्तस्माद्रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणीयाद्य एवं विद्वान्रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति त्रयस्त्रिꣳशता चैवास्य त्रिभिश्च (२) शतैः सोमः क्रीतो भवति सुक्रीतेन यजते तामप्सु प्रावेशयन्निन्द्रायोदेहीति सा रोहिणी लक्ष्मणा पष्ठौही वात्र्घ्नी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत्तस्माद्रोहिणीं लक्ष्मणां पष्ठौहीं वात्र्घ्नीं दद्याद्य एवं विद्वान्रोहिणीं लक्ष्मणां पष्ठौहीं वात्र्घ्नीं ददाति त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि सा दत्ता (३) भवति तामप्सु प्रावेशयन्यमायोदेहीति सा जरती मूर्खा तज्जघन्या रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत्तस्माज्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुर्वीत य एवं विद्वाञ्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुरुते त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि साऽमुष्मिꣳल्लोके भवति वागेव सहस्रतमी तस्मात् (४) वरो देयः सा हि वरः सहस्रामस्य सा दत्ता भवति तस्माद्वरो न प्रतिगृह्यः सा हि वरः सहस्रामस्य प्रतिगृहीता भवतीयं वर इति ब्रूयादथान्यां ब्रूयादियं ममेति तथाऽस्य तत्सहस्र-

मप्रतिगृहीतं भवत्युभयतएनी स्यात्तदाहुरन्यतएनी स्यात्सहस्रं परस्तादेतमिति यैव वरः (५) कल्याणी रूपसमृद्धा सा स्यात्सा हि वरः समृद्ध्यै तामुत्तरेणाऽऽभीध्रं पर्याणीयाऽऽहवनीयस्यान्तेद्रोणकलशमवधापयेदा जिघ्र कलशं मह्यूधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मा सहस्र आ भज प्रजया पशुभिः सह पुनर्माऽऽविशताद्रयिरितिं प्रजयैवैनं पशुभी रय्या सम् (६) अर्धयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तया सहाऽऽभीध्रं परेत्य पुरस्तात्प्रतीच्यां तिष्ठन्त्यां जुहयादुभा जिग्ययुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः। इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति त्रेधाविभक्तं वै त्रिरात्रे सहस्रꣳ साहस्रमेवैनां करोति सहस्रस्यैवैना मात्राम् (७) करोति रूपाणि जुहोति रूपैरेवैनाꣳ समर्धयति तस्या उपोत्थाय कर्णमा जपेदिडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अग्निये नामानि सुकृतं मा देवेषु ब्रूतादिति देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुध्यन्ते (८)॥

(एतदेतस्यां वीर्यमस्य त्रिभिश्च दत्ता सहस्रतमी तस्मादेव वरः सं मात्रामेकान्नचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(सहस्रतम्यभिधानम्)

(अथ सप्तमकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः)।

पञ्चमेऽनुवाके त्रिरात्रोऽभिहितः। अथ षष्ठे तत्रत्यां सहस्रतमीं प्रपञ्चयितुमुपाख्यानं दर्शयति—

सोमो वा इति। पुरा कदाचित्सोमो गोसहस्रमलभत। तमनुगम्येन्द्रोऽपि तदेव गोसहस्रमलभत। तौ सोमेन्द्रौ प्रति यमोऽपि भागं निकामयमान आगच्छत्। आगत्य चात्र गोसहस्रे ममापि कश्चिद्भागोऽस्त्वित्यब्रवीत्। तावपि तथाऽस्त्वित्यङ्गीकुरुतः। आदरार्थः प्लुतः। ततः स यमः परीक्ष्य तस्मिन्सहस्र एकस्यामुत्तमायां गवि सामर्थ्यमपश्यत्। तत इयमेकैवास्य गोसहस्रस्य वीर्यं बिभर्तीति मनसा निश्चित्येयमेव ममास्तु युवयोरितरत्सहस्रमित्यब्रवीत्। ततस्तौ सोमेन्द्रावेवमुक्तवन्तौ सर्वेऽपि वयं मिलित्वैतस्यामुत्तमायां गवि वीर्यं परीक्ष्य तस्यांशमेकैकं स्वीकुर्म इति विचार्य तथैव कृतवन्तः॥

तत्र सोमस्य प्रथममंशहरणप्रकारं दर्शयति—

तामप्स्विति। ते त्रयोऽपि मिलित्वा तामुत्तमां गां सोमायोदेहीत्येवं ब्रुवन्तोऽप्सु प्रावेशयन्। सोमस्य यद्यावद्रूपं योग्यं तत्तावद्रूपं गृहीत्वा जलादुद्गच्छेत्यर्थः। ततः सा गौरप्सु प्रविष्टा जलादुद्गमनवेलायां तत्सार्थितं रूपं कृत्वोदगच्छत्। तदेव रूपं स्पष्टी क्रियते—रोहिणी शरीरे लोहितवर्णा पिङ्गलाक्ष्येकहायन्येकसंवत्सरवयस्का, ईदृशी सती लावण्योपेतं रूपं च कृत्वा गवामन्यासां त्रयस्त्रिंशत्संख्यया शतत्रयसंख्यया च सह जलादुद्गच्छत्। यस्मात्सोमार्थं रोहिण्यादिरूपं धृतवती तस्माद्रोहिण्येकहायन्या पिङ्गलाक्ष्या सोमं क्रीणीयात्। तया क्रीतः सोमस्त्रयस्त्रिंशदधिकेन शतत्रयेण क्रीतो भवति। ततः सुक्रीतेन सोमेनासौ यजते॥

अथेन्द्रस्य तदीयांशहरणप्रकारं दर्शयति—

तामिति। पूर्ववद्व्याख्येयम्। लक्षणा शृङ्गपुच्छाद्यवयवसौष्ठवयोग्यलक्षणोपेता। षष्टौही चतुर्वर्षा। वार्धुषी दर्शनमात्रेण मानसक्लेशापहन्त्री। यस्मादिन्द्रस्येदृशी प्रियोदैत्तस्मादीदृशीमेव दक्षिणात्वेन दद्यात्॥

अथ यमस्य तदीयांशहरणप्रकारं दर्शयति—

तामप्सु प्रावेशयन्निति। जरती वृद्धा। मूर्खा रोषणशीला। सैव ज-

१ क. घ. ङ. च. °लक्षणो°।

धन्या तज्जघन्या, इयमेवात्यन्तकुरूपा नान्येत्यर्थः । अनुस्तरणी मृतं पुरुषमनु यां गां हत्वा तदवयवान्प्रेतपुरुषावयवेष्वास्तृणन्ति सेयमनुस्तरणी । सा च जरादिगुणयुक्ता कार्या । *न(अ)स्याऽऽस्तरणेन परलोके त्रयस्त्रिंशदधिकगोशतत्रयं संपद्यते । शेषं पूर्ववत् । अत्र क्रयदानानुस्तरणीविधयः प्रासङ्गिकाः ॥

एवमाख्यायिकया सहस्रतमीं प्रशस्याथ प्रकारान्तरेण प्रशंसति-

वाग्वेवेति । येयं सहस्रतमी सोमाद्यर्थं रूपत्रयं स्वीकृत्य जलादुद्गता सा वाग्देवतैव । यस्मादस्या वाग्देवतैव(ता)रूपं(पत्वं) तस्मात्सहस्रदक्षिणे यागे वाग्देवतात्वसंपादनाय श्रेष्ठ एव गोविशेषो देयः । यस्मात्सहस्रतमी श्रेष्ठो गोविशेषस्तस्माच्छ्रेष्ठे दत्ते सत्यस्य यजमानस्य सहस्रस्वरूपा सा सहस्रतमी दत्ता भवति । यस्माच्छ्रेष्ठो गोविशेषः सहस्रसदृशस्तस्माच्छ्रेष्ठं गोविशेषं न प्रतिगृह्णीयात् । तत्प्रतिग्रहे सति गोसहस्रप्रतिग्रहदोषो भवेत् । अथ कथंचित्प्रतिगृह्णीयात्तदानीमेवं निर्दिशेत्—योऽयं वरः सेयं सहस्रतमीति । एवं निर्दिश्याथान्यां प्रत्येवं ब्रूयात्—इयं वरव्यतिरिक्ता मेति । एवं निर्देशे सति वरप्रतिग्रहेऽपि सहस्रप्रतिग्रहदोषो न भवति ॥

इत्थं सहस्रतमीं बहुधा प्रशस्य तस्या दातव्याया लक्षणं विधत्ते—

उभयतएनीति । उभयोः पार्श्वयोः शुक्लरेखा यस्याः सेयमुभयतएनी ॥

अथ प्रकारान्तरेण लक्षणं विधत्ते—

तद्बाह्वरिति । तस्मिन्सहस्रतमीविषयेऽभिज्ञा एवमाहुः—अन्यतरस्मिन्चैव पार्श्वे शुक्लरेखा पर्याप्ता । तत्रोपपत्तिं चैवमाहुः—एतं परस्तात्सहस्रमेतस्य गोविशेषस्य परभागे गोसहस्रं तिष्ठत्यतो न तत्र शुक्लरेखाऽपेक्षितेति ॥

अथ सहस्रतमीप्रतिनिधित्वेन पक्षान्तरं विधत्ते—

यैवेति । या गौः कल्याणी बहुक्षीरादिगुणवती रूपसमृद्ध्यै(द्धा)सतीनशुक्लपुच्छाद्युपेता सैवात्र वरो दातव्यो गोविशेषः स्यात् । तद्दानेनैव समृद्धिर्भवति ॥

दातव्यायास्तस्या गोरादरापणं विधत्ते-

---

* सर्वपुस्तकेषु 'तस्यास्तरणेन' इति वर्तते, परं त्वत्र पदच्छेदविषये संदेहः । अतः श्रुत्यनुकूलतया 'अस्याऽऽस्तरणेन' इति स्थापितम् 'अस्यापि शेषपूरणेनार्थो ज्ञेयः ।

१ ख. °र्णी मु° । २ ख. च. 'स्माद्वाग्वै' । ३ ख. °वा तामे° ।

(सहस्रतम्याभिधानम्)

तामुत्तरेणेति । अग्नीधः शरणमाग्नीध्रं तस्योत्तरभागे तां दातव्यां गां प्रदक्षिणत्वेनाऽऽनयिष्याऽऽहवनीयस्य समीपे द्रोणकलशस्थितं सोमपवस्रापयेत् ॥

तस्मिन्नाधापणे मन्त्रमुत्पादयति—

आ जिघ्र कलशमिति । महीति गोनाम ल(व)क्षयते । हे महि त्वं द्रोणकलशं सर्वतो जिघ्र । कीदृशी त्वम्, उरुधारा दीर्घक्षीरधारोपेता । पयस्वती बहुलक्षीरोपेता । तादृशीं त्वामिन्दवः सोमबिन्दव आविशन्तु । यथा समुद्रं सिन्धवः प्रविशन्ति तद्वत् । सा त्वं मामस्मिन्गोसहस्र आभज सर्वतः पापय । तथा रायिधनं प्रजया पशुभिश्च सह मां पुनराविशतु ॥

आघ्रापणस्य फलं दर्शयति—

प्रजयैवैनमिति । वेदनं प्रशंसति—

प्रजावानिति । अथ तदङ्गभूतं कांचिद्धोमं विधत्ते—

तयेति । आहवनीयसमीपे स्थितया तया गवा सह पुनराग्नीध्रसमीपे प्रत्यागत्य तस्याऽऽग्नीध्रस्य पूर्वभागे प्रत्यङ्मुखत्वेन गवि स्थितायां जुहुयात् ॥

होमाङ्गभूतं मन्त्रं दर्शयति—

उभा जिग्ययुरिति । हे इन्द्राविष्णू युवामुभौ जिग्यथुः सर्वत्र जितवन्तौ, न पराजयेथे कापि पराजयं न प्राप्नुथः । एतोरनयोरुभयोर्मध्ये कतरश्चनैकोऽपि न पराजिग्ये पराजयं न प्राप्तवान् । हे विष्णो त्वमिन्द्रश्चोभौ यदस्पृधेथां यदा परस्परं स्पर्धितवन्तौ तदा गोसहस्रं त्रेधा विभज्यैरयेथामिन्द्रस्य द्वौ भागौ विष्णोरेको भाग इत्येवं प्राप्तवन्तौ ॥

त्रेधा सहस्रमिति मन्त्रभागस्य तात्पर्यं दर्शयति—

त्रेधाविभक्तमिति । त्रिरात्रारूढे यागे गोसहस्रं दिनत्रयार्थं त्रेधा विभक्तव्यमिति यत्तेनैनां सहस्रतमीमेव गां साहस्रीं सहस्रोपेतां करोति, न केवलं सहस्रोपेता किंतु तस्य सहस्रस्य यावती मात्रा तावन्मात्रोमेवैनां करोति ॥

अथैतदङ्गभूतं होमान्तरं विधत्ते—

रूपाणीति । रोहिणी पिङ्गलैकहायनीत्यादीनि यानि रूपाण्युक्तानि तानि जुहुयात् । रोहिण्यै स्वाहेत्यादयो मन्त्रास्तत्रोच्चेयाः । एतस्मिन्होमे हुते सत्यपेक्षितै रूपैरेवैनां गां समृद्धां करोति ॥

अथैतदङ्गभूतं जपं विधत्ते—

तस्या उपोत्थायेति । तस्या गोः कर्णतर्पं पत्युपस्थितो भूत्वा वक्ष्यमाणं मन्त्रं जपेत् ॥

तमिमं मन्त्रं दर्शयति-

इडे रन्तेऽदिते इति । केनापि न हन्यत इत्यदिनया गौः । हेऽदिनये, इहादीनि तव नामानि । अतस्तैर्नामभिरिह संबोध्यसे । एतादृशी त्वं देवेषु मध्ये मां यजमानं सुकृतं पुण्यकृतं ब्रूहि ॥

मन्त्रस्य तात्पर्यं दर्शयति-

देवेभ्य इति । एतन्मन्त्रपाठेनेयं गौर्देवेभ्य एवैनं यजमानमावेदयति । ते च देवा एनं यजमानं पुण्यकारिणं जानन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः)

सहस्रतम्या वै यजमानः सुवर्गं लोकमेति सैनꣳ सुवर्गं लोकं गमयति सा मां सुवर्गं लोकं गमयेत्याह सुवर्गमेवैनं लोकं गमयति सा मा ज्योतिष्मन्तं लोकं गमयेत्याह ज्योतिष्मन्तमेवैनं लोकं गमयति सा मा सर्वान्पुण्याँल्लोकान्गमयेत्याह सर्वानेवैनं पुण्याँल्लोकान्गमयति सा (१) मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्मांऽऽ विशताद्रयिरिति प्रजयैवैनं पशुभी रय्यां प्रति ष्ठापयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाऽध्वर्यवे वा दद्यात्सहस्रामस्य सा दत्ता भवति सहस्रामस्य प्रतिगृहीतं भवति यस्तामविद्वान् (२) प्रतिगृह्णाति

(सहस्रतमीदानविधिः)

तां प्रति गृह्णीयादेकोऽसि न सहस्रमेकां त्वा भूतां प्रति गृह्णामि न सहस्रमेका मा भूताऽऽविश मा सहस्रमित्येकामेवैनां भूतां प्रति गृह्णाति न सहस्रं य एवं वेद स्योनाऽसि सुषदा सुशेवा स्योना माऽऽविश सुषदा माऽऽविश सुशेवा माऽऽविश (३) इत्याह स्योनैवैनꣳ सुषदा सुशेवा भूताऽऽविशति नैवꣳ हिनस्ति ब्रह्मवादिनो वदन्ति सहस्रꣳ सहस्रतम्यन्वेती३ सहस्रतमीꣳ सहस्रा३मिति यत्प्राचीमुत्सृजेत्सहस्रꣳ सहस्रतम्यन्वियात्सहस्रमप्रज्ञात्रꣳ सुवर्गं लोकं न प्र जानीयात्प्रतीचीमुत्सृजति ताꣳ सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गं लोकमेति यजमानमभ्युत्सृजति क्षिप्रे सहस्रं प्र जायत उत्तमा नीयते प्रथमा देवान्गच्छति (४)॥

(लोकान्गमयति साऽविद्वान्त्सशेवा माऽऽविश यजमानं द्वादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः)।

षष्ठेऽनुवाके सहस्रतमीं प्रशस्य तदङ्गभूतं होमादिकमुक्तम्। अथ सप्तमे तदानं विधीयते ॥

तत्र मदुक्तं सूक्तकारेण 'तां यजमानोऽभिमन्त्रयते सा मा सुवर्गं लोकं गमयेति' इति, दानेतान्सहस्रतम्या अनुबन्धनमन्त्रांश्चतुरो[1] व्युत्पाद्य व्याचिख्यासुः प्रथममन्त्रतात्पर्यं दर्शयति—

---

१ ख. व्युत्पाद्य।

सहस्रतम्येति । यजमानोऽयं सहस्रतम्या गवा स्वर्गं लोकं प्राप्नोति । सा त्वेनं प्रापयति । तस्मात्ता मेत्यादिमन्त्रं पठेत् । हे सहस्रतमि सा त्वं मां स्वर्गं लोकं प्रापयेति तस्यार्थः । तेन सा स्वर्गं प्रापयत्येव ॥

एवमुत्तरेषां त्रयाणामपि मन्त्राणां क्रमेण तात्पर्यं दर्शयति—

सा मेति । ज्योतिष्मानादित्यलोकः । इन्द्रलोकादयः पुण्याः । प्रतिष्ठां स्थिरावस्थानम् । प्रजया पशुभिश्च सह रायिधनं पुनर्मा प्रविशतु ॥

वेदनं प्रशंसति—

प्रजावानिति । तस्याः सहस्रतम्या दानं विधत्ते—

तामग्नीध इति । अथ प्रतिग्रहदोषपरिहाराय तत्प्रतिग्रहमन्त्रं विधत्ते—

सहस्रमस्येति । यो मन्त्रमविद्वान्सहस्रतमीं प्रतिगृह्णीयादस्य गोसहस्रं प्रतिगृहीतं भवति, तावान्प्रत्यवाय इत्यर्थः । अत एकाऽसीत्यादिमन्त्रेण तां सहस्रतमीं प्रतिगृह्णीयात् । मन्त्रार्थस्तु—सहस्रतमी त्वमेकैव गोरसि नतु सहस्रम् । अतस्त्वामेकामेवं भूतां प्रतिगृह्णामि न तु सहस्रं, त्वमप्येकैव भूता मां प्रविश, सहस्रं भूत्वा मा प्रविश । इतिशब्दो मन्त्रसमाप्त्यर्थः ॥

मन्त्रवेदनं प्रशंसति—

एकामेवैनामिति । अथ प्रतिग्रहादूर्ध्वं जप्यं मन्त्रमुत्पाद्य तात्पर्यं दर्शयति—

स्योनाऽसीति । हे सहस्रतमि त्वं स्योना सुखप्रदा सुषदा दोहनादिकाले सुखेन प्राप्तुं शक्या सुशेवा कण्डूयनादिना सुखेन सेवितुं शक्या चासि । अतस्तथाविधैव भूत्वा मां प्रविश । एतन्मन्त्रपाठेन तथैव भूत्वा प्रविश्य सर्वप्रकारेणाप्येनं न हिनस्ति ॥

अथान्वयव्यतिरेकाभ्यां प्रत्यङ्मुखत्वेनोत्सर्जनं विधत्ते—

ब्रह्मवादिन इति । किं गोसहस्रस्य पुरतो गमनं किं वा सहस्रतम्याः पुरतो गमनमिति ब्रह्मवादिनां विचारः । तत्र यदि प्राङ्मुखीमेनामुत्सृजेत्तदानीं पुरतो गोसहस्रे गच्छति सति पश्चादियं गच्छेत् । तदानीं प्रज्ञानरहितं गोसहस्रं स्वर्गं न जानीयात् । तस्मात्तत्परिहाराय प्रत्यङ्मुखीमेनामुत्सृजेत् । तदानीं पुरतो गच्छन्तीं तां सहस्रतमीमनु पृष्ठतो गोसहस्रं गच्छति । सा च सहस्रतमी मार्गाभिज्ञा सती स्वर्गं प्राप्नोति ॥

(आत्रेयचतूरात्राभिधानम्)

यदुक्तं सूत्रकारेण—'तां शतमानेन हिरण्येन निष्क्रीय यजमानस्य गोष्ठे विसृजति' इति, तदेतद्विधत्ते—

यजमानमिति। ऋत्विग्भ्यो निष्क्रीतां तां सहस्रतमीं यजमानगृहाभिमुख्येनोत्सृजेत्। तथा सति यजमानगृहे स्वल्प एव काले सहस्रमुत्पद्यते। इयं च सहस्रतमी दक्षिणानयनकाले चरमा सती नीयते। स्वर्गप्राप्तिकाले प्रथमा सती यजमानेन सह देवान्गच्छति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः॥ ७॥

(अथ सप्तमाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः)।

अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतं चतूरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै तस्य चत्वारो वीरा आऽजायन्त सुहोता सूद्गाता स्वध्वर्युः सुसंभेयो य एवं विद्वाꣳश्चतूरात्रेण यजत आऽस्य चत्वारो वीरा जायन्ते सुहोता सूद्गाता स्वध्वर्युः सुसंभेयो ये चतुर्विꣳशाः पवमाना ब्रह्मवर्चसं तत्(१) य उद्यन्तः स्तोमाः श्रीः साऽत्रिꣳ श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन्तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यꣳ स एताꣳश्चतुरश्चतुष्टोमान्त्सोमानपश्यत्तानाऽहरत्तैरयजत तेज एव प्रथमेनावारुन्धेन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन य एवं विद्वाꣳश्चतुरश्चतुष्टोमान्त्सोमानाहरति तैर्यजते तेज एव प्रथमेनावरुन्ध इन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं

चतुर्थेन यामेवाग्निर्ऋद्धिमार्ध्नोत्तामेव यजमान ऋध्नोति (२) ॥

(तत्तेज एवाष्टादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमे सहस्रतमीदानमुक्तम् । तावता पञ्चममारभ्य विंश्वनुवाकेषु गर्गत्रिरात्रः समापितः । अथाष्टमनवमयोर्द्वौ चतूरात्रावुच्येते ॥

तत्रात्रेश्चतूरात्रमष्टमेऽभिधत्ते—

अत्रिरददादिति । उर्वस्य पुत्र और्वः । स च पुत्रकामोऽत्रिं याचितवान् । तस्मै सोऽत्रिः स्वकीयां प्रजां ददौ । ततः प्रजारहितत्वेन रिक्तः सन्मनस्येवममन्यत—अहं निर्वीर्यः प्रजोत्पादनसामर्थ्यरहितः, शिथिलः कार्येष्वक्षमः, यातयामा गतसारश्चास्मीति विचार्य प्रजोत्पादनसाधनं चतूरात्रं निश्चित्य तत्सामग्रीमाहृत्य तेनायजत । तस्य सुहोत्रादयश्चत्वारः पुत्रा उत्पन्नाः । ते च होत्र औद्गात्र आध्वर्यवे यज्ञप्रयोगोपदेष्टे च कुशलाः । अतोऽन्येऽपि चतूरात्रेणेष्ट्वा तादृशान्पुत्रान्लभन्ते ॥

अत्र बहिष्पवमानमाध्यंदिनपवमानार्भवपवमानेषु त्रिष्वपि स्तोमविशेषं विधत्ते—

ये चतुर्विंशा इति । चतुर्विंशतिसंख्यया यत्र स्तोभिषा ऋच आवृत्ताः स स्तोमश्चतुर्विंशः । तादृशेन स्तोमेन युक्ता ये पवमानास्ते कर्तव्याः । तथा सति तत्पवमानत्रयं सर्वं ब्रह्मवर्चस्वरूपं भवति । चतुर्विंशतिसंख्याया गायत्रीजपादिना ब्रह्मवर्चसहेतुत्वात् ॥

अथ पवमानव्यतिरिक्तस्तोत्रेषूत्तरोत्तरस्तोमवृद्धिं विधत्ते—

य उद्यन्त इति । उत्तरोत्तरमुत्कर्षं गच्छन्तः स्तोमा उद्यन्तस्तोमाः । तादृशा ये सन्ति तैव श्रीः । तद्धेतुत्वेन तेषां श्रीत्वम् । अभिवृद्धिधकारः सूच्यते—सन्ति त्रिवृत्पञ्चदशसप्तैकविंशत्रिणवत्रयस्त्रिंशाख्याः षट्स्तोमाः । तत्र

---

१ च. °संख्यया गायत्रीछन्दसा च म° । २ ख. °यद्या ब्र° । ३ क. घ. ङ. °मविशेषं वि° ।

(जामदग्न्यचतूरात्राभिधानम्)

प्रथमेऽह्नि प्रातःसवनं त्रिवृत्स्तोमयुक्तम्। माध्यंदिनं सवनं पञ्चदशस्तोमयुक्तम्। तृतीयसवनं सप्तदशस्तोमयुक्तम्। अथ द्वितीयेऽह्नि त्रिवृतं परित्यज्यैकविंशं स्तोमं स्वीकृत्य पञ्चदशसप्तदशैकविंशैः सवनत्रयं निष्पाद्यम्। तृतीयेऽह्नि सप्तदशैकविंशत्रिणवैः। चतुर्थे त्वहनि एकविंशत्रिणवत्रयस्त्रिंशैः। तदिदमुद्यत्स्तोमत्वम्॥

तमिमं चतूरात्रविकारं प्रशंसति—

अत्रिः श्रद्धादेवामिति। श्रद्धादेवो यस्यासौ श्रद्धादेवः। यथा देवतायामादरस्तथा श्रद्धायामित्यर्थः। तादृशोऽत्रिर्यजमानः सर्वदा यागान्करोति। तथाविधं यजमानं तेज आदीनि न प्राप्नुवन्। तेजः शरीरकान्तिः। इन्द्रियं चक्षुरादिशक्तिसामर्थ्यम्। ब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः। अन्नाद्यं स्वादन्नसंपत्तिः। एकैकस्मिन्नहनि पवमानेषु चतुर्विंशस्तोमः। पवमानत्रयार्थमुक्तरीत्या त्रिवृदादयस्त्रयः स्तोमाः। एवं चतुर्ष्वपि दिनेषु चतुष्टोमाश्चत्वारः सोमयागास्तदनुष्ठानेनात्रिस्तेजआदिकमलभत॥

पूर्वं चतूरात्रेणायजतेति कृत्स्नः क्रतुर्विहितः। इदानीं क्रत्ववयवांश्चतुरहर्विशेषान्विधत्ते—

य एवामिति। तेज एव प्रथमेनेत्यादेरुक्तस्यैव संग्रहार्थं यामेवेत्यादिपुनर्वचनम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके ऽष्टमोऽनुवाकः॥ ८॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः)।

जामदग्निः पुष्टिकामश्चतूरात्रेणायजत स एतान्पोषाँ अपुष्यत्तस्मात्पलितो जामदग्नियो न संजानाते एतानेव पोषान्पुष्यति य एवं विद्वाँश्चतूरात्रेण यजते पुरोडाशिन्य उपसदो भवन्ति

---

१ च. °त्रका°।

पशवो वै पुरोडाशः पशूनेवाव रुन्धेऽन्नं वै पुरो-
डाशोऽन्नमेवाव रुन्धेऽन्नादः पशुमान्भवति य एवं
विद्वाꣳश्चतूरात्रेण यजते (१) ॥

(जमदग्निरष्टाचत्वारिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाके चतूरात्र आग्नेयो निरूपितः । अथ नवमे जामदग्न्यश्चतूरात्रो निरूप्यते ॥

तमिमं विधातुं प्रस्तौति—

जमदग्निरिति । एताँल्लोकप्रसिद्धान्प्रजापशुधनपोषानपुष्यत्संपादितवान् । यस्मादेव जमदग्निः पुष्टिहेतुयागप्रवर्तकस्तस्माज्जामदग्नियौ तद्वंशोत्पन्नौ द्वौ पितृपुत्रौ पुष्टिमन्तरेण वृथैव पलितौ दरिद्रौ न जानाते नोत्पद्येते । यद्वा वृथैव पलितं स्वकीयं देहं न जानाते । अयमर्थः—पुष्टिसंप्रदायस्य जमदग्निना प्रवर्तितत्वात्तद्वंशे कोऽपि दरिद्रो नास्ति । यदि कश्चित्प्रमादात्स्यात्तथाऽपि नैरन्तर्येण द्वौ पुरुषौ पुष्टिमन्तरेण वृथा पलितौ न स्त एवेति ॥

अथ विधत्ते—

एतानेवेति । अत्रोपसत्सु कांचिद्विशेषं विधत्ते—

पुरोडाशिन्य इति । पुरोडाश आसूपसत्स्वस्तीति पुरोडाशिन्यः । द्वादशसूपसत्सु द्वादश पुरोडाशविशेषान्सूत्रकारो दर्शयति—'आग्नेय एककपाल आश्विनो द्विकपालो वैष्णवस्त्रिकपालः सौर्यश्चतुष्कपालः सावित्रः पञ्चकपालो धात्रः षट्कपालो मारुतः सप्तकपालो बार्हस्पत्योऽष्टाकपालो मैत्रो नवकपालो वारुणो दशकपाल ऐन्द्र एकादशकपालो वैश्वदेवो द्वादशकपालो दार्विहोमा भवन्ति' इति । पुरोडाशानां पशुहेतुत्वादन्नहेतुत्वादन्नरूपत्वाच्च तदुभयप्राप्तिः॥

एतद्वेदनपूर्वकमनुष्ठानं प्रशंसति—अन्नाद इति ।

(पञ्चरात्राभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके दशमोऽनुवाकः) ।

संवत्सरो वा इदमेकं आसीत्सोऽकामयतर्तून्त्सृजेयेति स एतं पञ्चरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै स ऋतूनसृजत य एवं विद्वान्पञ्चरात्रेण यजते प्रैव जायते त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै ते व्यावर्तन्त (१) य एवं विद्वान्पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणाऽऽ वर्तते सावँसेनिः शौचेयोऽकामयत पशुमान्स्यामिति स एतं पञ्चरात्रमाऽहरत्तेनायजत ततो वै स सहस्रं पशून्प्राऽऽप्नोद्य एवं विद्वान्पञ्चरात्रेण यजते प्र सहस्रं पशूनाप्नोति बवरः प्रावाहणिरकामयत वाचः प्रवदिता स्यामिति स एतं पञ्चरात्रमा (२) अहरत्तेनायजत ततो वै स वाचः प्रवदिताऽभवद्य एवं विद्वान्पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं वाचस्पतिरित्याहुरनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष संप्रति यज्ञो यत्पञ्चरात्रो य एवं विद्वान्पञ्चरात्रेण यजते संप्रत्येव यज्ञेन यजते पञ्चरात्रो भवति पञ्च वा ऋतवः संवत्सरः (३) ऋतुष्वेव संवत्सरे प्रति तिष्ठत्यथो पञ्चा-

विश्वजिन्नामाऽग्निष्टोमविकारः कश्चिदेकाहः । सोऽत्रातिरात्रविकृतित्वमापादितः पञ्चममहर्भवति । स पुनः सर्वपृष्ठो रथंतरबृहद्वैरूपवैराजशाक्वररैवताख्यानि पृष्ठस्तोत्रगतानि सामानि सर्वाण्यपि यस्यासौ सर्वपृष्ठः । स च सर्वस्य फलस्याभिजित्यै संपद्यते ॥

अथ मीमांसा ।

अष्टमाध्यायस्य प्रथमपादे दशमाधिकरणे चिन्तितम्—

अहर्गणेषु सोमस्य द्वादशाहस्य वाऽग्रिमः ।
पूर्ववदिनसंघादिविशेषैरन्तिमो भवेत् ॥

द्विरात्रमारभ्य शतरात्रपर्यन्तेषु अहर्गणेषु गवामयने च पूर्ववदव्यक्तलिङ्गेन सोमस्य धर्मा इति चेन्न । विशेषलिङ्गसद्भावात् । द्वादशाहपदान्तर्गतोऽहःशब्दः षष्टिघटिकात्मकदिनपरः । द्विरात्रादिपदान्तरगतो रात्रिशब्दश्च तादृशः । एतदेकं विशेषलिङ्गम् । अहःसंघो द्वितीयं, दादश दीक्षास्तृतीयं, तच्च गवामयने विद्यते । तत्र ह्यभीन्धत एव दीक्षाभिरित्युक्त्वा दीक्षायुग्मानि(णि) षड्पन्यस्तानि—' द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृग्द्वाभ्यां मांसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रम् ' इति । तस्मादहर्गणेषु द्वादशाहस्य धर्माः ॥

प्रथमाध्यायस्य तृतीयपादे पञ्चमाधिकरणे चिन्तितम्—

लौकिको वाक्यगो वाऽर्थस्त्रिवृदादेः समत्वतः ।
उभौ विध्यर्थवादैकवाक्यत्वादास्त्विहान्तिमः ॥

त्रिवृद्बहिष्पवमानमिति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोके प्रसिद्धोऽर्थः । वाक्यशेषादेकत्रयात्मकेषु त्रिषु सूक्तेष्ववस्थितानां बहिष्पवमानस्तोत्रनिष्पादनक्षमाणामृषां गायता नर इत्यादीनामृचां नवकमर्थः । तत्र धर्मनिर्णये वेदस्य प्रबलत्वेऽपि पदपदार्थनिर्णये लोकवेदयोः समानबलत्वादुभावर्थौ विकल्पेन ग्रहीतव्याविति चेन्नैवम् । लौकिकार्थस्वीकारपक्षे विधिवाक्येऽर्थस्त्रैगुण्यम्, अर्थवादवाक्ये स्तोत्रियाणामृचां नवकमित्येवं विध्यर्थवादवाक्ययोर्वैयधिकरण्यादेकवाक्यत्वं न स्यादत एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोऽर्थः ॥

दशमाध्यायस्य षष्ठपादे सप्तमाधिकरणे चिन्तितम्—

(पञ्चरात्राभिधानम्)

त्रिवृदग्निष्टुदित्येतत्सर्वत्र स्तोम एव वा ।
आद्यस्त्रैगुण्यवाचित्वादन्त्यः स्तोमेऽस्य रूढितः ॥

एवं श्रूयते—' त्रिवृदग्निष्टुदग्निष्टोमः ' इति । किं त्रिवृत्त्वमग्निष्टुति क्रतौ सर्वेषु सावनेषु संपद्यते, किं वा स्तोममात्रसंबन्धि । तत्र त्रिवृद्वज्जुरित्यादौ त्रिवृच्छब्दस्य त्रैगुण्यवाचित्वदर्शनादत्रापि क्रतुसाधनेषु या या संख्या श्रूयते सा सर्वा त्रित्वेन विकियत इति प्राप्ते ब्रूमः—यद्यपि त्रिवृच्छब्दोऽवयवप्रसिद्ध्या लोके त्रैगुण्यं ब्रूते तथाऽपि वेदे रूढ्या स्तोमवाची । त्रिवृद्बर्हिष्वमानमित्युक्त्वा स्तोत्रियाणां नवानामृचामनुक्रमणादत्र स्तोमविषयमेव त्रिवृत्त्वम् ॥

सप्तमाध्यायस्य तृतीयपादे तृतीयाधिकरणे चिन्तितम्—

विश्वजित्सर्वपृष्ठः किमनुवादो रथंतरम् ।
बृहता वा समुच्चेयं यद्वा षाडहिकानि षट् ॥
अतिदेश्यानि तत्राऽऽद्यो माहेन्द्रादिचतुष्टये ।
पृष्ठशब्दाच्चोदकेन सर्वेषामिह संभवात् ॥
समुच्चयो वा विधये सर्वत्वं बहुवपेक्षया ।
न तु द्वयोरतः षण्णां पृष्ठानामतिदेशनम् ॥

" विश्वजित्सर्वपृष्ठो भवति " इति श्रूयते । तत्र सर्वपृष्ठशब्दोऽनुवादः । कुतः, प्राप्तत्वात् । तथा हि ज्योतिष्टोमे माध्यंदिनपवमानानन्तरभावीनि माहेन्द्रादीनि चत्वारि स्तोत्राणि सन्ति । ' अभि त्वा शूर नोनुमः ' ' कया नश्चित्र आभुवत् ' ' तं वो दस्ममृतीषहं ' ' तरोभिर्वो विदद्वसुम् ' इत्येतेषु चतुर्षु सूक्तेषु तानि स्तोत्राणि सप्तदशस्तोमतामापाद्य गीयन्ते । एकस्मिन्सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्तविधानेन सप्तदशधाऽभ्यासः सप्तदशस्तोमः । बाह्यशेषु स्तोत्रेषु पृष्ठशब्दः श्रूयते—' सप्तदशानि पृष्ठानि ' इति । तानि चत्वारि पृष्ठानि विश्वजिति चोदकप्राप्तत्वात्सर्वपृष्ठशब्देनानूद्यन्त इत्याद्यः पक्षः । रथंतरपृष्ठबृहत्पृष्ठयोर्ज्योतिष्टोमे विकल्पितयोरिहापि चोदकेन विकल्पप्राप्तौ सर्वशब्देन समुच्चयो विधीयते । तथा सत्यनुवादकृतं वैयर्थ्यं न भविष्यतीति द्वितीयः पक्षः । सर्वत्वं बहुषु मुख्यं न तु द्वयोः । तस्मादनेन सर्वपृष्ठशब्देन षट्संख्या-

१ च. °न इत्यु° । २ क. घ. ङ. च. स्तोत्रवि° । ३ क. घ. ङ. °नि चो° । ४ क. घ. ङ. च. °दकत्वेन । ५ ख. च. भवती° ।

कानि पृष्ठान्यतिदिश्यन्ते । षडहे प्रतिदिनमेकैकं पृष्ठं विहितम् । तानि च षट्-पृष्ठानि रथंतरबृहद्वैरूपवैराजशाक्वररैवतसामभिर्निष्पाद्यानि । यद्यपि विश्वजित् एकाहत्वाज्ज्योतिष्टोमविकृतित्वमेव नतु षडहविकृतित्वं, तथाऽपि सर्वपृष्ठोक्तिव-लाच्चानि षट्पृष्ठान्यतिदिश्यन्ते ॥

दशमाध्यायस्य षष्ठे पादे पञ्चमाधिकरणे चिन्तितम्—

किं सर्वपृष्ठे सर्वाणि पृष्ठदेशे यथोक्ति वा ।
पृष्ठशब्दात्पृष्ठदेशे वचनात्तु व्यवस्थितिः ॥

इदमाम्नायते—'विश्वजित्सर्वपृष्ठः' इति । षडहे षट्स्वहःसु क्रमेण रथं-तरबृहद्वैरूपमित्यादिभिः षड्भिः सामभिः पृष्ठस्तोत्रं निष्पादितम् । तानि सर्वाणि पृष्ठसामानि यस्मिन्विश्वजिति सोऽयं सर्वपृष्ठः । तत्र माध्यंदिनपवमानमैत्रावरुण-साम्नोरन्तराले रूपे पृष्ठस्तोत्रदेशे किं सर्वाणि पृष्ठसामानि कार्याणि, किंवा यथा-वचनं देशव्यवस्थेति संशयः । पृष्ठकार्यगमकेन(ण) पृष्ठशब्देन पृष्ठदेशे प्राप्ते वचनेन देशविशेषो व्यवस्थाप्यते । वचनं चैवमाम्नायते—'पवमाने रथंतरं करोत्यार्भवे बृहन्मध्यत इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्मसाम शाक्वरं मैत्रावरुणसाम रैवतमच्छावाकसाम' इति । वचनं हि न्यायाद्बलीयः । तस्मा-द्देशविशेषेण व्यवस्थिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः)।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यामा ददे इमामगृभ्णन्रशनामृतस्य
पूर्व आयुषि विदथेषु कव्या । तया देवाः सुतमा
बभूवुर्ऋतस्य सामन्त्सरमारपन्ती । अभिधा असि
भुवनमसि यन्ताऽसि धर्ताऽसि सोऽग्निं वैश्वानरꣳ
सप्रथसं गच्छ स्वाहाकृतः पृथिव्यां यन्ता रड्यु-

---

१ क. ख. °शेषे व्य° । २ ख. व्यवस्थितिः ।

(अश्वमेधमन्त्रकथनम्)

न्ताऽसि यमनो धर्ताऽसि धरुणः कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा सते त्वाऽसते त्वाऽदृंह्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः (१)॥

(धरुणः पञ्चविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः॥ ११॥

(अथ सप्तमकाण्डे प्रथमप्रपाठक एकादशोऽनुवाकः)।

दशमेऽनुवाके पञ्चरात्रो वर्णितः। अथात्राहीनविशेषानवस्थाप्यैकादशमारभ्य प्रपाठकसमाप्तिपर्यन्तमश्वमेधमन्त्रा उच्यन्ते। तेषां यथासंभवं ब्राह्मणग्रन्थोक्ता विनियोगा उदाहियन्ते। तत्र ब्राह्मणवाक्यमेवं पठ्यते—'देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै'। अश्विनोर्बाहुभ्यामित्याह। अश्विनौ हि देवानामध्वर्यू आस्ताम्। पूष्णो हस्ताभ्यामित्याह यत्यै। व्यृद्धं वा एतद्यज्ञस्य। यदयजुष्केण क्रियते' इति॥ मन्त्रपाठस्तु—

देवस्य त्वेति। हे रशने सवितुर्देवस्य प्रेरणे सत्यश्विसंबन्धिभ्यां बाहुभ्यां पूषसंबन्धिभ्यां हस्ताभ्यां त्वामाददे॥

अथ ब्राह्मणम्—'इमामगृभ्णन्रशनामृतस्येत्यधिवदति यजुष्कृत्यै' इति॥ पाठस्तु—

इमामगृभ्णन्निति। विदथेषु यज्ञेषु आयुषि यजमानायुर्निमित्ते पूर्वे कृष्या कवयो विद्वांस ऋत्विज ऋतस्य यज्ञस्य संबन्धिनीमिमां रशनामगृभ्णन्स्वीकृतवन्तः। तया रशनया देवाः सर्वे सुतमाबभूवुरश्वबन्धनद्वारा तस्मिन्नश्वमेधे प्रधानभूतं त्रिरात्राख्यं सोमयागमभितः प्राप्नाः। कीदृशी रशना, ऋतस्य यज्ञस्य सामन्सामनि समाप्तौ निमित्तभूतायां सत्यां सरं सरणं प्रवृत्तिमारपन्ती कथयन्ती। हे ऋत्विग्यजमानाः शीघ्रं यज्ञं समापयतेति वदन्ती सेयं रशना लक्ष्यते, स्वकीयदीर्घत्वेनाश्वबन्धनयोग्यत्वदर्शनात्॥

---

१ ख. घ. च. °त्यै' इ°। २ ख. चेयं।

कल्पः-'अभिधा असीत्यश्वमभि दधाति' इति ॥

पाठस्तु--

अभिधा इति । अभिधीयते धार्यते बध्यत इत्यभिधाः हेऽश्व त्वं तादृशो बध्यमानोऽसि । तथा भुवनादिरूपोऽसि । तव प्राजापत्यत्वात्प्रजापतिगुणाः सर्वेऽपि त्वय्यवस्थिताः । प्रजापतिश्च भुवनकारणत्वाद्भुवनरूपः । अन्तर्यामित्वाच्च यन्ता । पोषकत्वाच्च धर्ता । तद्द्वारा त्वमपि तथाविधोऽसि । स तादृशस्त्वं वैश्वानरं सर्वपुरुषहितकारिणं समर्थसं विस्तारेण सहितमग्निमाहवनीयं गच्छ । आहवनीये ह्यश्वाङ्गानि हूयन्ते । तत्र गत्वा च स्वाहाकृतः स्वाहाकारेणास्माभिर्देवेभ्यो दत्तो भव । ततो हुतः सन्धूपो भूत्वा पृथिव्यां यन्ता राड्भव नियामको राजा भव । ततोऽनन्तरभाविन्यन्तरिक्षे च अहर्नक्षत्रादीनां यन्ता यमनश्चापि, नियन्तुमुद्युक्तो यन्ता, नियन्तुं समर्थो यमनस्तादृशो भव । ततोऽप्युपरितने द्युलोके धर्ता धरुणोऽसि, स्वर्गस्थितानां पुरुषाणां धर्ता पोषयितुमुद्युक्तः, धरुणः पोषयितुं समर्थः, तादृशो भव । तथाविधं त्वां कृष्यै सर्व(स्य)निष्पत्तये बध्नामीति शेषः । एवमुत्तरत्रापि योज्यम् । क्षेमः प्राप्तस्य धनस्य रक्षणम् । रयिः प्रापणीयं धनम् । पोषस्तज्जन्या भोगपुष्टिः । पृथिव्यादयस्त्रयः प्राप्तव्या लोकाः । तेषु लोकेषु पूर्वं विद्यमानं द्रव्यं सत् । इतः परं संपादनीयं द्रव्यमसत् । एतत्सर्वं भाविजन्मविषयम् । अस्मिञ्जन्मन्यपेक्षिता आप ओषधयः सर्वप्राणिनश्च । तस्य सर्वस्य सिद्ध्यर्थं त्वामिह बध्नामि । एतच्च सर्वं यागद्वारेणोपपद्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके द्वादशोऽनुवाकः)

विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानां पत्वान्विह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्यां स्वाहा प्रजापतये

(अश्वमेधमन्त्रकथनम्)

स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्य इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत (१) ॥

(रन्तिः स्वाहा द्वाविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके द्वादशोऽनुवाकः) ।

कल्पः—' दिभूर्मात्रा प्रभूः पित्रेत्यश्वस्य दक्षिणे कर्णे यजमानं वाचयित्वा ' इति ॥ पाठस्तु—

विभूर्मात्रेति । हेऽश्व त्वं मात्रा त्वदीयया पृथिवीरूपया विभूरसि व्याप्तिमानसि । पित्रा द्युलोकरूपेण प्रभूः प्रभुत्वशक्तिमानसि । ' इयं वै माता । असौ पिता ' इति हि ब्राह्मणम् । पृथिव्या विभुत्वाद्द्युलोकस्य भोगप्रभुत्वाच्च तदुभयमस्मिन्नुपचर्यते । तथा त्वमश्वोऽसि मुख्याश्वजातिमानसि, न तु तव गर्दभसांकर्यम् । हिधातोः क्रमणार्थकादुत्पन्नो हयशब्दः । अतो हयोऽसि समीचीनक्रमणवानसि । खुरसौकर्येण भूमावाक्रमणं त्वदीयं स्थिरमित्यर्थः । अत्योऽसि सततगमनशीलोऽसि । नरोऽस्युपर्यारूढानां नेताऽसि । अर्वाऽसि समीचीनगतिमानसि । सप्तिरसि सर्वेष्वपि युद्धादिकार्येषु संबद्धोऽसि । वाजी वेगवानसि । वृषा पुंस्त्वसामर्थ्यवानसि । नृमणा नृभिर्मननीयोऽसि । ययुर्नामासि स्वर्गप्रापक इत्येतदेव तव प्रियं नाम । अत एव ब्राह्मणं ' ययुर्नामासीत्याह । एतद्वा अश्वस्य प्रियं नामधेयम् ' इति । ईदृशस्त्वमादित्यानां प्रतिमासवर्तिनां द्वादशसंख्यानां पत्वं पतनं यदन्तरिक्षगमनं तदन्वन्तरिक्षमार्गेणेहि गच्छ ॥

कल्पः—' अग्नये स्वाहा स्वाहेन्द्राग्निभ्यामिति पूर्वहोमान्हुत्वा ' इति ॥

पाठस्तु—

---

१ च. मोर्यप्र° । २ ख. °प्रदत्त्वा° ।

(अश्वमेधमन्त्रकथनम्)

अग्नये स्वाहेति । अत्र प्रथममन्त्रः स्वाहान्त उत्तरे चत्वारो मन्त्राः स्वाहादयः ॥

कल्पः—' रथकारगृहे वसतिर्भवतीह धृतिरिति सायमश्वस्य चतुर्षु पत्सु चतस्रो धृतीर्जुहोति ' इति ॥ पाठस्तु—

इह धृतिरिति । इहास्मिन्दक्षिणपूर्वपादे धृतिर्धरणं स्थैर्यं भवतु । तदर्थमिदं स्वाहुतमस्तु । इहास्मिन्दक्षिणपृष्ठपादे विधृतिर्विशेषेण स्थैर्यमस्तु । इहास्मिन्नुत्तरपृष्ठपादे रन्तिः स्थैर्येण रमणमस्तु । इहास्मिन्नुत्तरपूर्वपादे रमतिरत्यन्तं स्थिरं रमणमस्तु ॥

भूरसि भुवे त्वेति । कल्पः—' भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वेत्यश्वमुत्सृज्य ' इति ।

विश्वेभ्यस्त्वा भूतेभ्य इति मन्त्रशेषपाठः । हेऽश्व त्वं भूरस्यतीतानामनागतानां वर्तमानानां भावयिताऽसि । भूशब्दोऽतीतमात्रष्टे, भव्यशब्दो वर्तमानं, भविष्यच्छब्द आगामि, तस्य त्रिविधस्य श्रेयसः सिद्ध्यर्थं त्वामुत्सृजामि । तथा विश्वेभ्यो भूतेभ्यः सर्वप्राणिस्वाधीनत्वार्थं त्वामुत्सृजामि ॥

कल्पः—' देवा आशापाला इति रात्रिभ्यः परिददाति ' इति ॥ पाठस्तु—

देवा आशापाला इति । आशापाला दिक्षु पालकाः । हे देवा देवमूर्तिधारिणो रत्नाद्याभरणभूषिताः शतसंख्याका राजपुत्रा मेधाय यज्ञाय प्रोक्षितमेतमश्वं देवेभ्यो देवार्थं गोपायत रक्षत ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके त्रयोदशोऽनुवाकः) ।

आर्यनाय स्वाहा प्रार्यणाय स्वाहोद्द्रावाय स्वाहोदद्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा पलायिताय स्वाहाऽऽपलायिताय स्वाहाऽऽवल्गते स्वाहा परावल्गते स्वाहाऽऽयते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा (१) ॥

---

१ क. घ. ङ. च. °शेषेण वा° ।

(अश्वमेधमन्त्रकथनम्)

(आयनायोत्तरमाषल्लायेताय षड्विंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके त्रयोदशोऽनुवाकः)।

कल्पः—' आयनाय स्वाहा प्रायणाय स्वाहेत्युद्द्रावान् ' इति ॥ पाठस्तु—

आयनाय स्वाहेति । आभिमुख्येनायनं गमनं यस्यासावायनस्तस्मा अश्वाय, तत्प्रीत्यर्थमिदं स्वाहुतम् । आभिमुख्यगमनमपि द्विविधं—मन्दगमनं तीव्रगमनं च । तत्राऽऽद्यं पूर्वमन्त्रेऽभिहितं, द्वितीयं प्रायणमन्त्रेऽभिधीयते। केचन धूर्ता अश्वा गन्तुमनिच्छन्तस्ताडिताः सन्तः पूर्वपादावुन्नमयन्ति, अन्ये चापरौ पादावुन्नमयन्ति, तदुभयमुद्द्रावोद्द्रुतशब्दाभ्यामभिधीयते । कशया घातितेनोद्द्रवणार्थं क्रियमाणस्य शब्दविशेषस्यानुकरणार्थं शूकार इति प्रयुक्तम् । शूकृतमेतदेव । पूर्वापरपादविषयत्वेन द्वेधाऽभिधानम् । पुरतो वेगेन धावनं पलायनम् । आभिमुख्येन धावनमापलायनम् । चतुर्णामपि पादानां सकदुन्नमनमाभिमुख्यविषयमावल्गनम् । पराङ्मुखत्वविषयं परावल्गनम् । पूर्वमायनमायणशब्दाभ्यां योऽर्थोऽभिहितः सोऽतीतविषयः । इह त्वायत्प्रयच्छब्दाभ्यां वर्तमानविषयः स एवार्थोऽभिधीयते । अतो यथोक्ततत्तद्गुणयुक्ताश्वाय तत्प्रीत्यर्थं स्वाहा हुतमिदमस्तु । किं बहुना सर्वस्मै सर्वप्रकारगमनविशेषयुक्ताश्वप्रीत्यर्थमिदं स्वाहा हुतमस्तु । उत्कृष्टगमनविषयत्वादेतेषां होमानामुद्द्रावा इति नामधेयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके चतुर्दशोऽनुवाकः)।

अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहाऽपां मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहे-

इन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा (१)॥

(अग्नये वायवेऽपां मोदायेन्द्राय त्रयोविंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके चतुर्दशोऽनुवाकः॥ १४॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके चतुर्दशोऽनुवाकः)।

कल्पः-'अग्नये स्वाहा सोमाय स्वाहेति पूर्वहोमान्' इति॥ पाठस्तु-

अग्नये स्वाहेति। अपां मोदः पर्जन्यः। अनुक्तानां पूर्वहोमाङ्गानां देवानां संग्रहार्थं सर्वशब्दः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके चतुर्दशोऽनुवाकः॥ १४॥

(अथ सप्तमाष्टके प्रथमप्रपाठके पञ्चदशोऽनुवाकः)

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहाऽवान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवत्सराय स्वाहा सर्वस्मै स्वाहा (१)॥

(पृथिव्यै सूर्याय नक्षत्रेभ्यः प्राच्यै सप्तषष्टत्वारिंशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके पञ्चदशोऽनुवाकः॥ १५॥

(अश्वमेधमन्त्रकथनम्)

(अथ सप्तमकाण्डे प्रथमप्रपाठके पञ्चदशोऽनुवाकः)।

कल्पः—' पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येतं हुत्वा ' इति ॥

एतमनुवाकं पूर्वनामकहोमान्तःपातित्वेनैव हुत्वेत्यर्थः ॥ पाठस्तु—

पृथिव्यै स्वाहेति । प्राच्यादिशब्दा विशेषवाचिनः । दिक्शब्दः सामान्यवाची । समाशरत्संवत्सरशब्दाः सौरचान्द्रनाक्षत्रविषयाः । सर्वशब्दोऽनुक्तकालविषयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके षोडशोऽनुवाकः)।

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहाऽपां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा (१)

(अग्नये सवित्रे पूष्णेऽपां मोदाय वायवे त्रयोविंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके षोडशोऽनुवाकः)।

कल्पः—' अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षाम् ' इति ॥ पाठस्तु—

अग्नये स्वाहेति । पूर्वहोमानुवाकवदयमनुवाको व्याख्येयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठके सप्तदशोऽनुवाकः)।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहाऽ-

(अश्वमेधमन्त्रकथनम्)

अग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहाऽऽशितिन्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहाऽऽतपाय स्वाहाऽरण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा (१)॥

(पृथिव्या अग्नयेऽह्ने चतुश्चत्वारिꣳशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठके सप्तदशोऽनुवाकः॥ १७॥

(अथ सप्तमकाण्डे प्रथमप्रपाठके सप्तदशोऽनुवाकः)

कल्पः—'पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येकविꣳशिनीं दीक्षाम्' इति॥

पाठस्तु—

पृथिव्यै स्वाहेति। अत्र ऋज्वादयस्त्रयः पृथिव्यादिलोकाः। तथा च ब्राह्मणम्—'इयं वा ऋजुः। अन्तरिक्षꣳ साधु। असौ सुक्षितिः' इति। अशितिशब्देन क्षुन्निवारकमाशितृत्व+मभिधीयते। स्वर्गः पुण्यफलभूतः। लोकशब्दः सामान्यवाची। अत्रातीतावग्नये स्वाहा पृथिव्यै स्वाहेत्यनुवाकौ पूर्वहोमविषयौ। तथा च ब्राह्मणम्—'अग्नये स्वाहा सोमाय स्वाहेति पूर्वाहोमीज्जुहोति। पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामति। पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्याह। यथायजुरेवैतत्'। इति। उत्तरौ त्वनुवाकौ दीक्षाविषयौ। तत्रापि ब्राह्मणम्—'अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षां जुहोति। पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामति। पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येकविꣳशिनीं दीक्षां जुहोति' इति॥

+ अत्र कस्मिंश्चित्पुस्तके 'आशितशब्दत्वम्' इति, कस्मिंश्चित्पुस्तके तु 'आशितृशब्दत्वम्' इति विद्यते तत्प्रामादिकमिति ज्ञेयम्।

---

१ क. ख. ङ. °क्षितशब्दत्व°। २ ग. च. °तृशब्दत्व°।

(अश्वमेधमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठकेऽष्टादशोऽनुवाकः) ।

भुवो देवानां कर्मणाऽपसर्तस्य पथ्याऽसि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छन्दसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन त्वा छन्दसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षयाम्यादित्येभिर्देवेभिर्देवतया जागतेन त्वा छन्दसा युनज्मि वर्षाभिस्त्वर्तुना हविषा दीक्षयामि विश्वेभिर्देवेभिर्देवतयाऽऽनुष्टुभेन त्वा छन्दसा युनज्मि (१) शरदा त्वर्तुना हविषा दीक्षयाम्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा युनज्मि हेमन्तशिशिराभ्यां त्वर्तुना हविषा दीक्षयाम्याऽहं दीक्षामरुहमृतस्य पत्नीं गायत्रेण छन्दसा ब्रह्मणा चर्तꣳ सत्येऽधाꣳ सत्यमृतेऽधाम् । महीमू षु मात्रामाणमिह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा (२) ॥

(आनुष्टुभेन त्वा छन्दसा युनज्म्येकान्नपञ्चाशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके प्रथमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमकाण्डे प्रथमप्रपाठकेऽष्टादशोऽनुवाकः) ।

कल्पः—' भुवो देवानां कर्मणेत्यृतुदीक्षाभिः कृष्णाजिनपारोहन्तमभिमन्त्रयते ' इति ॥ तत्र प्रथममन्त्रमाह—

(अश्वमेधमन्त्रकथनम्)

भुवो देवानामिति । हे दीक्षे त्वं देवानां संबन्धिना कर्मणस्तस्य यज्ञस्य संबन्धिनाऽपसा व्यापारेण भुवो युक्ता भव । त्वं पथ्याऽसि देवानां यज्ञस्य च हिताऽसि । अहं वसुभिर्देवैरभिर्वसुसंज्ञकैर्देवदेवतया दीक्षाभिमानिन्या गायत्रेण च्छन्दसा च त्वां युनज्मि त्वां युक्तां करोमि । तथा वसन्तेनर्तुना ताहितोऽहं त्वां हविषा दीक्षयामि संस्कृतां करोमि ॥

अथोत्तरांश्चतुरो मन्त्रानाह—

रुद्रेभिर्देवेभिरिति । एतेषु चतुर्ष्वपि मन्त्रेषु भुवो देवानामित्यादिभागमनुषज्य पूर्ववद्व्याख्येयम् ॥ अथ षष्ठमन्त्रमाह—

आऽहं दीक्षामिति । अहं यजमानो गायत्रेण च्छन्दसा ब्रह्मणा छन्दोरहितेन मन्त्रेण चानुगृहीतः सन्नृतस्य पत्नीं यज्ञस्य पालयित्रीं दीक्षां नियमविशेषरूपामारुहमारूढोऽस्मि । मदीयमृतं सत्ये स्थापयामि सत्यमप्यृते स्थापयामि । चिन्त्यमानं वस्तुतत्त्वमृतम् । उच्यमानं वस्तुतत्त्वं सत्यम् । अहं सर्वदा मनसा वस्तुतत्त्वं विचार्य पश्चाद्वक्ष्यामि । वाचाऽपि वस्तुतत्त्वमुच्चार्य पश्चादन्यदुस्तुतत्त्वं चिन्तयामीत्यर्थः ॥

अथ सप्तमाष्टमयोर्मन्त्रयोः प्रतीके दर्शयति—

महीमू ष्विति । महीमू षु मातरमित्येको मन्त्रः । सुत्रामाणं पृथिवीं द्यामित्यपरो मन्त्रः । तौ च मन्त्रौ वैश्वानरो न ऊत्येत्यनुवाके व्याख्यातौ ॥

कल्पः—' सायं धृतिषु हूयमानासु राजन्यो वीणागाथी गायति ' इति ॥

तानेतान्धृतिमन्त्रानाह—

इह धृतिरिति । एतच्चतुष्टयं पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे प्रथमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमाष्टके प्रथमप्रपाठक एकोनविंशोऽनुवाकः) ।

ईकाराय स्वाहेङ्कृताय स्वाहा क्रन्दते स्वाहाऽऽक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा

(अश्वमेधमन्त्रकथनम्)

व्यानाय स्वाहाऽपानाय स्वाहा संदयिमानाय स्वाहा संदिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपरस्यते स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा निषत्स्यते स्वाहा निषीदते स्वाहा निषण्णाय स्वाहा (१) आसिष्यते स्वाहाऽऽसीनाय स्वाहाऽऽसिताय स्वाहा निपत्स्यते स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते स्वाहा संमीलते स्वाहा संमीलिताय स्वाहा स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रबोत्स्यते स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा (२) वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा सꣳहास्यते स्वाहा संजिहानाय स्वाहोज्जिहानाय स्वाहा विवत्स्यते स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहोत्क्रꣳस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चङ्क्रमिष्यते स्वाहा चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूय-

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य
श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विर-
चिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
सप्तमकाण्डे प्रथमः प्रपाठकः ॥ १ ॥

(अथ सप्तमाष्टके द्वितीयः प्रपाठकः)

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

साध्या वै देवाः सुवर्गकामा एतꣳ षड्रात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै ते सुवर्गं लोकमायन्य एवं विद्वाꣳसः षड्रात्रमासते सुवर्गमेव लोकं यन्ति देवसत्रं वै षड्रात्रः प्रत्यक्षꣳ हैतानि पृष्ठानि य एवं विद्वाꣳसः षड्रात्रमासते साक्षादेव देवता अभ्यारोहन्ति षड्रात्रो भवति षडवा ऋतवः षट्पृष्ठानि (१) पृष्ठैरेवर्तूनन्वारोहन्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अन्नयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याऽऽज्ञसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धते पञ्चदशो भवतीन्द्रियमेवाव रुन्धते सप्तदशः (२) भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव जायन्त एकविꣳशो भवति

(षड्रात्रकथनम्)

प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै सदोहविर्धानिनं एतेन षड्रात्रेण यजेरन्नाश्वत्थी हविर्धानं चाऽऽग्नीध्रं च भवतस्तद्धि सुवर्ग्यं चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्या उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै प्राञ्चो यान्ति प्राङ्ङिव हि सुवर्गः (३) लोकः सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्त्या क्रोशन्तो यान्त्यवर्तिमेवान्यस्मिन्प्रतिषज्य प्रतिष्ठां गच्छन्ति यदा दश शतं कुर्वन्त्यथैकमुत्थानꣳ शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति यदा शतꣳ सहस्रं कुर्वन्त्यथैकमुत्थानꣳ सहस्रसंमितो वा असौ लोकोऽमुमेव लोकमभि जयन्ति यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम् (४) ॥

(पृष्ठानि सप्तदशः सुवर्गो जयन्ति यदैकादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे द्वितीयः प्रपाठकः)

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अहीनाः पञ्चरात्रान्ताः प्रथमे समुदीरिताः।
षड्रात्राद्या द्वितीयेऽत्र वक्ष्यन्तेऽस्मिन्प्रपाठके ॥

तत्र प्रथमेऽनुवाके षड्रात्रं विधत्ते-

साध्या वा इति । साध्यशब्दो देवगणविशेषवाची । अत्र तर्वत्र दर्शनं शास्त्रीयनिश्चयः । आहरणं सामग्रीसंपादनम् । यजनमनुष्ठानम् । यद्यप्ययं षड्रात्रोऽहीनत्वाद्यजतिचोदनाविधेयस्तथाऽप्यत्र केषांचित्तारस्वतसत्रधर्माणां सद्भावमभिप्रेत्य विद्वांस आसत इत्यासिचोदनया विहितः । ते च धर्मा आश्वत्थी हविर्धानं चेत्यादिना वक्ष्यन्ते ॥

एतमेव सत्रत्वोपचारमभिप्रेत्य प्रशंसति-

देवसत्रं वा इति । देवानां सत्रवत्प्रियत्वादिदं देवसत्रम् । तदेव सत्रवत्प्रियत्वं स्पष्टी क्रियते-सत्ररूपे द्वादशाहे यः पृष्ठ्यः षडहस्तस्मिन्षट्सु दिनेषु यानि पृष्ठस्तोत्राणि रथंतरबृहद्वैरूपवैराजशाक्वररैवतारूप्यैः सामभिर्निष्पाद्यानि एतान्यत्रापि षट्सु दिनेषु क्रमेण प्रत्यक्षमुपलभ्यन्तो यस्मादेवं तस्मादेवानां सत्रवत्प्रियत्वमुचितम् । एवं देवप्रियत्वं विदित्वाऽनुष्ठानेन बहुकालव्यवधानमन्तरेणैव देवताः प्रामोति ॥

अत्राहर्गतां षट्संख्यां प्रशंसति-

षड्रात्रो भवतीति । ऋतवो यथा षट्संख्याका एवं पृष्ठान्यपि षट्संख्याकानि । अतः पृष्ठैर्ऋतुद्वारा संवत्सरं प्राप्य तत्र प्रतितिष्ठन्ति ॥

एतेषु षट्सु पृष्ठस्तोत्रेषु प्रथमद्वितीययोरहनोरनुष्ठेये रथंतरबृहतीपृष्ठे ये स्तोत्रे ते विशेषेण प्रशंसति-

बृहद्रथंतराभ्यामिति । शब्दशास्त्रप्रोक्त एवात्र बृहच्छब्दस्य पूर्वनिपातः । अनुष्ठानं तु रथंतरस्यैव प्रथमम् । यन्ति स्तोत्रमनुतिष्ठेयुरित्यर्थः । अनयोः साम्नोर्लोकद्वयरूपत्वाल्लोकाभ्यामेव तदनुष्ठितं भवति । अपि चानुष्ठातारो लोकयोर्द्वयोः प्रतितिष्ठन्त्येव । किंचैते सामनी यज्ञस्याऽऽर्जवेन समाप्तिमापकौ मार्गावतस्ताभ्यामेव स्वर्गं प्राप्नुवन्ति ॥

अथ षट्संख्याकान्यहानि चोदकप्राप्तानि विस्पष्टं दर्शयति-

त्रिवृदग्निष्टोम इति । त्रिवृदादयः शब्दाः पूर्वोक्तपञ्चरात्रानुवाक इवात्रापि व्याख्येयाः । तत्र सत्रधर्मातिदेशाभावेन बहुयजमानकत्वनियमाभावादेकवचनेन निर्देशः । इह तु तन्नियमसद्भावाद्बहुवचनेन निर्देशः । प्रकृतिरूपे पृष्ठ्यषडहे त्रिवृदग्निष्टोमो रथंतरसामा प्रथममहः । पञ्चदश उक्थ्यो बृहत्सामा द्वितीयः ।

---

१ घ. च. °दनया वि° । २ ख. °नाया विष° । ३ ख. घ. च. °ण विशिष्टमु° ।

(षड्रात्रकथनम्)

सप्तदश उक्थ्यो वैरूपसामा तृतीयः। एकविंशः षोडशी वैराजसामा चतुर्थः। त्रिणव उक्थ्यः शाक्वरसामा पञ्चमः। त्रयस्त्रिंश उक्थ्यो रैवतसामा षष्ठः। तदिदं द्वादशाहान्तर्गतस्य पृष्ठ्यषडहस्य स्वरूपम्। तद्विकृतित्वादत्रापि तथाविधान्येवाहानि द्रष्टव्यानि॥

अथ सारस्वतसत्रधर्मानुवाकसमाप्तिपर्यन्तमतिदिदिक्षुस्तावदेकं धर्मं विधत्ते—

सदोहविरिति। ये यजमानाः सदोहविर्धानाभ्यां मण्डपाभ्यां युक्ताः षड्रात्रे प्रवर्तन्ते तेषां हविर्धानमाग्नीध्रं चेति मण्डपद्वयमाश्वत्थी भवतोऽश्वत्थकाष्ठनिर्मिते उभे कार्ये। तत्राश्वत्थकाष्ठं स्वर्गसाधनम्॥ धर्मान्तरं विधत्ते—

चक्रीवती इति। यथा रथस्य शकटस्य वा चक्रं तथा चक्रं ययोराग्नीध्रहविर्धानमण्डपयोस्ते चक्रीवती। अयमर्थः—चक्रयोरक्षं प्राक्षिप्य शकटाकारं कृत्वा तस्योपरि फलकान्यास्तीर्य तेषामुपरि भूमाविव मण्डपं निर्मातव्यमिति। ईदृशं च स्वर्गप्राप्त्यै भवति। रथेनेव चक्रयुक्तेन मण्डपेन गन्तुं शक्यत्वात्॥

धर्मान्तरं विधत्ते—

उलूखलेति। यथा काष्ठमयस्योलूखलस्य मूलमतिस्थूलं समतलं भवति तथा यूपमूलं कर्तव्यम्। एतच्च यत्र यत्र यूपो नीयते तत्र तत्र भूमौ खननमन्तरेणैव प्रतिष्ठानार्थम्॥ धर्मान्तरं विधत्ते—

प्राञ्चो यान्तीति। चक्रयुक्ताग्नीध्रादिभिः सह प्राङ्मुखा गच्छेयुः। स्वर्गलोकस्य प्राग्वर्तित्वेन प्रतिभानात्। एतच्चोक्तं सूत्रकारेण—'तस्मिन्संस्थितेऽध्वर्युः शम्यां प्राचः प्रास्यति स यत्र निपतति तदाहवनीयं तस्मिन्षट्त्रिंशतं प्राचः प्रक्रमान्प्रक्रामति तदाहवनीयः, चक्रीवन्ति सदोहविर्धानान्याग्नीध्रं चाऽऽश्वत्थी हविर्धानमाग्नीध्रं चोलूखलबुध्नो यूपः प्रकृष्येदुपोप्त एव नोपरवान्खनन्ति' इति। एकस्मिन्नहनि समाप्ते सति परेद्युः प्रातः शम्याक्षेपमात्रं गत्वा तत्राहरन्तरमनुष्ठाय तस्मिन्नपि समाप्ते ततः परेद्युरपि तथेत्यर्थः॥

धर्मान्तरं विधत्ते—

सरस्वत्येति। या सरस्वत्याख्या नदी तया सह तत्तीरे प्रतिदिनं गच्छेयुः। एष सरस्वतीतीरगतो मार्गो देवयानो देवान्प्रति क्षिप्तुं क्षमोऽतस्तमेव प्राप्नुवन्ति॥ धर्मान्तरं विधत्ते—

आक्रोशन्त इति। उत्साहातिशयेन क्रियमाण उच्चतमो ध्वनिराक्रो-

---

१ क. घ. ङ. मीयते। २ च. °न्तमनु°। ३ ख. °नुष्ठेयं त°।

शस्तं कुर्वन्तो गच्छेयुः । धनसंकोचमन्तरेण जीवनं वार्तिः । तद्वैपरीत्येन दारिद्र्यमवार्तिः । अवृत्तिरेवावार्तिः । तां चावार्तिमन्यस्मिन्वैरिणि प्रतिषज्य प्रतिष्ठितत्वेन संयुक्तां कृत्वा स्वयं धनसंपन्नां प्रतिष्ठां गच्छन्ति ॥

एवमनुतिष्ठतः कालावधिरूपं धर्मान्तरं विधत्ते-

यदा दश शतमिति । एकेन वृषभेण सहिता दश गावो यावति काले ऽपत्यप्रसवेन गवां शतं संपादयन्ति तावन्तं कालं पौनःपुन्येनानुष्ठाय तदनुष्ठानादुत्थानं कर्तव्यमनुष्ठानं समापयेदित्यर्थः । सोऽयमेकः समाप्तिकालः । गोशते सप्ते पुरुषस्य शतसंवत्सरायुष्ट्वान्नाडीशतकसंचारेण शतेन्द्रियत्वादा(च्चाऽऽ)युषीन्द्रिये च प्रतितिष्ठन्ति ॥

कालावधौ पक्षान्तरं विधत्ते-

यदा शतमिति । शतं गावो यदा पूर्ववत्सहस्रं संपादयन्ति सोऽयमेक उत्थानकालः । न चातीतपक्षेण सांकर्यं शङ्कनीयम् । प्रसववैचित्र्येण न्यूनाधिककालसंभवात् । गवां सहस्रसंपत्तौ सत्यां सहस्रसंख्याकैर्भोग्यजातैः समृद्धः स्वर्गः प्राप्तो भवति ॥

कालावधावेवापरं पक्षद्वयं विधत्ते-

यदैषामिति । एषां यजमानानां मध्ये कश्चिद्यदा प्रमीयेत, सोऽयमेक उत्थानकालः । यदा वा राष्ट्रक्षोभादिना शत्रुभिरेते यजमाना जिता अपहृतसर्वस्वा भवन्ति, सोऽयमेक उत्थानकालः । उक्तविधं यदुत्थानं तत्तीर्थं पापेभ्यस्तारकम् । तस्मात्तत्पर्यन्तं षड्रात्र आवर्तनीयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः)

कुसुरुबिन्दु औद्दालकिरकामयत पशुमान्स्यामिति स एतꣳ सप्तरात्रमाऽहरत्तेनायजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवारुन्ध य एवं विद्वान्त्सप्तरात्रेण यजते यावन्त एव ग्राम्याः पशु-

(सप्तरात्रकथनम्)

वस्तानेवाव रुन्धे सप्तरात्रो भवति सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै त्रिवृदग्निष्टोमो भवति तेजः (१) एवाव रुन्धे पञ्चदशो भवतीन्द्रियꣳ वा एव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै यत्प्रत्यक्षं पूर्वेष्वहःसु पृष्ठान्युपयुः प्रत्यक्षम् (२) विश्वजिति यथा दुग्धामुपसीदत्येवꣳ हि तममहः स्यान्नक्तरात्रश्चन स्याद्बृहद्रथंतरे पूर्वेष्वहःसूप यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव न यन्त्यथो अनयोरेव प्रति तिष्ठन्ति यत्प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तां दुहे तादृगेव ततू (३)॥

(तेज उपेयुः प्रत्यक्षं द्विचत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके षड्रात्रोऽभिहितः। अथ द्वितीये सप्तरात्रोऽभिधीयते॥

तमिमं विधत्ते—

कुसुरुविन्द इति। कुसुरुविन्दो नामबः। स चोद्दालकस्य पुत्रः। पशुमान्बहुपशुयुक्तः। गोछागाश्वाविपुरुषगर्दभोष्ट्राः सप्त ग्राम्याः॥

अथाहःसंख्यां प्रशंसति—

सप्तरात्रो भवतीति । ग्राम्या उक्ताः । द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनादेयाः सप्ताऽऽरण्याः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्य इति सप्त च्छन्दांसि । उभयस्य पशुसमूहस्य च्छन्दसः समूहस्य च ॥

अथाहर्विशेषान्विधत्ते—

त्रिवृदिति । यथासंभवं पञ्चरात्रषड्रात्रवच्च व्याख्येयम् । श्लोकेन पुरस्तात्सदसः स्तुवन्त्यनुश्लोकेन पश्चादित्यादयो महाव्रतधर्माः । तद्धर्मोपेतत्वं महाव्रतवत्त्वम् ॥ अत्र कंचिद्विशेषं विधत्ते—

यत्प्रत्यक्षमिति । सप्तमादहनः पूर्वाण्यहानि यानि सन्ति तेष्वहःसु रथंतरबृहद्वैरूपवैराजशाक्वररैवतानि पृष्ठानि यदि प्रत्यक्षमुपेयुः, अविकृतानि तथैव प्रयुज्यन्त इत्यर्थः । तथा सति सर्वपृष्ठ इति विधानाद्विश्वजित्यपि सप्तमेऽहनि यत्प्रत्यक्षमविकृतं यथा भवति तथा पृष्ठस्तोत्राणि प्रयोक्तव्यानि । एममुभयत्रापि[1] (वि)कृतप्रयोगे सति यथा लोके सकृद्दुग्धां गां पुनरपि दोग्धुं भ्रान्तः पुरुष उपासीदत्येवमिदमुत्तमं सप्तममहः स्यात् । तथा सत्ययं विश्वजिद्दुग्धगोवत्सिः[2]सारत्वेन कंश्चिदेकरात्रयागोऽपि न भवेत्, सप्तरात्रयागान्तर्भावोऽपि न संभवतीति किमु वक्तव्यम् । तस्माद्विश्वजितः सारत्वाय वैरूपादीनि पृष्ठान्यवस्थाप्य पूर्वेषु षट्स्वहःसु बृहद्रथंतरे उभे एव पृष्ठे पर्यायेणाऽऽवर्तनीये । इयं वावेत्यादि पूर्ववत् । पूर्वानुवाके निषेधकस्य नकारस्याभावादाभ्यामेव यन्तीत्यत्र लोकाभ्यामनुष्ठानं निवर्तयन्तीति व्याख्यातम् । इह तु नकारस्य सद्भावादाभ्यां लोकाभ्यां नापगच्छन्तीति व्याख्येयम् । पूर्वेष्वहःसु बृहद्रथंतरे द्वे एवानुष्ठाय विश्वजित्यविकृतानां सर्वेषां पृष्ठानामनुष्ठाने सति तथा लोके प्रत्तां क्षीरं दातुं प्रवृत्तां प्रसूतां गां पुरुषो दुग्धे तादृगेवैतद्भवति[3] ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयमपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

---

१ क. ङ. °पि प्रकृ° । २ ख. कदाचिदे° । ३ ख. घ. ङ. च. तु न, न° । ४ क. घ. ङ. च. °गेत° ।

(अष्टरात्रकथनम्)

(अथ सप्तमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः)।

बृहस्पतिरकामयत ब्रह्मवर्चसी स्यामिति स एतमष्टरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै स ब्रह्मवर्चस्यभवद्य एवं विद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरात्रो भवत्यष्टाक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धेऽष्टरात्रो भवति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे (१) त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै (२) ॥

(दिग्भ्य एव ब्रह्मवर्चसमव रुन्धेऽभिजित्यै)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः)

द्वितीये सप्तरात्रोऽभिहितः। अथ तृतीयेऽष्टरात्रोऽभिधीयते—

बृहस्पतिरिति। पूर्वत्र कुसुरुबिन्देन बाल्य एवाध्ययनकाले सप्तरात्रस्य गुरुमुखेन(ण) निश्चितत्वात्+मनाया ऊर्ध्वं दर्शनं नापेक्षितमिति नोक्तम्।

---

१ क. घ. ङ, च. °स्थ साश्रुमु°।

इह तु तदभावादपश्यदित्युक्तम् । गायत्र्या अष्टाक्षरत्वादिशामवान्तरदिशां च मिलित्वाऽष्टसंख्योपेतत्वात्संख्याद्वारा तदुभयमुखेन ब्रह्मवर्चसमाप्तिः ॥

अथाहर्विशेषान्विधत्ते—

त्रिवृदग्निष्टोम इति । पूर्वत्र पञ्चैव पृष्ठ्यषडहगतान्यहानि । षष्ठः पञ्चविंशोऽग्निष्टोमः । इह तु तस्य सप्तमत्वात्साऽहिकानि सर्वाण्यप्यहानि क्रमेणैवानुष्ठेयानि । अविरात्रोऽष्टमः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्त्स एतं नवरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै प्रजाभ्योऽकल्पत यर्हि प्रजाः क्षुधं निगच्छेयुस्तर्हि नवरात्रेण यजेतेमे हि वा एतासां लोका अकल्पन्ता अथैताः क्षुधं नि गच्छन्तीमानेवाऽऽभ्यो लोकान्कल्पयति तान्कल्पमानान्प्रजाभ्योऽनु कल्पते कल्पन्ते (१) अस्मा इमे लोका ऊर्जं प्रजासु दधाति त्रिरात्रेणैवेमं लोकं कल्पयति त्रिरात्रेणान्तरिक्षं त्रिरात्रेणामुं लोकं यथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यन्ते धृत्या अशिथिलभावाय ज्योतिर्गौरायुरिति ज्ञाताः स्तोमा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानाम् (२) गच्छति नवरात्रो भवत्यभिपूर्वमेवास्मिन्ते-

---

१ क. घ. ङ. सर्वत्र ।

(नवरात्रकथनम्)

जो दधाति यो ज्योगामयावी स्यात्स नवरात्रेण यजेत प्राणा हि वा एतस्याधृना अथैतस्य ज्योगामयति प्राणानेवास्मिन्दाधारोत यदीतासुर्भवति जीवत्येव (३) ॥

(कल्पन्ते प्रजानां त्रयस्त्रिंशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

तृतीयेऽनुवाकेऽष्टरात्रोऽभिहितः । अथ चतुर्थे नवरात्रोऽभिधीयते ॥

तमेतं विधत्ते—

प्रजापतिः प्रजा इति । न्यायक्षिप्तरां प्राप्नुवन् । प्रजाभ्योऽकल्पत प्रजानां क्षुन्निवारणाय समर्थोऽभूत् । अतो यस्मिन्काले प्रजा अन्नाभावेन क्षुधं नितरां प्राप्नुवन्ति तदा नवरात्रेण यजेत । इमे भूम्यादयो लोकाः सस्यनिष्पत्त्यभावेनैतासां प्रजानां क्षुन्निवारणार्थमसमर्था यदा भवन्ति तदानीमेताः क्षुधं नितरां प्राप्नुवन्ति । नवरात्रयागेने(णे)मान्लोकानेतासां प्रजानां क्षुन्निवारणसमर्थान्करोति लोकेषु सस्यं बहु निष्पद्यत इत्यर्थः । तान्समर्थान्लोकाननु यजमानोऽपि प्रजानां रक्षणे समर्थो भवति । ते च लोका यजमानार्थं समर्था भवन्ति यजमानस्येच्छानुसारेण सस्यं निष्पादयन्तीत्यर्थः । ततो यजमानः प्रजास्वन्नरसं स्थापयति ॥

अथ नवरात्रं विभज्य तद्वयवैस्त्रिभिर्लोकत्रयसामर्थ्यं दर्शयन्दृष्टान्तपुरःसरं प्रशंसति—

त्रिरात्रेणेवेमभिति । नवरात्रमध्ये योऽयमाद्यस्त्रिरात्रस्तेन भूलोकं क्षुन्निवारणसमर्थं करोति । स एव त्रिरात्रो यदा द्वितीयवारमावर्त्यते तदा तेनान्तरिक्षं समर्थं करोति । यदा तृतीयवारमावर्त्यते तेन तदा स्वर्गं समर्थं करोति । तत्र दृष्टान्तः—यथा लोके त्रिवृद्रज्जुं सिसृक्षुः पुरुष एकस्मिन्सूत्रे द्वितीयं सूत्रं योजयति ततस्तृतीयमपि योजयति एवमेतेन त्रिरात्रेण पुनः पुनरभ्यस्तेनैतस्मि-

लोके प्रथमं समर्थे सति ततो द्वितीयं तृतीयं च लोकं समर्थं करोति । एतच्च सर्वासां प्रजानां धारणाय लोकानामशैथिल्याय च संपद्यते ॥

इदानीमावर्त्यमानस्य त्रिरात्रस्यावयवभूतान्यहानि विधत्ते—

ज्योतिर्गौरायुरिति । ज्योतिरादिशब्दत्रयपूर्वकाः स्तोमशब्देनाभिधीयमानाः सामगैः सर्वैर्ज्ञातास्त्रयोऽहर्विशेषा विधन्ते । त एवात्राहर्विशेषाः कर्तव्याः ज्योतिष्टोमः प्रथममहः, गोष्टोमो द्वितीयमहः, आयुष्टोमस्तृतीयमहः । एते चाहर्विशेषा अत्रापि गवामयनप्रसङ्गे स्पष्टी भविष्यन्ति । ज्योतिष्टोमं प्रथममुपयन्ति गोष्टोमं द्वितीयमुपयन्त्यायुष्टोमं तृतीयमुपयन्तीति स्तुतिरभिधास्यते । एतेषां च स्तोत्रियावैषम्येण भेदः । अत एतस्मिन्प्रसङ्गे आम्नास्यते—' एकया गौरातिरिक्तः । एकयाऽऽयुरूनः ' । इति । ज्योतिष्टोमे यावत्यः स्तोत्रिया गोष्टोमे तावतीभ्योऽप्येकाऽधिका । आयुष्टोमेऽप्येका न्यूना । एवमस्यामपि शाखायां ज्ञाताः प्रसिद्धाः । सामशाखायां तु त्रिकद्रुका इति ज्ञाताः प्रसिद्धाः । त एतेऽत्रानुष्ठेयाः । ज्योतिरादीनां लोकत्रयरूपत्वात्तेष्वयं प्रतिदिष्टति । किंच प्रजानां मध्ये ज्ञानं गच्छति क्षुत्रिवर्तकोऽप्यमित्येवं सर्वैर्ज्ञातत्वं ज्ञानं रूपादि प्राप्नोतीत्यर्थः । ज्योतिर्गौरायुरित्ययमेव त्रिरात्र आवर्त्यमानो नवरात्रः संपद्यते । अत एव सूत्रकारेणोक्तम्—' शलली पिशङ्गेनान्त्र द्यकामो ज्योतिर्गौरायुर्गौर्ज्योतिरात्रिरात्रः ' इति । चतुर्विधेषु नवरात्रयागेष्विदानीमुच्यमानस्य शलली पिशङ्ग इत्येतन्नाम ॥

नवरात्रकर्तुं प्रशंसति—

नवरात्र इति । योऽयं ज्योतिरादिकस्त्रिरात्रः स एवाऽऽवर्त्यमानो नवरात्रो भवति । तदनुष्ठानेनाभिपूर्वमेवानुक्रमेणैव यजमाने तेजः संपादयति । सकृदनुष्ठितस्त्रिरात्रो द्विरनुष्ठितः षड्रात्रस्त्रिरनुष्ठितो नवरात्रः । एवं ते जोऽप्युत्तरोत्तरं वर्धत इत्यर्थः ॥

तदेवमन्नसंपादनद्वारा क्षुन्निवारणार्थं नवरात्रो विहितः । अथ दीर्घरोगनिवृत्त्यर्थमपि तमेव विधत्ते—

यो ज्योगामयावीति । ज्योगामयावी त्रिरकाले नरोगयुक्तः । तस्य पुरुषस्य प्राणा यदा धातुवैषम्याद्भृता धारयितुमशक्या भवन्ति तदानीमेतस्य पुरुषस्य ज्योगामयति दीर्घरोग उत्पद्यते । नवरात्रानुष्ठानेन प्राणा नस्मिन्धारयत्येव । अपि च रोगाधिक्यान्मूर्छया पूर्वं मुहूर्तमात्रं याममात्रं वा गतप्राणो भवति, तदाऽप्येतत्कर्तुरुत्साहदर्शनादयं पुनर्जीवत्येव ॥

(दशरात्रकथनम्)

ते श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः) ।

प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत्तमजुहोत्तेन दशरात्रमसृजत तेन दशरात्रेण प्राजायत दशरात्रायं दीक्षिष्यमाणो दशहोतारं जुहुयाद्दशहोत्रैव दशरात्रꣳ सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो य एवं विद्वान्दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्दशरात्रः (१) य एवं विद्वान्दशरात्रेण यजते प्रैव जायत इन्द्रो वै सद्दꣳदेवतानामिरासीत्स न व्यावृतमगच्छत्स प्रजापतिमुपाधावत्तस्मा एतं दशरात्रं प्रायच्छत्तत्तमाऽहरत्तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वान्दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति त्रिककुद्वे (२) एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविꣳशः ककुत्त्रयस्त्रिꣳशो य एवं विद्वान्दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो यजमान एकविꣳशो यजमानस्त्रयस्त्रिꣳशः पुर इतरा अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति

नैनमभिचरन्त्स्तृणुते देवासुराः संयत्ता आसन्ते देवा एताः (३) देवपुरा अपश्यन्यद्दशरात्रस्ताः पर्यौहन्त तेषां न कुतश्चनोपाव्याधोऽभवत्ततो देवा अभवन्पराऽसुरा यो भ्रातृव्यवान्त्स्यात्स दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोवोपस्तिं कुरुते जामि वै (४) एतत्कुर्वन्ति यज्ज्यायाꣳसꣳ स्तोममुपेत्य कनीयाꣳसमुपयन्ति यदग्निष्टोमसामान्यवस्तांच्च परस्तांच्च भवन्त्यजामित्वाय त्रिवृदग्निष्टोमोऽग्निष्टद्दाग्नेयीषु भवति तेज एवावरुन्धे पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवावरुन्धे त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवावरुन्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते (५) एकविꣳश उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्धत्ते सप्तदशोऽग्निष्टोमः प्राजापत्यासूपहव्य उपह्वयमेव गच्छति त्रिणवावग्निष्टोमावभितऐन्द्रीषु विजित्यै त्रयस्त्रिꣳश उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै (६) ॥

(प्राजापत्यो वा एष यज्ञो यद्दशरात्रस्त्रिककुद्वा एता वै जायत एकत्रिꣳशश्च)

(दशरात्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थेऽनुवाके नवरात्रोऽभिहितः। अथ पञ्चमे दशरात्रोऽभिधीयते ॥

तमेतं विधित्सुरादौ तदङ्गभूतं होमं विधत्ते—

प्रजापतिरिति। प्रजाः सिसृक्षुः प्रजापतिरादौ तत्साधनभूतं दशरात्रक्रतुमुत्पादयितुं तत्साधनभूतं दशहोत्रारूपं 'चित्तिः स्रुक्। चित्तमाज्यम्'। इत्यादिकं मन्त्रमारभ्यैकाण्डोक्तं निश्चित्य तेन मन्त्रेण हुत्वा क्रतुं च सृष्ट्वा प्रजा असृजत। तस्मिन्मन्त्रे चित्तिः स्रुगित्यारभ्य सामाध्वर्युरित्यन्तैर्वाक्यैर्होमनिष्पादकानां स्रुगादीनां दशानामभिधानादयं मन्त्रो दशहोता। यद्वा तैन्मन्त्राभिमानी पुरुषो दशवारमाहूतः प्रत्यशृणोत्। तस्मादयं दशहोता। तथा च होतृब्राह्मणे समाम्नायते—'आत्मन्नात्मन्नित्यामन्त्रयत। तस्यै दशमꣳ हूतः प्रत्यशृणोत्। स दशहूतोऽभवत्। दशहूतो ह वै नामैषः। तं वा एतं दशहूतꣳ सन्तम्। दशहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः'। इति। तमेतं मन्त्रं दशरात्रदीक्षार्थी जुहुयात्। तेन होमेन दशरात्रक्रतुं सृष्ट्वा तेन दशरात्रेण प्रजामुत्पादयति ॥

अथ दशसंख्यामुपजीव्य क्रमं प्रशंसति—

वैराजो वा इति। दशसंख्यायुक्ता विराट्संबन्धित्वाद्विराट्छन्दःसाध्यमन्नं प्राप्नोतीत्यर्थः ॥

प्रजापतिसृष्टत्वेन क्रतोस्तत्संबन्धमुपजीव्य प्रशंसति—

प्राजापत्या वा इति। प्रजोत्पादनलक्षणं फलमभिधाय पापक्षयलक्षणं फलमभिधातुं विधत्ते—

इन्द्रो वा इति। पुरा कदाचिदिन्द्रोऽन्याभिर्देवताभिः समान एवाऽऽसीत्, न तु व्यावृत्तिं प्राप्तवान्। भो इन्द्र गच्छ गच्छेत्येवमेव सर्वे देवा व्यवहरन्ति, न तु कश्चिद्राजन्त्वामित्थमिति व्यवहरति। ततः प्रजापतिमुपसेद्य तन्मुखाद्दशरात्रं क्रतुमवगत्य तदनुष्ठानेन व्यावृत्तिं प्राप्तवान्। एवमन्योऽप्येतदनुष्ठाय पाप्मना भ्रातृव्येण च वियोगं गच्छति ॥

विधास्यमानेषु दशस्वहःसु त्रयाणामहनां वृषभसंबन्धिककुत्साम्येनौन्नत्यं संपाद्य प्रशंसति—

---

१ ख. घ. ङ. च. तस्मिन्म°। २ ख. च. भिधत्ते।

त्रिककुद्वा इति । त्रीणि ककुत्सदृशान्युक्तस्तोमयुक्तान्यहानि यस्य दशरात्रस्य सोऽयं त्रिककुत् । किं तदुक्तमहस्त्रयमिति, तदुच्यते—यः पञ्चदश उक्थ्यो द्वितीयमहस्तदेकं ककुत्स्थानीयम । पथमतृतीययोस्त्रिवृदग्निष्टोमयोरहनोर्नीचस्तोमयुक्तत्वात् । यथा वृषसंबन्धिककुदः पुरोवर्ती गलभागः पश्चाद्वर्ती पृष्ठभागश्चेत्युभौ निम्नौ तद्वत् । तथैकविंश उक्थ्यः पञ्चममहः । तदेकं ककुत्स्थानीयं, चतुर्थषष्ठयोः सप्तदशैकथरूपयोरहनोर्निम्नस्थानीयत्वात् । तथा त्रयस्त्रिंश उक्थ्योऽष्टममहः । तदप्येकं ककुत्स्थानीयं, त्रिणवत्रयस्त्रिंशरूपयोः सप्तमनवमयोरहनोर्निम्नस्थानीयत्वात् । एतं महिमानमभिज्ञायानुष्ठाने यजमानः समानानां मध्ये त्रिगुणनौन्नत्येन प्रजापशुधनादिकलेन युक्तो भवति । य एते पञ्चदशैकविंशत्रयस्त्रिंशास्तत्स्थानीयो यजमान इतरा अहस्थानीयाः प्रजा यजमानस्य पुरस्थानीया भवन्ति । यथा पुरां सर्वासां राजा स्वामी, एवमन्यासां प्रजानां यजमानः स्वामी भवतीत्यर्थः ॥

पूर्वं दशरात्रस्यान्नपाप्तिः पापव्यावृत्तिश्चेति फलद्वयं दर्शितम् । अथाभिचारबाधनिवृत्तिरूपं फलं दर्शयितुं विधत्ते—

अभिचर्यमाण इति । यमुद्दिश्य शत्रुरभिचारं करोति सोऽयमभिचर्यमाणः । स चाभिचारबाधपरिहाराय दशरात्रेण यजेत । तस्मिन्ननुष्ठिते सति देवानां यानि पुराणि बहुविधशूरभटभृत्यपरिपूर्णानि तानि सर्वाणि स्वरक्षार्थं परितः स्थापयति । यः शत्रुरभिचरति सोऽप्येनं न हिनस्ति, तस्य हिंसितुमक्षमत्वात् । न कुतोऽप्यभिचारादेर्बाध एतस्य यजमानस्य संभवति ॥

अभिचारबाधनिवृत्तिफलमुक्त्वा शत्रुजयरूपं फलमभिधातुं विधत्ते—

देवासुराः संयत्ता इति । देवाश्चासुराश्च यदा युद्धोद्यतास्तदानीं देवा विजयोपायं विचार्य यो दशरात्रस्तद्रूपाणि देवपुराण्युपायत्वेन निश्चित्य परितस्तानि स्थापितवन्तः । तेषां वैरिणां[1] कुतोऽपि भ्रातृव्याभिबाधो न भवति । ततो देवा विजयं प्राप्ता असुराश्च पराजिताः । ततो भ्रातृव्यवान्यजमानोऽपि दशरात्रेण विजयी भवति । तदीयो भ्रातृव्यश्च पराभवति । किं चात्र ककुद्रूपस्य पञ्चदशस्तोमस्य समीपवर्ता त्रिवृदादिस्तोम उपस्तिः क्षीणो भवति । तेन भ्रातृव्यमेव क्षीणं करोति ॥

अथास्मिन्दशरात्रे कंचिद्विशेषं विधत्ते—

---

१ क. घ. ङ. च. वैरिणः ।

(दशरात्रकथनम्)

जामि वा इति। यथा लोके कश्चिद्राजामात्यादिर्महतीं संपदमनुभूय पश्चाद्दारिद्र्यमनुभवन्नत्यन्तमलसः क्लिष्टो भवति तथाऽत्रापि द्वितीयेऽहनि ज्यायांसं पञ्चदशस्तोमं ककुद्रूपमनुष्ठाय ततस्तृतीयेऽहनि कनीयांसं निम्नभागस्थानीयं त्रिवृत्स्तोममनुतिष्ठन्तीति यत्तदेतज्जामि कुर्वन्ति आलस्ययुक्तं कुर्वन्तीत्यर्थः। अत आलस्यपरिहाराय पञ्चदशोक्थ्यरूपाद्द्वितीयस्मादहन्येऽस्तत्वथमेऽहन्युपरिष्टाच्च तृतीयेऽहन्यग्निष्टोमसामानि यज्ञायज्ञीयरूपाणि कुर्यात्। तेनाऽऽलस्यं परिहृतं भवति। एवमेकविंशोक्थ्यरूपात्पञ्चमादहनः पूर्वोत्तरदिनयोः। यथाग्निष्टोमरूपादष्टमादहनः पूर्वोत्तरदिनयोरप्यग्निष्टोमसंस्थामयोजि(ज)कानि यज्ञायज्ञीयसामानि कुर्यात्। तेन संवत्राऽऽलस्यं परिहृतं भवति।

अथास्य दशरात्रस्य प्रथममहर्विधत्ते—त्रिवृदग्निष्टोम इति।

अग्निविषयो यज्ञायज्ञीयसामसाध्योऽग्निस्तोत्रगतः स्तोभो यस्य सोऽयमग्निष्टोमः। तस्यैवावान्तरविशेषः कश्चिदग्निष्टुदित्युच्यते। यत्र सर्वेष्वपि स्तोत्रेष्वग्निरेव स्तूयते स च सर्वोऽपि त्रिवृत्स्तोमेनैव युक्तः। सर्वत्राग्नेरेव स्तुत्यत्वादाग्नेयीष्वृक्षु सोऽग्निष्टुद्भवति। तदिदं प्रथममहः। तेन तेजः प्राप्नोति॥

अथ द्वितीयमहर्विधत्ते—

पञ्चदश इति। सर्वासामृचामिन्द्रविषयत्वादिन्द्रियप्राप्तिः।

अथ तृतीयमहर्विधत्ते—

त्रिवृदग्निष्टोम इति। सर्वासामृचां वैश्वदेवत्वेन पुष्टिप्राप्तिः।

अथ चतुर्थमहर्विधत्ते—

सप्तदश इति। तीव्रसोमो नाम कश्चिदुक्थ्यावान्तरविशेषः। यस्मिन्नाशीरर्थं गवां शतं दुहन्ति तमुक्थ्यमग्निष्टोमरूपतामापाद्यानुतिष्ठेत्। पञ्चदशसु स्तोत्रेष्वन्तिमस्तोत्रत्रये परित्यक्ते सति द्वादशस्तोत्रत्वेनाग्निष्टोमता संपद्यते। स्तोत्राणि च सर्वाणि प्राजापत्यास्वृक्षु प्रयोक्तव्यानि। तीव्रसोमत्वादन्नप्राप्तिर्ऋचां प्राजापत्यत्वात्प्रजोत्पत्तिश्च भवति। अथ पञ्चममहर्विधत्ते—

एकविंश इति। स्तोमस्यैकविंशत्वेन प्रतिष्ठाप्राप्तिः। ऋचां सौरीत्वादीप्तिधारणम्। अथ षष्ठमह

सप्तदशोऽग्निष्टोम इति उपहव्यो नाम कश्चिदेकाहविशेषः। तदनुष्ठानेनान्नोपहवं सर्वेषामनुज्ञां पूजाविषयां प्राप्नोति।

१ क. °दशरात्रयो°।

अथ सप्तमनवमे अहनी विधत्ते—

त्रिणवाविति । वक्ष्यमाणस्य त्रयस्त्रिंशाख्यस्याहनः पूर्वोत्तरदिनयोस्त्रिण-वस्तोमयुक्तावग्निष्टोमौ कार्यौ । तत्र सर्वा अप्यृच ऐन्द्र्यस्तेन विजयो भवति ।

तयोरहनोर्मध्यमषष्ठममहर्विधत्ते—

त्रयस्त्रिꣳश इति । ऋचां सर्वासां वैश्वदेवत्वेन प्रतिष्ठासिद्धिः ।

अथ दशममहर्विधत्ते—

विश्वजिदिति । गतम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः)।

ऋतवो वै प्रजाकामाः प्रजां नाविन्दन्त तेऽकामयन्त प्रजाꣳ सृजेमहि प्रजामव रुन्धीमहि प्रजां विन्देमहि प्रजावन्तः स्यामेति त एतमेकादशरात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै ते प्रजामवारुन्धत प्रजामविन्दन्त प्रजावन्तोऽभवन्त ऋतवोऽभवन्तदार्तवानामार्तवत्वमृतूनां वा एते पुत्रास्तस्मात् (१) आर्तवा उच्यन्ते य एवं विद्वाꣳस एकादशरात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजां विन्दन्ते प्रजावन्तो भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्धते सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तून्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति चतुर्विꣳशो भवति चतुर्विꣳशत्यक्षरा गायत्री (२) गायत्रं ब्रह्मव-

(एकादशरात्रकथनम्)

वर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारिꣳशो भवति चतुश्चत्वारिꣳशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप्त्रिष्टुभ्येवेन्द्रिये प्रति तिष्ठन्त्यष्टाचत्वारिꣳशो भवत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्त्येकादशरात्रो भवति पञ्च वा ऋतव आर्तवाः पञ्चर्तुष्वेवार्तवेषु संवत्सरे प्रतिष्ठाय प्रजामवरुन्धतेऽतिरात्रावभितो भवतः प्रजायै परिगृहीत्यै (३)।

(एते पुत्रास्तस्माद्वायव्येकान्न पञ्चाशच्च।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः)।

पञ्चमे दशरात्रोऽभिहितः। अथ षष्ठ एकादशरात्रोऽभिधीयते। तमेतं विधत्ते—

ऋतवो वा इति। वसन्ताद्यृत्वभिमानिनो देवाः पुरा प्रजामिच्छन्तोऽपि नालभन्त। ते चतुर्विधां कामनामकुर्वत। प्रजां स्रष्टुं समर्थाः स्यामेत्येका कामना। ततोऽवरोद्धुं नियन्तुं समर्थाः स्यामेति द्वितीया कामना। तत उत्पादनेन प्रजां लभेमहीति तृतीया कामना। ततो बह्वीभिः प्रशस्ताभिश्च प्रजाभिर्युक्ता अवतिष्ठेमेति चतुर्थी कामना। तेषामृतूनामेकादशरात्रेण तत्सर्वं सिद्धम्। ततस्ते वसन्ताद्या ऋतवोऽभवन्। प्रजारूपां भूतिमैश्वर्यं प्राप्ताः। यस्मादेते सर्वे प्राणिन ऋतूनां पुत्रास्तस्मादार्तवा इत्युच्यन्ते। ऋतुवदन्येषामपि यजमानानामेतत्तत्र सिध्यति। अस्य चैकादशरात्रस्य सत्रलक्षणभूतयाऽपि चोदनया विधानात्सत्रत्वं द्रष्टव्यम्। नह्यत्र साध्यानां षड्वात्र इव धर्मातिदेशार्थेयमासिचोदना। तद्वदृषीविदेशमानां धर्मविशेषाणामश्रवणात्। तस्मादयमृतूनामेकादशरात्रः सत्रम्। इतोऽन्ये शास्त्रान्तरविहिता एकादशरात्रा अहीनाः।

एतस्मिन्नृतूनामेकादशरात्रे प्रथममहर्विधत्ते—

ज्योतिरतिरात्र इति । पूर्वं ज्योतिर्गौरायुरतिज्योतिःशब्दाभिधेयो य एकाह उक्तस्तमेकाहमत्रातिरात्रसंस्थारूपं कुर्यात् । तथा सति प्रथममेव ज्योतिर्विधानात्स्वर्गं जिगमिषोर्यजमानस्य पुरस्तादेव प्रकाशः कृतो भवति । तच्च स्वर्गलोकप्रकाशनाय भवति ॥

अथ द्वितीयादिसप्तमान्तान्यहानि विधत्ते—

पृष्ठ्यः षडह इति । द्वादशाहे द्वितीयादिनमारभ्य सप्तमान्तेषु दिनेषु रथंतरादिभिः षड्भिः पृष्ठैर्युक्तानि षडहानि विहितानि । तानि चास्माभिः साध्यानां षड्रात्रप्रसङ्गेनोदाहृतानि । तेषां संघः पृष्ठ्यः षडहः, सोऽत्र कर्तव्यः । तथा सति षट्संख्याद्वारेणर्तुप्राप्तिः तद्द्वारा संवत्सरप्राप्तिः ॥

अथाष्टममहर्विधत्ते—

चतुर्विꣳश इति । चतुर्विंशस्तोमयुक्तो रथंतरसामा य उक्थ्यः सोऽयमष्टममहः । तथा सति चतुर्विंशतिसंख्याद्वारा गायत्रीप्राप्तिः । तद्द्वारा च ब्रह्मवर्चसप्राप्तिः ॥

अथ नवममहर्विधत्ते—

चतुश्चत्वारिꣳश इति । चतुश्चत्वारिंशस्तोमयुक्तो बृहद्रथंतरसामा य उक्थ्यः सोऽयमत्र नवममहः । तदनुष्ठानेन संख्याद्वारा त्रिष्टुप्प्राप्तिः । तद्द्वारा चेन्द्रियप्राप्तिः ॥

अथ दशममहर्विधत्ते—

अष्टाचत्वारिꣳश इति । अष्टाचत्वारिंशस्तोमयुक्तो बृहत्सामा य उक्थ्यः सोऽयमत्र दशममहः । तेन संख्याद्वारा जगतीं प्राप्य तद्द्वारा पशुषु प्रतितिष्ठन्ति । तान्येतानि त्रीण्यहानि सूत्रकारेण स्पष्टमुदाहृतानि—' तत्रस्त्रींश्छन्दोमानुक्थ्यानन्वहमुपयन्ति चतुर्विंशं चतुश्चत्वारिंशमष्टाचत्वारिंशमिति, रथंतरसामा प्रथमो बृहद्रथंतरसामा द्वितीयो बृहत्सामा तृतीयः, इति । छन्दोभिर्गायत्रीत्रिष्टुब्जगतीभिरक्षरसंख्याद्वारा मीयन्ते परिच्छिद्यन्त इति चतुर्विंशादिस्तोमाश्छन्दोमाः । तत्र चतुर्विंशस्तोमस्य विष्टुतिः सामब्राह्मण एवमाम्नायते—' अष्टाभ्यो हिं करोति स तिसृभिः स चतसृभिः स एकया, अष्टाभ्यो हिं करोति स एकया स तिसृभिः स चतसृभिः, अष्टाभ्यो हिं करोति स चतसृभिः स एकया स तिसृभिः, पशवो वै छन्दोमा यदष्टाभ्यो हिं करोत्यष्टाक्षराः पशवः ' इति ।

(एकादशरात्रकथनम्)

स एकस्मिंस्तृचे प्रथमपर्याये प्रथमामृचं त्रिः पठेत् । द्वितीयां चतुः पठेत् । तृतीयां सकृत्पठेत् । द्वितीयपर्याये सकृत्त्रिश्चतुश्चेति क्रमः । तृतीयपर्याये चतुः सकृत्त्रिश्चेति क्रमः । चतुश्चत्वारिंशस्तोमस्य विष्टुतिरेवमाम्नायते—' पञ्चदशभ्यो हिं करोति स तिसृभिः स एकादशभिः स एकया, चतुर्दशभ्यो हिं करोति स एकया स तिसृभिः स दशभिः, पञ्चदशभ्यो हिं करोति स एकादशभिः स एकया स तिसृभिः ' इति । अत्र प्रथमपर्याये त्रिरेकादशकृत्वः सकृदितिक्रमः । द्वितीयपर्याये सकृत्त्रिर्दशकृत्वः । तृतीयपर्याय एकादशकृत्वः सकृत्त्रिः । अष्टाचत्वारिंशस्तोमस्य विष्टुतिरेवमाम्नायते—' षोडशभ्यो हिं करोति स तिसृभिः स द्वादशभिः स एकया, षोडशभ्यो हिं करोति स एकया स तिसृभिः स द्वादशभिः, षोडशभ्यो हिं करोति स द्वादशभिः स एकया स तिसृभिः, अन्तो वा अष्टाचत्वारिंशः पशवच्छन्दोमाः ' इति । अत्र प्रथमपर्याये त्रिर्द्वादशकृत्वः सकृत् । द्वितीयपर्याये सकृत्त्रिर्द्वादशकृत्वः । तृतीयपर्याये द्वादशकृत्वः सकृत्त्रिः । एवं विंशैश्छन्दोमैरष्टमनवमदशमान्यहानि निष्पाद्यानि ।

वक्ष्यमाणमेकादशमप्यहर्हृदि निधाय तेन सहितमेकादशरात्रं प्रशंसति—

एकादशरात्र इति । अस्य क्रतोर्दृष्टारो वसव्याद्यृतुदेवताः(वाः) पञ्चसंख्याकास्तैर्दैवैः संपादिताः पुष्पोद्गमादय ऋतुसंबन्धिनः स्वभावाः पञ्चसंख्याकाः। एवं मिलित्वा दश संपद्याः । संवत्सर एकादशः । एतेन सर्वेष्वेकादशरात्रानुष्ठानेन प्रतिष्ठां प्राप्य पश्वात्मजां प्राप्नुवन्ति ।

अथैकादशमहर्विधत्ते—

अतिरात्राविति । एकोनविंशस्तोमयुक्तो योऽयमतिरात्र एकाहविशेषः सोऽयमत्रैकादशमहः । ज्योतिरतिरात्रो भवतीत्युक्तेन प्रथमेनाहना सह निर्देशादतिरात्राविति द्विवचननिर्देशः । सत्रलिङ्गस्योभयतोऽतिरात्रत्वस्य ख्यापनाय प्रजासाधनस्य क्रतोरुभयतोऽतिरात्रत्वे सति फलभूतायाः प्रजाया उभयतो रक्षा परिगृहीता भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

---

१ क. घ. ङ. च. एता । २ क. घ. ङ. च. °रिंशाः प° ।

(द्वादशरात्रकथनम्)

(अथ सप्तमाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः) ।

ऐन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यज्ञस्य वै कल्प्तिमनु प्रजाः कल्पन्त यज्ञस्याकल्प्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति न ज्यायांसं कनीयानति क्रामत्यैन्द्रवायवाग्रान्गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्याऽऽमयति प्राण ऐन्द्रवायवः प्राणेनैवैन॰ समर्धयति मैत्रावरुणाग्रान्गृह्णीरन्येषां दीक्षितानां प्रमीयेत (१) प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान्गृह्णीताऽऽनुजावरोऽश्विनौ वै देवानामानुजावरौ पश्वेवाग्रं पर्येतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रं परि णयतः शुक्राग्रान्गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषोऽन्तोऽन्तं मनुष्यः (२) श्रियै त्वा नि वर्तेतेऽन्तादेवान्तमा रभते न ततः पापीयान्भवति मन्थ्यग्रान्गृह्णीताभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनं ग्राहयति ताजगार्तिमार्छत्याग्रयणाग्रान्गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यः (३) भवत्यथ तन्न प्राप्नोत्युर इवैतद्यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापी-

(द्वादशरात्रकथनम्)

यान्भवत्युक्थ्यांग्रान्गृह्णातीमे चर्यमाणः सर्वेषां वा एतत्पात्राणामिन्द्रियं यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणाति प्र युंक्ते सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै (४) सरस्वती वाचैवैनमति प्र युंक्ते मा त्वत्क्षेत्राण्यरणानि गन्मेत्याह मृत्यावै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान्ग्रहान्गृह्णीयादामयाविनः प्राणान्वा एतस्य शुगृच्छति यस्याऽऽमयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव पूर्णान्ग्रहान्गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत्प्राणान्वा एतर्हि प्रजानाꣳ शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः प्राणानेव प्रजानाꣳ शुचो मुञ्चति ताजक्प्र वर्षति (५) ॥

(प्रमीयेत मनष्यं ऋध्यते यस्य पिता पितामहः पुण्यो वाग्वा एव पूर्णान्ग्रहान्पञ्चविꣳशतिश्च) ॥ ७ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाक एकादशरात्रोऽभिहितः । अथ सप्तममारभ्य दशमान्तेषु चतुर्वनुवाकेषु द्वादशरात्रोऽभिधीयते । तत्रास्मिन्सप्तमे काम्यग्रहानुष्ठानप्रकारा उच्यन्ते ।

तत्र प्रथममेकं प्रकारं विधत्ते—

ऐन्द्रवायवाग्रानिति । पूर्वे पितृपितामहादयो यादृश आचारे प्रवृत्तास्तादृश एवाऽऽचारे पुत्रपौत्रादीनां प्रजानां च प्रवृत्तिर्यथापूर्वत्वम् । एतत्कामय-

मानो द्विदेवत्यग्रहेष्वादावैन्द्रवायवग्रहं गृह्णीयात् । यद्यपि नित्यप्रयोगेऽपि तदग्रत्वमस्ति तथाऽपि कामसंयोगार्थं पुनर्विधानम् । यथाऽग्निहोत्रे दध्ना जुहोतीति सत्यपि नित्यविधौ दध्नेन्द्रियकामस्येति पुनर्विधानं तद्वत् । यज्ञस्य सम्यक्प्रवृत्त्या तत्फलभूतानां प्रजानां प्रवृत्तिः समीचीना भवति । यज्ञस्य विपर्यये प्रजानामपि विपर्ययो भवति । तस्मादैन्द्रवायवाग्रत्वे प्रजा यथापूर्वमेव प्रवर्तन्ते। न तु ज्यायांसं पितरं पितामहं वा कनीयान्कश्चिदप्यतिक्रामति ।

उक्तमेव प्रकारं रोगनिवृत्त्यर्थं विधत्ते—

ऐन्द्रवायवाग्रान्गृह्णीयादिति । यस्य पुरुषस्य रोगो भवति स प्राणेन वियुक्तो भवति, प्राणस्य निर्गन्तुमुद्युक्तत्वात् । ऐन्द्रवायवस्य प्राणरूपत्वं प्राण ऐन्द्रवायव इत्यादिश्रुतिबलादवगन्तव्यम् । वायुरपि हि प्राणविशेष एव । अत ऐन्द्रवायवस्य प्राथम्येन प्राणस्य समृद्धौ सत्यां रोगो निवर्तते ।

अथ नैमित्तिकं कंचिद्ग्रहप्रकारं विधत्ते—

मैत्रावरुणाग्रानिति । सत्ररूपे द्वादशाहे दीक्षितानां मध्ये यदि कश्चिन्म्रियेत तदा तस्मिन्मरणं निमित्तीकृत्येतरे दीक्षिताः प्रथमं मैत्रावरुणं गृहीत्वा पश्चादैन्द्रवायवं प्रयुञ्जीरन् । सर्वैः सहानुष्ठातुमुपक्रान्तत्वादेकस्मिन्नपि मृते सत्यन्येषां प्राणापानौ शिथिलाविव भवतः । मित्रावरुणयोः प्राणापानाभिमानित्वात्तदीयग्रहस्य प्राथम्ये सत्यादित एव प्राणापानौ परितः समादधते ।

अथापकर्षपरिहारार्थं प्रकारान्तरं विधत्ते—

आश्विनाग्रानिति । स्वयं सर्वेषामग्रजत्वेन पूज्यः सन्नप्यनुजवदवरो भूत्वा यः सर्वैस्तिरस्क्रियते सोऽयमानुजावरः । स चाऽऽश्विनं ग्रहं प्रथमं प्रयुज्य पश्चादैन्द्रवायवादीन्प्रयुञ्जीत । देवानां मध्येऽश्विनावानुजावरौ स्वयं देवत्वेन पूज्यौ सन्तावपि भिषक्त्वेनावरत्वमापन्नौ । अत एवान्यत्राऽऽम्नातम् । 'अपूतौ वा इमौ मनुष्यचरौ भिषजाविति' इति । तथाविधावश्विनौ पश्चात्कालान्तरेऽग्रमिव प्रथैतां श्रैष्ठ्यमेव प्राप्तवन्तौ । एतदपि तत्रैवाऽऽम्नातम्—'तौ बर्हिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनग्रहं गृह्णन्' इति । एवं सति य आनुजावरोऽस्त्येतस्य समानरूपभावत्वादश्विनौ देवता । तदीयग्रहस्याग्रत्वे सत्यश्वनावेवैनं यजमानं श्रैष्ठ्यं प्रापयतः ॥

अथ प्रतिष्ठार्थं प्रकारान्तरं विधत्ते—

शुक्रामानिति । यो नष्टश्रीकः सन्पुनः प्रतिष्ठां कामयते सोऽयं शुक्रमादौ

(द्वादशरात्रकथनम्)

गृह्णीयादिति । दीप्तिमत्त्वादसावादित्यः शुक्रः । एष एव प्रकाशानामन्तः काष्ठाऽन्तिमः । न ह्यादित्यादधिकः प्रकाशोऽस्ति । अतः शुक्राग्रत्वेन मनुष्यश्रिया अन्तं काष्ठां प्राप्य पूर्वस्माद्दारिद्र्यान्निवर्तते । प्रकाशपरमकाष्ठारूपादादित्यादेव संपत्परमकाष्ठां प्राप्नोति । तत ऊर्ध्वं कदाचिदपि दरिद्रो न भवति ॥

अभिचारहेतुं प्रकारं विधत्ते—

मन्थ्यग्रानिति । अभिचरन्मान्थिनमादौ गृह्णीयात् । परस्याऽऽत्मत्वपापणादिदमार्द्रपात्रम् । तदग्रत्वेन वैरिणं मृत्युगृहीतं करोति । स च वैरी तदानीमेव मृत्युं प्राप्नोति ॥

स्वकीयपित्रादिसमानोत्कर्षप्राप्त्यर्थं प्रकारान्तरं विधत्ते—

आग्रयणाग्रानिति । यस्य यजमानस्य पितृपितामहौ धनविद्यादिभिर्गुणैरुत्कृष्टौ, स्वयं तु तमुत्कर्षं यदि नाऽऽप्नोति, तादृश आग्रयणं प्रथमं गृह्णीयात् । पित्रादेरुत्कर्षे सति स्वयमुत्कर्षहीनः सभामध्ये वाक्पाण्डित्येनेतरव्यवहारेष्विन्द्रियसामर्थ्येन वियुक्तः, आग्रयणस्तु यज्ञस्योरःप्रदेशवत्सामर्थ्याधारो वागिन्द्रियवदुत्कर्षहेतुश्च । अतस्तदग्रत्वेनैनं यजमानं सदा पाण्डित्यरूपया वाचा व्यवहारान्तरसामर्थ्यरूपेणेन्द्रियेण च समृद्धं करोति । तत ऊर्ध्वं कदाचिदपि तदुभयहीनो न भवति ॥

परकीयाभिचारनिवृत्त्यर्थं प्रकारान्तरं विधत्ते—

उक्थ्याग्रानिति । यान्येतानि सोमपात्राणि सन्ति तेषां मध्ये यदुक्थ्यपात्रं तदिन्द्रियसामर्थ्योपेतम् । अतस्तस्याग्रत्वे सत्यभिचारकर्तारमेनं सर्वेणापि सामर्थ्येनातिक्रम्य स्वयमनुतिष्ठति ॥

अत्र मन्त्रविशेषं विधत्ते—

सरस्वत्यभि न इति । सोमरसग्रहणात्पूर्वं पठितव्या पुरोरुक्का च पुरोरुचमत्र सरस्वतीत्यादिकां पठेत् । मन्त्रोक्ता सरस्वती वाग्देवता । अतो वाचैवैनमभिचरितारमतिक्रम्यानुतिष्ठति । इयमृग्ब्राह्मणग्रन्थे द्वितीयकाण्ड उपहोमाख्ये प्रपाठक एवमाम्नाता—

' सरस्वत्यभि नो नेषि वस्यः । मा पस्फरीः पयसा मा न आधक् । जुषस्व नः सख्या वेश्या च । मा त्वत्क्षेत्राण्यरणानि गन्म ' । इति ॥

अस्यायमर्थः—हे सरस्वति नोऽस्मान्वस्यो वरिष्ठं प्राणधारणरूपं जीवनमभिनेष्याभिमुख्येन प्रापय । मा पस्फरीरस्मान्मा हिंसीः । मा न आधक्, अ-

स्मान्मा क्षीः। अपि तु सरूपा सरूपेण वेशा च प्रवेशनि(नी)यतया च नेऽस्माञ्जुषस्वास्मासु प्रविश्य सख्यं कुर्वित्यर्थः। किंच त्वत्प्रसादादरणानि क्षेत्राणि अरमणीयानि स्थलानि मा गन्म मा प्राप्नुयामेति॥

तमिमं चतुर्थपादमनूद्य व्याचष्टे—

मा त्वत्क्षेत्राणीति। तेन मन्त्रपाठेन मृत्युसंबन्धीन्यरणानि यानि स्थानानि तानि न प्रामोति न प्रमीयत इत्यर्थः॥

अथ रोगपरिहाराय प्रकारान्तरं विधत्ते—

पूर्णान्ग्रहानिति। यान्यैन्द्रवायवादीनि पात्राणि तानि सोमरसेन पूर्णानि यथा भवन्ति तथा रोगनिवृत्त्यर्थं गृह्णीयात्। यस्य रोगो वर्तते तस्य प्राणाञ्शुक्शोक उपद्रवः प्राप्नोति। ततः पूर्णानां ग्रहाणां प्राणरूपत्वादस्य यजमानस्य प्राणान्पूर्णग्रहैः शोकान्मोचयति। तथा सति यद्यपि मुहूर्तमात्रं गतप्राणस्तथाऽपि पुनर्जीवत्येव।

एतमेव प्रकारं पुनरपि वृष्ट्यर्थं विधत्ते—

पूर्णान्ग्रहान्गृह्णीयादिति। यदा स्वकाले वृष्टिर्न भवेत्तदा वृष्ट्यर्थमैन्द्रवायवादिपात्राणि सोमरसेन पूरणीयानि। यदा वृष्ट्यभावस्तदा प्रजानां प्राणा अन्नाभावाच्छोकेन प्रोष्यन्ते। ग्रहपूरणेन शोको निवर्तते। तदानीमेव यकर्षेण वर्षणात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
सप्तमोऽनुवाकः॥ ७॥

(अथ सप्तमाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः)।

गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीयमहः
स्तस्मात्प्रायणीयेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीयमहः
स्तस्माद्द्वितीयेऽहन्शुक्रो गृह्यते स्व एवैनमायतने

१ ख. व्यथ्यन्ते।

(द्वादशरात्रकथनम्)

गृह्णाति जागतो वा आग्रयणो जागतं तृतीयमहस्तस्मात्तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै (१) यज्ञमांपय्यच्छन्दांस्यायन्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदंशन्तत एवैनं पुनः प्र युङ्क्ते जगन्मुखो वै द्वितीयोऽग्निरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते रथंतरो वा ऐन्द्रवायवो रथंतरं पञ्चममहस्तस्मात्पञ्चमेऽहन्नै (२) ऐन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्हतो वै शुक्रो बार्हतꣳ षष्ठमहस्तस्मात्षष्ठेऽहन्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै द्वितीयं यज्ञमांपय्यच्छन्दांस्यायन्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदंशन्तत एवैनं पुनः प्र युङ्क्ते त्रिष्टुङ्मुखो वै तृतीयोऽग्निरात्रस्त्रैष्टुभः (३) शुक्रो यत्सप्तमेऽहन्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममहस्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णात्येतत् (४) वै तृतीयं यज्ञमांपय्यच्छन्दांस्यायन्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदंशन्तत एवैव पुनः प्र युङ्क्तेऽथो स्वमेव छन्दोऽनु

पर्यावर्तन्ते पथो वा एतेऽध्वपथेन यन्ति यैऽन्येनै-
न्द्रवायवात्प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य
यद्दशममहर्दशमेऽहन्नैन्द्रवायवो गृह्यते यज्ञस्य (५)
एवान्तं गत्वा पथात्पन्थामपि यन्त्यथो यथा वहीं-
यसा प्रतिसारं वहन्ति तादृगेव तच्छन्दाꣳस्यन्योऽ-
न्यस्मै लोकमभ्यध्यायन्तान्येतेनैव देवा व्यवा-
हयन्नैन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमह-
स्तस्मिन्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽयतने
नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनं
यत्पञ्चमम् (६) अहस्तस्मिन्नैन्द्रवायवो गृह्यते
तस्मादैन्द्रवायवस्याऽऽयतने सप्तमेऽहन्शुक्रो गृह्यत
आग्रयणस्य वा एतदायतनं यत्षष्ठमहस्तस्मिन्शुक्रो
गृह्यते तस्माच्छुक्रस्याऽऽयतनेऽष्टमेऽहन्नाग्रयणो
गृह्यते छन्दाꣳस्येव तद्वि वाहयति प्र वस्यसो विवा-
हमाप्नोति य एवं वेदार्धो देवताभ्य एव यज्ञे संविदं
दधाति तस्मादिदमन्योऽन्यस्मै ददाति (७)॥

(एतदे पञ्चमेऽहन्नैन्द्रुभ एतद्गृह्यते यज्ञस्य पञ्चममन्यस्मा एकं च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः)।

सप्तमेऽनुवाके द्वादशाहगताः काम्यग्रहप्रकारा उक्ताः। स च द्वादशाहो विविधः—समूढो व्यूढश्च। तत्र समूढप्रकारः सूत्रकारेण दर्शितः—'त्र्यनीकं त्वारुपास्याम ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहः। अथेतरेषां नवानामैन्द्रवायवाग्रं पृथममहः। अथ शुक्राग्रयाऽऽग्रयणाग्रमेवं विहिता विरूप-

(द्वादशाहराजकथनम्)

नीका परिवर्तते यद्व्यूढः ' इति । एवं समूढपकारमुक्त्वा व्यूढपकारोऽपि तैनैव दर्शितः—' व्यूढं त्वैन्द्रवायवाग्रौ प्रायणीयेदयनीयावथैतरेषां दशानामैन्द्रवायवाग्रं पथमम्हः । अथ शुक्राग्रपथं हे अग्रयणाग्रे अथैन्द्रवायवाग्रपथं हे शुक्राग्रे अथाऽऽग्रयणाग्रपथं हे ऐन्द्रवायवाग्रे ' इति । तत्रास्मिन्नहमेऽनुवाके व्यूढपकारोऽभिधीयते ।

तत्र प्रायणीयेदयनीयौ परित्यज्य यानीतराण्यहानि मध्यवर्तीनि दशसंख्याकानि तेषु प्रथमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते—

गायत्रो वा इति । यानि मुख्यानि च्छन्दांसि गायत्रीत्रिष्टुब्जगतीरूपाणि तेषां मध्ये गायत्री प्रथमा । अग्रत्वेन चात्रैन्द्रवायवशुक्राग्रयणा विकल्प्यन्ते । तेषां च मध्य ऐन्द्रवायवः प्राथम्येन प्रकृतावाम्नातः । ततः प्राथम्यसाम्यादैन्द्रवायवो गायत्रः । निरूपणीयानां दशानामह्नां मध्ये यत्प्रायणीयं प्रथममह्यहस्तदपि प्राथम्यस्य साम्याद्गायत्रम् । एवं च सति तस्मिन्प्रायणीये दशानां मध्ये प्रथमेऽहन्यैन्द्रवायव आदौ ग्रहीतव्यः । ऐन्द्रवायवस्य गायत्रत्वसाम्यात् । एवं च सति स्वसंबन्धिन्येवाऽऽयतने प्रथमाहःस्वरूपस्थाने तमैन्द्रवायवं गृह्णाति ।

अथ दशस्वहःसु द्वितीयेऽहनि शुक्राग्रत्वं विधत्ते—

त्रैष्टुभो वा इति । त्रिष्टुप्छन्दसः शुक्रस्य द्वितीयस्याहनश्च पूर्वन्यायेन द्वितीयत्वसाम्यं योजयित्वा व्याख्येयम् ।

अथ तृतीयेऽहन्याग्रयणाग्रत्वं विधत्ते—

जागतो वा इति । पूर्ववद्योजनीयम् ।

एतदेवाऽऽग्रयणाग्रत्वं प्रशंसति—

एतद्वै यज्ञमिति । यदाग्रयणाग्रं छन्दांस्याप्नोति गायत्र्यादिच्छन्दोरूपाणि त्रीण्यहानि व्याप्नोति त्रयाणामह्नामनेनाऽऽग्रयणाग्रत्वेन समाप्त्वादेतदेवाऽऽग्रयणाग्रत्वं यज्ञमापत्प्रथमव्यनीकारूपं त्रिरात्रं यज्ञं प्राप्नोति । त्रीण्यनीकान्यग्रत्वाभ्यैन्द्रवायवाग्रत्वशुक्रवग्रत्वाग्रयणाग्रत्वरूपाणि यस्यां क्रियायां सा क्रिया व्यनीका । तद्रूपं त्रिरात्रयज्ञोऽनेनाऽऽग्रयणाग्रत्वेन समाप्यते । किं चोत्तरस्मिंश्चतुर्थेऽहन्याग्रयण एवाऽऽदौ गृह्यते । यस्मादेवं तस्माद्यदैवाऽऽग्रयणा-

---

१ ख. °कल्प्यन्ते ।

त्रत्वे यज्ञमदृशंस्त्रिरात्रसमाप्तिं दृष्टवन्तस्तत एवाऽऽश्रयणात्रत्वादेनं यज्ञं पुनः प्रयुक्तवन्तो भवति तस्मादिदं प्रशस्तम् ।

अथ चतुर्थेऽहन्याश्रयणात्रत्वमेव विधत्ते—

जगन्मुखो वा इति । समूढे द्वादशाहे त्र्यनीका त्रिरावृत्ता । तत्रैकाऽऽवृत्तिः प्रथमस्त्रिरात्रो द्वितीयाऽऽवृत्तिर्द्वितीयस्त्रिरात्रः । स च यद्यपि समूढे द्वादशाह ऐन्द्रवायवोपक्रमत्वादैन्द्रवायवस्य च गायत्रत्वाद्गायत्रीमुखो भवति, तथाऽप्यत्र जगन्मुखो जगत्युपक्रमः कर्तव्यः । आश्रयणाश्च जागत इति पूर्वमेवोपपादितम् । तस्माच्चतुर्थेऽहन्याश्रयणात्रत्वे गृहीते सति स्वकीय एव स्थाने तद्गृहीतं भवति । अपि चाऽऽश्रयणात्रत्वं स्वकीयमेव जगतीछन्दोऽनुसृत्य पुनरावृत्तं भवति ।

अथ पञ्चमेऽहन्यैन्द्रवायवात्रत्वं विधत्ते—

राथंतरो वा इति । प्रकृतिरूपे ज्योतिष्टोमे यदि रथंतरसाम्ना सोमः स्यादैन्द्रवायवाग्नीन्गृह्णीयादित्यैन्द्रवायवात्रत्वं प्रति रथंतरसाम्नो निमित्तत्वश्रवणादैन्द्रवायवस्य राथंतरत्वम् । पञ्चमस्याह्नो रथंतरसंबन्धस्य शाखान्तरे प्रसिद्धत्वाद्राथंतरत्वम् । तस्मादैन्द्रवायवस्याह्नश्च राथंतरत्वसाम्यात्पञ्चमेऽह-न्यैन्द्रवायवः प्रथमं गृह्यते । तथा सत्येनमैन्द्रवायवं स्वकीय एव स्थाने गृह्णाति ।

अथ षष्ठेऽहनि शुक्रात्रत्वं विधत्ते—

बार्हतो वा इति । शुक्रग्रहस्य षष्ठस्याह्नश्च बृहत्सामसंबन्धः शाखान्तरे प्रसिद्धः । शेषं पूर्ववद्व्याख्येयम् ॥

तदेतच्छुक्रात्रत्वं प्रशंसति—

एतद्वै द्वितीयामिति । त्र्यनीकाया द्वितीयावृत्तिरूपस्त्रिरात्रो द्वितीयो यज्ञः । शेषमाश्रयणवाक्यवद्व्याख्येयम् ।

अथ सप्तमेऽहन्यपि शुक्रात्रत्वमेव विधत्ते—

त्रिष्टुङ्मुखो वा इति । यद्यपि समूढे तृतीयस्य त्रिरात्रस्याऽऽद्येऽहन्यैन्द्रवायवात्रत्वाद्गायत्रीमुख एवायं त्रिरात्रस्तथाऽप्यत्र त्रिष्टुङ्मुखः कर्तव्यः । शुक्रश्च त्रैष्टुभ इति पूर्वमेवोपपादितम् । तस्मात्सप्तमेऽहनि शुक्रः प्रथमो गृह्यते । शेषं पूर्ववद्व्याख्येयम् ।

अथाष्टमेऽहन्याश्रयणात्रत्वं विधत्ते—

(द्वादशरात्रकथनम्)

वायव्या आग्रयण इति । षष्ठकाण्ड आग्रयणग्रहब्राह्मणे वाय्वै देवेभ्योऽपाक्रामदित्युपक्रम्य साऽऽग्रयणं प्रत्यागच्छदित्युक्तत्वादाग्रयणस्य वायूपत्वमर्थवादान्तरे द्रष्टव्यम् । अतो वायूपत्वसामान्यादष्टमेऽहन्याग्रयणः प्रथमं प्रयोक्तव्यः ।

अथ नवमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते—

प्राणो वा इति । पञ्चमे ग्रहब्राह्मणे वाग्वा एषा यदैन्द्रवायव इत्युक्तत्वाद्वागिन्द्रियस्य च प्राणावान्तरभेदत्वादैन्द्रवायवस्य प्राणत्वम् । नवमस्याहनोऽपि प्राणत्वेन स्तुतिरन्यत्र द्रष्टव्या । अतः प्राणत्वसाम्यान्नवमेऽहन्यैन्द्रवायवः प्रथमं ग्रहीतव्यः ।

तदेतदैन्द्रवायवाग्रत्वं प्रशंसति—

एतद्वै तृतीयमिति । त्र्यनीकास्तृतीयावृत्तिरूपस्त्रिरात्रस्तृतीयो यज्ञः । शेषमाग्रयणवाक्यवद्व्याख्येयम् ।

अथ दशमेऽहन्यैन्द्रवायवाग्रत्वं विधत्ते—

पथो वा एत इति । द्वादशाहस्य प्रायणीयोदयनीययोर्मध्यवर्ती योऽयं दशरात्रस्तं दशरात्रं ये यजमाना ऐन्द्रवायवाग्रत्वादन्येन शुक्राग्रत्वादिना प्रतिपद्यन्ते प्रारभन्ते त एते यजमानाः पथः सकाशाद्भ्रष्टा अधिकेनापथा कुपार्गेण गच्छन्ति । तस्मादैन्द्रवायवाग्रत्वेनैव दशरात्र उपक्रान्तव्यः । तथैव ह्यनुवाकादौ वर्णितम् । यदेतद्दशममहरस्ति स एष ऐन्द्रवायवाग्रत्वेनोपक्रान्तस्य दशरात्ररूपस्य यज्ञस्यान्तः खलु वै समाप्तिभूमिरेव । ततः प्रथमदिनवदन्तिमदिनेऽप्यैन्द्रवायव एव प्रथमं ग्रहीतव्यः । तथा सति यज्ञस्य परिसमाप्तिपर्यन्तं कुमार्गं परित्यज्य सम्यङ्मार्गमेव प्राप्नुवन्ति । अपि च यथा लोके वहीयसा प्रौढभारवाहिना बलीवर्दसमूहेन युक्ता वणिजः प्रतिसारं वहन्ति पार्श्वद्वयगतान्क्षुद्रमार्गान्परित्यज्य प्रसिद्ध एव राजमार्गे बलीवर्दैः पङ्क्त्याकारो यथा भवति तथा नयन्ति तद्वदत्राप्यैन्द्रवायवोपक्रमोपसंहारौ द्रष्टव्यौ ।

तमिममैन्द्रवायवाग्रत्वादिरूपं व्यूढप्रकारं लोकप्रसिद्धविवाहसाम्येन प्रशंसति—

छन्दाꣳसीति । यथा लोके काश्यपगोत्रोत्पन्नाः पुरुषा विवाहार्थं भारद्वाजगोत्रोत्पन्नां कन्यकामभितो विचारयन्ति, भारद्वाजगोत्रोत्पन्नाश्चेतरां विचार्य तद्देव विवाहं कुर्वन्ति, एवमत्रापि च्छन्दोभिमानिनो देवाः स्वकीयानामैन्द्रवा-

यवाग्रहस्वादीनामन्योन्यस्य स्थानमभिध्यायन्तस्तानि तर्वाण्यैन्द्रवायवस्वादीन्ये-तेनैव पूर्वोक्तप्रकारेण विवाहयन्ति विवाहं कारयन्ति स्थानविपर्यासेन प्रापय-न्तीत्यर्थः ।

तथैन्द्रवायवाग्रयणयोरन्योन्यस्थानविपर्यासं दर्शयति—

ऐन्द्रवायवस्येति । समूढो हि द्वादशाहो व्यूढस्य प्रकृतिः । समूढे हि ग्रायणीयोदयनीयदशमाहानि परित्यज्यावशिष्टेषु नवसु दिनेषु व्यनीका विरा-वृत्ता । तत्र द्वितीयायास्व्यनीकाया मध्यवर्तिनो नवरात्रस्य चतुर्थेऽह्न्युपक्रान्त-व्यत्वात्तदहरैन्द्रवायवस्याऽऽयतनं, तस्मिन्नहनि पूर्वोक्तव्यूढप्रकारेण द्वितीय आग्रयणो गृहीतः । नवमं चाहः समूढ आग्रयणस्याऽऽयतनम् । तत्र व्यूढप्र-कारेण द्वितीय ऐन्द्रवायवो गृहीतः । सोऽयमैन्द्रवायवाग्रयणयोः परस्परं विवाहः ।

अथ शुक्रैन्द्रवाययोः परस्परं विवाहं दर्शयति—

शुक्रस्य वा इति । समूढगते नवरात्रे यत्सप्तममहस्तदेतद्द्वितीयाया व्यन-ीकाया मध्यवर्तित्वाच्छुक्रस्याऽऽयतनम् । तस्मिन्नहनि व्यूढप्रकारेणैन्द्रवायवो गृहीतः । यत्तु सप्तममहस्तदेतत्तृतीयाया व्यनीकायाः प्रथमदिनत्वादैन्द्रवाय-वस्याऽऽयतनम् । तस्मिन्नहनि द्वितीयवारमावर्त्यमानः शुक्रो गृहीतः । सोऽयं शुक्रैन्द्रवाययोर्विवाहः ।

अथ शुक्राग्रयणाग्रयोः परस्परं विवाहं दर्शयति—

आग्रयणस्येति । यदेतत्षष्ठमहस्तदेतद्द्वितीयाया व्यनीकाया अन्तिम-त्वादाग्रयणस्याऽऽयतनं, तस्मिन्नहनि व्यूढप्रकारेणाऽऽवर्त्यमानः प्रथमः शुक्रो गृहीतः । यत्त्वष्टममहस्तदेतत्तृतीयाया व्यनीकाया मध्यवर्तित्वाच्छुक्रस्याऽऽ-यतनं, तस्मिन्नहनि व्यूढप्रकारेणाऽऽग्रयणो गृहीतः । सोऽयं शुक्राग्रयणयो-र्विवाहः ।

एतद्वेदनं प्रशंसति—

छन्दाꣳस्येवेति । यः पुमानेवमैन्द्रवायवाग्र्यस्वादीनां विवाहं जानाति स तेन वेदेन च्छन्दोदेवतानामेव विवाहं कृतवान्भवति । स्वयं च धनिकतया-त्कुशादिवाहं प्राप्नोति । अपि च यज्ञानुष्ठानकाले देवताविषयमभिज्ञानं दधाति धारयति । यस्मादेवं छन्दसां विवाहः प्रवृत्तस्तस्माल्लोकेऽपीदं कन्यकारूपमपत्य-मन्यः पिताऽन्यस्मै जामात्रे ददाति ।

(द्वादशरात्रकथनम्)

अथ मीमांसा -

दशमाध्यायस्य पञ्चमपादे त्रयोविंशाधिकरणे चिन्तितम्—

श्यनीकायमैन्द्रवायवशुक्राग्रानुवादवा।
परिसंख्या वाऽर्थवादो वा विधिर्वा न हि त्रयम् ॥
वैयर्थ्येन त्रिदोषत्वाल्लक्षणापत्तिस्तथा।
विधिराग्रयणाग्रत्व इवानैमित्तिको हि सः ॥

अस्ति द्वादशाहे श्यनीका। ऐन्द्रवायवाग्नौ प्रायणीयोदयनीयौ दशमं वाहः। अथेतरेषां नवानामहनामैन्द्रवायवाग्रं प्रथममहः। अथ शुक्राग्रमथाऽऽग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाऽऽग्रयणाग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाऽऽग्रयणाग्रमिति। तत्र द्वादशाहगतेषु द्वितीयतृतीयचतुर्थेषु त्रिष्वहःसु क्रमेणैन्द्रवायवाग्रत्वशुक्राग्रत्वाग्रयणाग्रत्वानि विहितानि। तेष्वाद्यं रथंतरनिमित्तम्। द्वितीयं बृहन्निमित्तम्। एतच्च प्रकृतौ व्यवस्थितम्। तदुभयमत्र चोदकेन प्राप्तम्। तत्र चतुर्षां संशयः—अनुवादो वा परिसंख्या वाऽर्थवादो वा विधिर्वेति। तत्र प्राप्तत्वादनुवाद इति चेत्। न, वैयर्थ्यापत्तेः। तर्हि गुणान्तरपरिसंख्याऽस्त्विति चेत्। न, दोषप्रसक्तेः। चतुर्थेऽह्न्यप्राप्तस्याऽऽग्रयणाग्रत्वस्य विधिरित्यतस्य प्रशंसार्थोऽयमर्थवाद इति चेन्न। लक्षणावृत्तिप्रसङ्गात्। तस्मादाग्रयणाग्रत्वे यथा विधिस्त्वयेतरयोरपि द्रष्टव्यः। न च नाम्नत्वादविधिरिति वाच्यम्। तस्य विधेरनैमित्तिकत्वाभ्युपगमात्। रथंतरादिनिमित्तकयोरेव हि चोदकेन प्राप्तिः। प्रयोजनं तु द्वादशाहविकृतिषु यत्र क्वापि रथंतरादिनिमित्तत्वाभावेऽप्यैन्द्रवायवाग्रत्वासिद्धिः।

तत्रैवान्यच्चिन्तितम्—

व्यूढोऽपि प्रकृतिः किं वा विकृतिः स्यादि पृष्ठवत्।
विधिसाम्यादादिमोऽन्त्यो लिङ्गात्कामे विधेरपि ॥

द्विविधो हि द्वादशाहः—समूढो व्यूढश्च। तत्र समूढः पूर्वमुदाहृतः। अथ व्यूढ उदाहियते—ऐन्द्रवायवाग्नौ प्रायणीयोदयनीयौ। अथेतरेषां दशानामह्नामैन्द्रवायवाग्रं प्रथममहः। अथ शुक्राग्रमथ द्वे आग्रयणाग्रे। अथैन्द्रवायवाग्रमथ द्वे शुक्राग्रे अथाऽऽग्रयणाग्रमथ द्वे ऐन्द्रवायवाग्रे इति। तत्र समूढस्य प्रकृतित्वमविवादम्। यद्यद्व्यूढोऽपि किं प्रकृतिः किं वा विकृतिरिति संशये

१ ख. °स्कामवि°।

प्रकृतिरिति प्राप्तम् । कुतः । विधिसाम्यात् । यथा समूढप्रकारः कर्त्तव्यो विहितस्तथा व्यूढप्रकारोऽपि । न चात्र कश्चिद्विशेषोऽस्ति, येन तयोः प्रकृतिविकृतिभावो निश्चीयेत । न च प्रकारद्वयस्य प्रकृतित्वमदृष्टचरम् । रथंतरबृहत्पृष्ठयोर्ज्यौतिष्टोमप्रकारयोस्तदृर्शनादिति पूर्वः पक्षः । व्यूढः समूढस्य विकृतिः । कुतः । लिङ्गदर्शनात् । ' ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहः ' इति व्यूढे श्रूयते । एतच्च विकृतित्वे सति भवति नान्यथा । तथा हि व्यूढे प्रायणीयोदयनीयव्यतिरिक्तेषु दशस्वहःसु यच्चतुर्थं तदाग्रयणाग्रत्वादैन्द्रवायवस्याऽऽयतनम् । समूढे तु तदहर्नवानामह्नां मध्ये द्वितीयषष्ठीकादित्वादैन्द्रवायवाग्रम् । तच्च व्यूढस्य विकृतित्वा ं चोदकेन प्राप्यमाणं विधिर्तिसताग्रयणाग्रस्तुतयेऽनूद्यत इति युक्तम् । किं च यः कामयेत बहु स्यां प्रजायेयेति कामाय व्यूढो विधीयते । तथा च सति समूढवत्कर्त्तव्ये विध्यभावादर्थतरबृहत्पृष्ठवैकल्पेन विकल्पितप्रकृतित्वं नास्ति । ततः समूढस्य द्वादशाहस्य विकृतिः । अहर्गणेऽनयोरन्यतरस्यातिदेशः पूर्वपक्षिणः प्रयोजनम् । समूढस्यैवातिदेशः सि ान्तः।

तत्रैवान्यच्चिन्तितम्—

व्यूढे मक्षादिमन्त्राणामर्थानां च व्यतिक्रमः ।
मन्त्राणामेव वाऽऽद्यः स्यादविशेषेण कीर्तनात् ॥
छन्दसां व्यत्ययः प्रोक्तो नाथानां तेन मन्त्रणाः ।
गायत्र्याद्या विपर्यासस्तासां अर्थपुनिः प्रशस्तये ॥

व्यूढे द्वादशाहे मक्षपवमानतदुत्तमयम+ त्रयाधिकाक्षराणि चोदकप्राप्तानि । तत्र मक्षमन्त्रेषु सवनत्रयगतेषु गायत्रीछन्दसाभिष्टुप्छन्दसी जगतीछन्दस इति पदत्रयं श्रुतम् । तथा पवमानत्रयविषयेष्वन्यारोहमन्त्रेषु गायत्रीछन्दाभिष्टुप्छन्दा जगतीछन्दा इति श्रुतम् । तथा परिधिस्तावकेऽर्थवादे पठ्यते—'गायत्रो मध्यमः परिधिस्त्रैष्टुभो दक्षिणो जागत उत्तरः' इति । तथा कपालविषयं वाक्यं पठ्यते—' अष्टाकपालः प्रातःसवनीय एकादशकपालो माध्यंदिनीयो द्वादशकपालस्तृतीय(स्तार्तीय)सवनिकः ' इति । अत्राष्टत्वादिभिस्त्रिभिः संख्याभिर्गायत्र्यादिच्छन्दांसि तत्तत्पादाक्षरस्मृतिद्वारेणोपस्थाप्यन्ते । एवं स्थिते

+ न्यायमालायां मन्त्रेतिपदं न विद्यते ।

१ ख. च. °कृतिषु अं° । २ क. घ. ङ. °यत्रच्छ° । ३ क. घ. ङ. °यत्रच्छ° ।

(द्वादशरात्रकथनम्)

सवि व्यूढपकरणे छन्दोव्यतिक्रमः पठ्यते—'छन्दांसि वा अन्योन्यस्य लोकमन्वध्यायन्, गायत्री त्रिष्टुभमनुष्टुब्जगत्या जगती गायत्र्या' इति। तत्र संशयः—सोऽयं छन्दोव्यतिक्रमो मक्षप्रवमानपरिधिकपालरूपाणामर्थानामुभयविधमन्त्रगतच्छन्दोवाचिशब्दानां च कर्तव्यः, किं वा तेषां शब्दानामेवेति। तत्र मन्त्रगतानामेवेति विशेषाश्रवणात्सर्वत्र व्यतिक्रम इत्याद्यः पक्षः। तत्र गायत्रीशब्दनिर्दिष्टः प्रातःसवनीयो मक्षस्त्रिष्टुप्शब्दितस्य माध्यंदिनीयस्य मक्षस्य स्थाने[1]। स च तृतीयसवनीयस्य स्थाने, सोऽपि प्रातःसवनीयस्य स्थाने। तथा बहिष्पवमानो माध्यंदिनपवमाने, माध्यंदिनपवमानस्तृतीयसवने। आर्भवपवमानः प्रातःसवने। तथा पञ्चमः स्थविष्ठः परिधिर्दक्षिणतः, अणीयान्द्राघीयानुत्तरतः, अणिष्ठो ह्रस्विष्ठो मध्यतः। तथाऽष्टाकपालो माध्यंदिने सवने, एकादशकपालस्तृतीयसवने, द्वादशकपालः प्रातःसवने। सोऽयमर्थव्यतिक्रमः। मन्त्रद्वयशब्देष्वेवं योजनीयमिति प्राहुः—छन्दांसीति वाक्येऽर्थानां व्यतिक्रमो नोक्तः। अतो मन्त्रगतगायत्र्यादिशब्दानामेव व्यतिक्रमः। यस्त्वर्थेषु गायत्र्यादिशब्दप्रयोगः स प्रशंसार्थः। मक्षाद्यर्थानां मुख्यच्छन्दस्त्वाभावादिति राद्धान्तः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

अथ सप्तमाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः।

प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति

---

१ क. ख. ङ. °चत्रश्°। २ ख. च. °ने। माध्यंदिनीयो जागतस्य स्थाने, जागतो माध्यन्दिनस्य प्रातःसवनिकस्य स्थाने। तं°।

चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ यत् (१) अग्निष्टोमं पूर्वं प्रयुञ्जीरन्ब-हिर्वा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा मध्यतः कनीनिके प्रति दधति यो वे गायत्रीं ज्योतिःपक्षां वेद ज्योतिषा भासा सुवर्गं लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य एवं वेद ज्योतिषा भासा सुवर्गं लोकम् (२) एति प्रजापतिर्वा एष द्वादशधा विहितो यद्द्वादशरात्रो यावतिरात्रौ तौ पक्षौ येऽन्त-रेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्त्सद्ध वै सत्रेण स्पृणोति प्राणा वै सत्प्राणानेव स्पृणोति सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात्पृच्छन्ति किमेते सत्रिण इति प्रियः प्रजा-नामुत्थितो भवति य एवं वेद (३) ॥

(अग्निष्टोमौ यत्सुवर्गं लोक प्रियः प्रजानां पञ्च च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाके द्वादशाहस्य व्यूढसंस्कारो निरूपितः । अथ नवमे द्वादशा-हस्याहर्विशेषा उच्यन्ते ।

तत्राऽऽदौ द्वादशाहं विधत्ते—

प्रजापतिरिति । अथ प्रश्नोत्तरमुखेन(ण) पथममहर्विधत्ते—

ब्रह्मवादिनो वदन्तीति । अग्निष्टोमः प्रायणं प्रथममावी येषां सोमपा-

---

१ स. च °भावि ये° ।

(द्वादशरात्रकथनम्)

गानां तेऽग्निष्टोमप्रायणाः। अत एवास्य काण्डस्याऽऽद्यानुवाकेऽभिहितम्—'तस्मादाहुर्ज्येष्ठयज्ञ इति'। इति। एवं सति तमग्निष्टोमं परित्यज्य द्वादशाहस्य प्रथमेऽहनि कस्मात्कारणादतिरात्रः प्रयुज्यत इति ब्रह्मवादिनां प्रश्नः। तत्राभिज्ञा उत्तरमेवमाहुः—पुरुषस्थानीयस्य द्वादशाहयज्ञस्य चक्षुर्गोलकस्थानीयावतिरात्रौ। कनीनिकास्थानीयावग्निष्टोमौ। कृष्णमण्डलस्य मध्ये यदवान्तरं पृथक्मण्डलमतिकृष्णं तद्दर्शनशक्तिस्थानं, सेयं कनीनिकेत्युच्यते। एवं सति यदि यजमानाः प्रथममग्निष्टोमं प्रयुञ्जीरंस्तदानीमाधारभूतं गोलकं विना बहिरेवाऽऽकाशप्रदेशे कनीनिके स्थापयेयुः। तस्मात्कारणादतिरात्र एव प्रथमेऽहनि प्रयोक्तव्यः। तथा सति पुरुषरूपे द्वादशाहयज्ञे गोलकद्वयं प्रथमं स्थापयित्वा तन्मध्ये कनीनिकाद्वयं स्थापयन्ति।

तदेवं प्रथममहर्विधायानन्तरभावीनि दशाहानि पक्षिरूपं परिकल्प्य विधत्ते—

यो वै गायत्रीमिति। अष्टाक्षरपादां गायत्रीमष्टसंख्योपेतमुक्थरूपमहरष्टकं पक्षिरूपत्वेन परिकल्प्य तद्रूपां गायत्रीत्युच्यते ज्योतीरूपौ पक्षौ यस्या गायत्र्याः सा ज्योतिःपक्षा। तादृशीं यो यजमानो वेद स यजमानः पक्षरूपं ज्योतिरेव स्वर्गमार्गप्रदर्शनाय भासकं दीपकं कृत्वा तेनानुष्ठितज्योतिरारब्धेन प्रकाशेन स्वर्गं प्राप्नोति। कौ तौ पक्षौ किं तस्याः पक्षिरूपाया गायत्र्याः स्वरूपमिति तदुभयमुच्यते—द्वादशाहस्य मध्यमोदयनीयारूपे प्रथमोत्तमे अहनी विहाय मध्यवर्तिनो दशरात्रस्याऽऽद्यन्तयोरहनोरनुष्ठेयौ यावग्निष्टोमौ तौ पक्षस्थानीयौ। ये च तयोरग्निष्टोमयोरभ्यन्तरेऽष्टसंख्याकेऽहःस्वनुष्ठेया अष्टावुक्थ्याः सोऽयमुक्थ्यसंघः पक्षिरूपाया गायत्र्या आत्मा शरीरम्। एतादृशानि दशाहानि कुर्यादित्यर्थः। एषा वा इत्यादिः प्रतिपादितस्यार्थस्योपसंहारः।

सोऽयं द्वादशरात्रो द्विविधः—सत्रूपोऽहीनरूपश्च। तत्र सत्ररूपं तावद्विधातुं प्रस्तौति—

प्रजापतिर्वा इति। योऽयं द्वादशरात्रोऽस्ति सोऽयं द्वादशभिः प्रकारैराविर्भूतः प्रजापतिरेव। तस्य च प्रजापतेः पक्षिरूपत्वं परिकल्प्यते। पूर्वं पक्षत्वेन निरूपितयोरग्निष्टोमयोः समीपवर्तिनौ प्रथमद्वादशयोरहनोरनुष्ठेयौ प्रायणी-

---

१ ख. घ. ङ. च. पक्षरू°। २ ख. °पत्वेन प°। ३ क. घ. ङ. च. °पाख्याय°।

(द्वादशरात्रकथनम्)

योदपनीयाख्यौ यावतिरात्रौ तावपि पक्षाग्रस्थानीयत्वात्पक्षाविव । अग्निष्टोमसंस्थितीरतिरात्रयोः पक्षयोर्मध्ये येऽष्टावुक्थ्याः सोऽयमुक्थ्यसंघः पक्षिरूपस्य प्रजापतेः शरीरम्। एष एवंविधो द्वादशरात्रो यथोक्तकल्पनया द्वादशविधः । प्रजापतिरेव स्वकीयेन सत्ररूपयोगेन सत्रं स्तृणोति सच्छन्दवाच्यं यदस्ति तत्पीणयत्येव । किं तद्वाच्यमिति तदुच्यते—प्रजानां प्राणा एव सच्छन्दवाच्याः । जन्मान्तरेऽप्यनपायेन सद्भावात् । अतः सच्छन्दवाच्यान्प्राणानेव पीणयति ।

अथ प्रस्तुतं सत्ररूपं विधत्ते—

सर्वासां वा इति । ये यजमाना द्वादशाहरूपं सत्रमासतेऽनुतिष्ठन्ति । आसिधातुः सत्रविधेयेऽनुष्ठानमुपलक्षयति। ते यजमानाः सर्वासां प्रजानां प्राणैरेव निमित्तभूतैरनुतिष्ठन्ति । एतदनुष्ठानेनैव जगच्चिर्वाहहेतुना प्राणाः प्रीता भवन्तीत्यर्थः । यस्मात्तत्रानुष्ठानं प्राणानां प्रीतिहेतुस्तस्मात्सर्वे जना अनुष्ठातॄन्दृष्ट्वा किमेते सर्वेण इत्येवमादरेण साश्चर्याः पृच्छन्ति । अतः प्रशस्तमिदं सत्रमनुष्ठेयमित्यर्थः ।

अथ वेदनं प्रशंसति—

प्रियः प्रजानामिति । सत्रस्य वेदिता सर्वासां प्रजानां प्रियो भूत्वा जगत्पुरस्कृष्टोऽवतिष्ठते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः) ।

न वा एषोऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्रायणवदृष्वो ह वा एष आर्तव आसीत्ते देवा एतं वैश्वानरं पर्यौहन्त्सुवर्गस्य लोकस्य प्रभूत्या ऋतवो वा एतेन प्रजापतिमयाजयन्तेष्वाग्नेदिधि तदभ्रोति ह वा ऋत्विक्षु य एवं विद्वान्द्वादशाहेन यजते

(द्वादशरात्रकथनम्)

तेऽस्मिन्नेच्छन्त स रसमहं वसन्ताय प्रायच्छत् (१) यवै ग्रीष्मायौषधीवर्षाभ्यां व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्यां तेनेन्द्रं प्रजापतिरयाजयत्ततो वा इन्द्र इन्द्रोऽभवत्तस्मादाहुरानुजावरस्य यज्ञ इति स ह्येतेनाग्रेऽयजतेष ह वै कृणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकृणपमश्वकृणपं गौर्वा अन्नं येन पात्रेणान्नं बिभ्रति यत्तन्न निर्णेनिजति ततोऽधि (२) मलं जायत एक एव यजेतैको हि प्रजापतिराप्नोद्द्वादश रात्रीर्दीक्षितः स्याद्द्वादश मासाः संवत्सरः सांवत्सरः प्रजापतिः प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसोऽधि जायते चतुर्धा वा एतास्तिस्रस्तिस्रो रात्रया यद्वा दशोपसदो याः प्रथमा यज्ञं ताभिः सं भरति या द्वितीया यज्ञं ताभिरा रभते (३) यास्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्तरतः शुन्धते यो वा अस्य पशुमत्तिं मा॑स॑ सोऽत्ति यः पुरोडाशं॑ मस्तिष्क॑ स यः परिवापं॑ पुरीष॑ स य आज्यं॑ मज्जान॑ स यः सोम॑ स्वेद॑ सोऽपि ह वा अस्य शीर्षण्या निष्पदः प्रतिं गृह्णाति यो द्वादशाहे प्रतिगृह्णाति तस्माद्द्वादशाहेन न याज्यं पाप्मनो व्यावृत्त्यै (४)॥

(अयच्छद्दधिं रभते द्वादशाहेन चत्वारिं च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके दशमेऽनुवाकः)।

नवमेऽनुवाके द्वादशाहगतान्येकादशाहानि विहितानि। अथ दशमे द्वादशमहर्विधत्ते—

न वा एष इति। वैश्वानराख्येनाग्निना दृष्टत्वादतिरात्रो वैश्वानरः। अन्यत एकस्मिन्नेव भागे वैश्वानरशब्दवाच्योऽतिरात्रो यस्य द्वादशाहस्य सोऽयमन्यतोवैश्वानरः। आदावेवातिरात्रयुक्तो न त्ववसान इत्यर्थः। एतादृश एष द्वादशाहः स्वर्गलोकं संपादयितुं न समर्थः। कुतो न समर्थ इति तदुच्यते—एष द्वादशाह ऊर्ध्वाभिमुखोऽतिविस्तृत आसीत्। तस्यावसाननियामकाभावात्। अतोऽयमपर्यवसितः सन्स्वर्गस्य प्रभुर्नाऽऽसीत्। तदानीं देवा एतं वैश्वानरशब्दवाच्यमतिरात्रं पर्यौहन्परितोऽवसानस्थाने नियामकत्वेन स्थापितवन्तः। अतोऽतिरात्रेण नियमितत्वादेतावानयं द्वादशाह इति तत्परिमाणस्य पर्यवसितत्वात्स्वर्गलोकं संपादयितुमयं प्रादुर्भवति। तस्मादुपरिष्टादतिरात्रः कर्तव्य इति विध्युन्नयः।

अथैतस्य द्वादशाहस्याहीनरूपतां विधत्ते—

ऋतवो वा इति। पुरा कदाचिद्वसन्ताद्यृतवो देवा ऋत्वियजो भूत्वा प्रजापतिं यजमानमेतेन द्वादशाहेनायाजयन्। तेन द्वादशाहेन स प्रजापतिस्तेष्वृतुषु मध्येऽधिकां समृद्धिं प्रामोत्। तद्वदन्योऽप्येतेषु मध्ये द्वादशाहयागेन समृद्धिं प्राप्नोति। पूर्वत्र यजमानबहुत्वादासिचोदनया विधानाच्च द्वादशाहस्य सत्रत्वम्। इह तु यजमानैकत्वाद्यजतिचोदनया विधानाच्चाहीनत्वमिति विशेषः।

तमिमं द्वादशाहं प्रशंसितुं पूर्वोक्तामेव प्रजापतेः समृद्धिं प्रपञ्चयति—

तेऽस्मिन्नैच्छन्तेति। ते वसन्ताद्या ऋतवोऽस्मिन्समृद्धे प्रजापतौ भागमैच्छन्। स च प्रजापतिर्वसन्ताय रसमह सर्वमपि भोग्यवस्तुगतं सारं दत्तवान्। वसन्तकाले हि भोगातिशयः प्रसिद्धः। तथा यवादीन्धान्यविशेषान्ग्रीष्मादिभ्यः प्रायच्छत्। ते हि तत्तत्काले प्रभूता भवन्ति।

एवमुत्कर्षहेतुत्वेन द्वादशाहः प्रशस्तः। अथापकर्षनिवारकत्वेन द्वादशाहं प्रशंसति—

(द्वादशरात्रकथनम्)

तेनेन्द्रं प्रजापतिरिति । इन्द्र उत्तमत्वेनाग्रजभ्रातृवत्पूज्योऽपि सन्पुरा कदाजिदनुजवदवरः सर्वैर्देवैस्तिरस्क्रियमाणो भूत्वा तत्परिहारोपायं बोद्धुं प्रजापतिमुपसेवितवानित्येतावदत्र बहिरेव द्रष्टव्यम् । अत एवान्यत्राऽऽम्नातम् 'इन्द्रो वै देवानामनुजावर आसीत्स प्रजापतिमुपाधावत्' इति । स च प्रजापतिस्तेन द्वादशाहेनेन्द्रमयाजयत् । ततो द्वादशाहप्रभावादयमिन्द्रस्तदानीमिन्द्रोऽभवत्स्वकीयपरमैश्वर्यलक्षणमिन्द्रत्वं प्राप्तवान् । तस्माद्याज्ञिका आनुजावरस्य यज्ञ इति द्वादशाहमाचक्षते । यस्मादिन्द्र आनुजावरो भूत्वा तन्निवृत्तये प्रथममेतेन द्वादशाहेनायजत तस्मादानुजावरयज्ञत्वमस्योपपन्नम् ।

इदानीं सत्ररूपे द्वादशाहप्रयोगे दक्षिणानिषेधं निन्दयोच्यते—

एष ह वा इति । सर्वे हि ये यजमानास्त ऋत्विज इत्येवं यजमानत्वव्यवहारवदृत्विक्त्वव्यवहारोऽप्यस्ति । अत एव शास्त्रान्तरे 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' इत्यादावध्वर्युब्रह्मादिशब्दैर्व्यवह्रियन्ते । एवं सति ऋत्विक्त्वबुद्ध्या यागान्तरवदत्र यो दक्षिणां प्रतिगृह्णाति स विग्रहीता शवभक्षणेन यः प्रत्यवायस्तं प्राप्नोति । नात्र पञ्चनखशवो विवक्षितः, किंतु पुरुषाश्वादिशवः । किंचानेन यदन्नं भक्ष्यते तद्गौरेव भवति गोर्वासभक्षणसमः प्रत्यवायो भवतीत्यर्थः । किंचैनं प्रतिग्रहीतारमुद्दिश्य यस्मिन्कांस्यपात्रे भाण्डे वाऽन्नं धारयन्ति तत्पात्रं यदि शास्त्रोक्तमार्गेण शोधितं न भवेत्ततः शोधनाभावात्तच्छुक्रगृहेऽधिकं मलं जायते, तेन पात्रेण व्यवहर्तॄणामधिकः प्रत्यवायो भवतीत्यर्थः ।

एवं दक्षिणानिषेधेन सत्रप्रयोगं दृढीकृत्य यजमानैक्येनाहीनप्रयोगमपि दृढीकरोति—

एक एव यजेतेति । प्रजापतेरेकस्यैव समृद्धिरभूत्, न तु याजकानामनूनाम् । तस्मादेकस्य कर्तृत्वात्फलभाक्त्वाच्चाहीनत्वं सिद्धम् ।

अथ दीक्षाविशेषं विधत्ते—

द्वादश रात्रीरिति । द्वादशसंख्योपेतानां मासानां संवत्सररूपत्वात्संवत्सरस्य च प्रजापतिसृष्टत्वेन प्रजापतिरूपत्वादेव यजमानो द्वादशदीक्षायोगात्प्रजापतिरेव भवति । किंच यत्पूर्वं मातापितृभ्यां जननं तन्न मुख्यम् । किंतु यो यजमानो दीक्षारूपात्तपसोऽधिजायते एष एव हि जायते मुख्यजन्मवानित्यर्थः ।

अथोपसद्विशेषं विधत्ते—

चतुर्धा वा इति । अत्रानुष्ठेया द्वादशदिनसाध्या उपसदो याः तन्त्रि तास्तिस्रस्तिस्र एकैकराशिरूपेण चतुर्धा विभज्यन्ते । तत्र प्रथमराशिगताभिस्तिसृभिर्यज्ञसाधनसंपादनं भवति । द्वितीयराशिगताभिस्तिसृभिर्यज्ञमुपकल्पते । तृतीयराशिगताभिस्तिसृभिर्यज्ञपात्राणि शोधयति । चतुर्थराशिगताभिस्तिसृभिः स्वात्मनोऽन्तः शुद्धिं करोति ।

पुनरपि सत्रे दक्षिणाप्रतिग्रहलोभातिशयेन प्रसक्तिं निन्दति—

यो वा अस्येति । यः पुमान्द्वादशाहसत्रे दक्षिणां प्रतिगृह्णाति सोऽयं यदा स्वयं सोमयागं करोति तदा तदीययागे योऽन्य ऋत्विग्भूत्वा तस्य प्रतिग्रहीतुः संबन्धिनमग्नीषोमीयादिपशुहविःशेषमत्ति स ऋत्विक्पुरुषादिभक्षणजन्यं प्रत्यवायं प्राप्नुयात् । यस्तदीययागे पुरोडाशशेषमत्ति स मस्तिष्कं पुरुषादिशिरोगतं मांसं भक्षितवान्भवति । यः परिवापं लाजरूपहविःशेषमत्ति स पुरीषमेव भक्षितवान्भवति । यस्तदीययागे आज्येडाभागं भक्षयति स मज्जानं भक्षितवान्भवति । यस्तदीययागे सोमशेषं भक्षयति स स्वेदं भक्षितवान् भवति । किं च स प्रतिग्रहीता स्वयमप्यस्य द्वादशाहकर्तुः शीर्ष्णः शिरस्युत्पन्ना निष्पदो दीर्घैर्नखैश्छिन्दन्तीर्मलिनजातीः प्रतिगृह्णाति । अथ वैद्वाक्यं सर्वमहीनद्वादशाहविषयं व्याख्येयम् । तदानीं यो वा अस्य पशुपित्यादेरयमर्थः—यः कश्चिदृत्विग्भूत्वाऽहीनरूपद्वादशाहे पशुहविःशेषमत्ति सोऽयमस्य यजमानस्यैव मांसमत्ति । एवमुत्तरत्रापि योज्यम् । यस्मादहीनद्वादशाहे दक्षिणाप्रतिग्रहो निषिद्धस्तस्मात्कारणादृत्विग्भूत्वा द्वादशाहेन यजमानं न याजयेत् । तदेतदयाजनं पाप्मनो व्यावृत्त्यै संपद्यते । याजने तु शास्त्रोक्तं प्रायश्चित्तं कर्तव्यम् । सत्राहीनयोरेतावान्विशेषः—सत्रे तु स्वयम(स्या)पि यजमानस्वात्प्रतिग्रह एव नास्ति । अहीने तु विद्यमानस्य प्रतिग्रहस्य दुष्टत्वात्प्रतिगृह्य प्रायश्चित्तं कर्तव्यमिति ।

अत्र मीमांसा ॥

दशमाध्यायस्य षष्ठपादे षोडशाधिकरणे[1] चिन्तितम्—

अहीनसत्रयोर्लक्ष्मभिदा नास्त्यस्ति वा न हि ।
आवृत्तिसाम्यादाद्यः स्यादिज्यासिद्ध्यां तयोर्भिदा ॥

अस्ति द्वादशाहस्याहीनत्वं सत्रत्वं च । तत्रैतच्चिन्त्यते—किमहीनसत्रयो-

१ ख. च. °क्ष्मभेदो ना°। २ ख. च. °त्रैवं चिन्त्य°।

(द्वादशरात्रकथनम्)

लक्षणभेदो नास्त्युतास्तीति। तत्र नास्तीति तावत्पाप्तम्। कुतः, ज्योतिष्टोमावृत्तिरूपस्य समानत्वात्। यथा द्विरात्रादीनामेकादशरात्रान्तानामहीनानामावृत्तौ ज्योतिष्टोमस्वरूप तथा त्रयोदशरात्रादीनां सत्राणामिति प्राप्ते ब्रूमः—आसीरन्नुपेयुरिति चोदनाद्यं यजमानबहुत्वं च सत्रलक्षणं, यजतिचोदना यजमानबहुत्वचोदनाभावश्चाहीनलक्षणम्। वैदिकप्रयोगेषु तयोरव्यभिचारादिति राद्धान्तः।

तत्रैवान्यच्चिन्तितम्—

सत्रमेकः करोत्वाहो बहवः प्रकृतावि व।
एकः कुर्यादिहाऽऽसीरन्नित्युक्त्या बहवो मताः॥

द्वादशाहादिसत्रस्य ज्योतिष्टोमः प्रकृतिः। तत्र कर्त्रैक्याच्चोदकेन सत्रेऽपि कर्त्रैक्ये प्राप्ते प्रत्यक्षवचनाद्बहवोऽभ्युपेयाः।

तत्रैवान्यच्चिन्तितम्—

ऋत्विजोऽन्येऽत्र यष्टृभ्यः स्युस्त एवोत चोदकात्।
अन्ये यष्टार एव स्युः प्रत्यक्षवचनादिभिः॥

अत्र सत्रे किं यजमानेभ्यो व्यतिरिक्ता ऋत्विजः कर्तव्याः किं वा यजमाना एवर्त्विजः। ज्योतिष्टोमो यजमानादन्येषामृत्विक्त्वादत्राप्यन्ये स्युरिति प्राप्ते ब्रूमः—ये यजमानास्त ऋत्विज इति प्रत्यक्षवचनाद्दक्षिणानि सत्राणीत्याहुरिति दक्षिणाराहित्यश्रवणाद्ध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारमित्यादिना ब्रह्मोद्गात्रादिसमाख्यासंयोगदीक्षासंयोगयोरार्त्विज्ययाजमानद्योतकयोः प्रतिभानाच्च यजमाना एवर्त्विजः।

तत्रैव द्वितीयपादे दशमाधिकरणे चिन्तितम्—

ऋत्विजां वरणं सत्रे कार्यं नो वाऽत्र सोमवत्।
कार्यं मैवं स्वकर्मत्वात्कथार्था प्रकृतौ वृतिः॥

अग्निर्होतेत्यादिमन्त्रैः सोमे वरणमृत्विजामाम्नातम्। सोमवत्सत्रेऽपि तत्कार्यम्। अन्यथा वरणरहितानामृत्विक्त्वाभावात्सत्रं न सिध्येत्। अत एव तत्सिद्धये सत्रप्रकरणे ये यजमानास्त ऋत्विज इति स्वतः प्रवृत्तानपि यजमानानूह्य वरणं साध्यमृत्विक्त्वं तेष्वाधातव्यमिति विदधाति। तस्मादृत्विग्वरणं सत्रे कार्यम्। मैवम्। सत्रं ननुष्ठातॄणां सर्वेषां स्वकर्म। न हि स्वकर्मणि क्रयार्थं

१ ख. च. °त्वनियमाभा°। २ क. ख. °ग्निर्मे होते°। ३ ख. च. णराहितानाञ्च°।

याजकाः, त एते भिन्नकल्पा अपि मिलित्वा सप्तदशावराः सत्रेऽधिकारिणः स्युः। कुतः, न(ना)राशंसमुद्दिश्य तदङ्गत्वेन वसिष्ठादिविधानात्। तथा सति सत्रिणां मध्ये केषांचिद्वसिष्ठादिगोत्रजत्वेऽपि तदङ्गत्वं सिध्यतीति प्राप्ते ब्रूमः—वासिष्ठादीन्यजमानानुद्दिश्य न (ना)राशंसो विधीयते। तथा सति विधायकपदगतस्य धात्वर्थस्य विधेयत्वात्संनिकर्षः। वसिष्ठादिविधौ तु पदान्तरोपात्तत्वाद्विप्रकर्षः। अतो वसिष्ठाद्युद्देशेन नाराशंसविधौ न(ना)राशंसानुष्ठाने वसिष्ठादीनां सादृगुण्यमितरेषां तु वैगुण्यं, तनूनादनुष्ठाने तु वैपरीत्यम्। सर्वथा भिन्नकल्पानां सर्वेषां सादृगुण्यं न सिध्यति। अतः सादृगुण्याय तुल्यकल्पा एवाधिकारिणः।

तत्रैवान्यच्चिन्तितम्—

विप्रस्य सत्रं सर्वस्य वासिष्ठस्यैव वा भवेत्।
वैश्वामित्रस्यैव वाऽऽद्य ऋद्धीच्छुत्वेन मध्यमः॥
ब्रह्मत्वाय त्ववासिष्ठो ब्रह्मा वा स्तोमभागतः।
वैश्वामित्रसमानानामेव होतृत्वसिद्धये॥

ऋद्धिकामस्य सत्रं विहितम्। ब्राह्मणाश्च सर्वे ऋद्धिं वाञ्छन्ति। तस्माद्विप्रस्य सर्वस्य सत्राधिकार इत्याद्यः पक्षः। वासिष्ठो ब्रह्मा भवतीति वचनाद्वासिष्ठस्य ब्रह्मत्वासंभवाद्ब्रह्मत्वाय वासिष्ठस्याधिकारो वाच्यः। तथा सति भिन्नकल्पत्ववारणाय तत्तुल्यकल्पा एवाधिक्रियन्त इति द्वितीयः पक्षः। वासिष्ठो ब्रह्मेति वाक्याच्च वासिष्ठस्य ब्रह्मता। रश्मिरसि क्षयाय त्वेत्यादयो मन्त्राः स्तोमभागास्तानधीयानः स्वयमवासिष्ठोऽपि ब्रह्मतामर्हतीति स्तोमभागप्रशंसारूपोऽर्थवादे वासिष्ठो ब्रह्मेति पठितत्वात्। तस्माद्वैश्वामित्रो होतेति विहितस्य होतृत्वसिद्धये वैश्वामित्रस्य तत्समानकल्पानां चाधिकारो नान्येषाम्।

तत्रैवान्यच्चिन्तितम्—

अनाधातुश्च तत्किं वाऽऽधातुरेवाग्निमो यतः।
एकस्याग्निषु तत्सिद्धिर्न स्वाग्निष्वात्मनेपदात्॥

तत्तत्रमन्त्राधानरहितस्यापि संभवति। कुतः, सत्रिणां मध्ये कस्यचिदाहिताग्नित्वे तदीयेष्वग्निषु तेन सह पर्वूवैरनाहिताग्निभिरपि तस्य सत्रस्य साधयितुं शक्यत्वादिति चेन्नैवम्। आदधीतेत्यात्मनेपदमाधानफलस्य कर्तृगामिनां

१ ख. घ. च. °न नरा°। २ क. °न्त्राः सोमगताः स्तो°। ३ ख. घ. ङ. च. °धृतेर°।

(द्वादशरात्रकथनम्)

दर्शयति। तत्फलं चाग्नीनां कर्मयोग्यता। ततो येऽनाहिताग्नयो न तेऽधिकारिणः। यश्चाऽऽहिताग्निस्तस्यैव कर्मयोग्यता नान्यस्य। किं च सोमविकृतीनामिष्टिपूर्वकत्वं निर्णीतम्। इष्टिश्चाऽऽधानपूर्विका। तस्मादाधातुरेव सत्राधिकारः।

तत्रैवान्यच्चिन्तितम्—

जुह्वादयो यस्य कस्य कार्याः साधारणा उत।
अविरोधादग्रिमोऽन्त्यो मृतदाहे विरोक्ष्यते॥

सत्रिणां मध्ये यस्य कस्यचित्संबन्धिभिर्जुह्वादिपात्रैः सत्रं प्रयोक्तव्यम्। कुतः, अविरोधात्। अन्यदीयेष्वग्निष्वात्मनेपदं यथा विरुध्यते नैवमत्र विरोधः कश्चिदुपलभ्यत इति प्राप्ते ब्रूमः—यस्य जुह्वादयः स चेत्सत्रमध्ये म्रियते तदा मृतेन सह जुह्वादयो दह्यन्ते। 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च दक्षिणहस्ते जुहूमासादयन्ति' इत्यादिवचनैस्तदवगमात्। पात्रदाहे चावशिष्टः सत्रप्रयोगो विगुणः स्यात्। तस्मात्स धारणा भिन्ना एव जुह्वादयः सत्रे संपादनीयाः।

एकादशाध्यायस्य चतुर्थपादे पञ्चमाधिकरणे चिन्तितम्—

द्वादशाहे सदीक्षोपसदहःसु दिनानि किम्।
शतत्रयं द्वादश वा षट्त्रिंशद्वाऽग्निमो यतः॥
एकैककर्मणोऽङ्गत्वस्य ज्योतिष्टोमविकारता।
एकैकं तदनुष्ठातुं दिनानां पञ्चविंशतिः॥
अहनां द्वादशतामुत्या मध्यपक्षस्तदाऽपि किम्।
कार्या द्वादश साद्यस्काश्चतुष्काणामुत त्रिकम्॥
एकैकस्यैव यागस्य विकृतित्वादिहाऽऽदिमः।
अमुख्यकालाङ्गबाधाच्चतुष्टयं(ष्कं)भिद्यते त्रिधा॥
दीक्षा उपसदः सुत्याः प्रत्येकं द्वादश स्मृताः।
ततः साङ्गस्य मुख्यस्य षट्त्रिंशद्दिवसा मताः॥

द्वादशाहस्यैकैकमहः पृथक्कर्म। तस्मिंश्च सदीक्षस्य सोपसत्कस्य ससुत्यस्य

---

१ ख. च. °हति यं°। २ च. °दहे दिनमानकम्। ३ ख. च. °ष्ठानं दि°। ४ क. घ. ङ. च. °स्तथाऽपि। ५ ख. ङ. च. °द्यस्काश्च° । ६ क. घ. ङ. °भिद्यतां। ७ घ. ङ. श्रुताः। ८ ख. घ. °ताः। साङ्गस्य द्वादशाहस्य °।

ज्योतिष्टोमस्य विध्यन्तोऽतिदिष्टः । अतिदिष्टानां दीक्षाणामुपसदां च प्राकृतसंख्याबाधनाय पृथग्द्वादशत्वं श्रुतम् । ततो दीक्षोपसदर्थं चतुर्विंशतिर्दिनानि लुप्त्यार्थमेकं दिनमिति पञ्चविंशतिः । ईदृशस्य कर्मविशेषस्याहनां द्वादशभिरावृत्तिभिः शतत्रयं स्यादित्याद्यः पक्षः । तथा सत्यहनां द्वादशत्वं श्रूयमाणं बाध्येत । तस्माद्द्वादशैव दिवसा इति मध्यमः पक्षः । तदाऽपि दीक्षोपसद्भ्यामङ्गाभ्यामुपेतस्यैकैकस्याहनः साङ्गज्योतिष्टोमविकारत्वात्तत्सर्वं सद्य एव कर्तव्यमित्येकः पक्षः । प्रकृतौ दीक्षोपसदोर्मुख्यकालात्पागेवानुष्ठितत्वादिहापि तदैवानुष्ठानं प्राप्तम् । तच्च मुख्यकाले तदनुष्ठाने बाध्येत । तस्मादङ्गद्वयस्य प्रधानस्य च द्वादश दिनानि विभज्यानुष्ठानमिति पक्षान्तरम् । द्वादशाहस्य द्वादश दीक्षा द्वादशोपसद इत्यङ्गयोर्मुख्ये च पृ(ख्यवत्पृ)थग्द्वादशत्वश्रुत्या षड्विंशतिरिति सिद्धान्तः ।

नवमाध्यायस्य प्रथमपादे नवमाधिकरणे चिन्तितम्—

पत्नीसंयाजसंस्था किं सर्वेष्वन्त्येतरेषु वा ।
अविशेषादादिमोऽन्त्योऽसंस्थितत्वोक्तिलिङ्गतः ॥

द्वादशाहे श्रूयते ' पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते ' इति । तत्र द्वादशसंख्येषु सर्वेष्वप्यहःसु पत्नीसंयाजान्तं कर्मानुष्ठायावशिष्टं पिष्टलेपादिकं न कार्यम् । कुतः, एतावत्तु पत्नीसंयाजैः समाप्तिर्नेतरेष्विति विशेषनियामकाभावादिति चेन्नैवम् । असंस्थितत्ववाक्योक्तलिङ्गेन गुणभादहूनो यानीतराण्यहानि तेषु पत्नीसंयाजान्तत्वं व्यवतिष्ठते । तथाहि पत्नीसंयाजान्तान्यहानि संतिष्ठन्त इत्यस्य विधेः शेष एवमाम्नायते—' न बर्हिरनुपहरति असंस्थितो हि तर्हि यज्ञः ' इति । तत्र पत्नीसंयाजैः सर्वेषामहनां समाप्तावसंस्थितत्वं व्याहन्येत । तस्मात्संतिष्ठन्त इति शब्दो न समाप्तिवचनः, किं तर्हि सत्येव तदहः संबन्धिकर्तव्यशेषे व्यापारोपरममात्रं ब्रूते । अयं च कर्तव्यशेषश्वरमेऽहन्यनुष्ठातव्यः। तथा सति द्वादशानामहनां विहितः सहप्रयोगोऽनुगृहीतो भवति । तथा हि द्वादशाहेन यजेतेति सहप्रयोगो विहितः । अत एव दीक्षोपसदादिकं तन्त्रेणा-

---

१ ख. तत्रापि । घ. ङ. च. तथाऽपि । २ ख. तथैवा° । ३ ख. च. °सदो द्वादश मुत्या इ° । ४ च. °मुख्यस्य च । ५ क. घ. ङ. °संस्थत्वं स° । ६ ख. च. °ष्टं हारियोजनादिकं त्याज्यम् ।

(अश्वमेधमन्त्रकथनम्)

नुष्ठीयते। तत्र प्रथममहः पत्नीसंयाजान्तमनुष्ठाय पिष्टलेपादिकं बर्हिष्प्रहरणान्तं कर्तव्यत्वेनावस्थाप्य द्वितीयमहः प्रक्रमते। एवमुत्तरत्रापि। तत्र सर्वत्रावशिष्टं कर्तव्यमुत्तमेऽहन्यनुष्ठातव्यम्। तथा सत्युपक्रमैक्यवदुपसंहारस्याप्येकत्वाद्विहितः सहप्रयोगः सिध्यति। एकैकस्याहनः पत्नीसंयाजैः समाप्तौ भिन्नाः प्रयोगाः प्रसज्येरन्। यत्तु दशमस्याहनो मानसग्रहेण समापनं तद्वाचनिकम्। तस्मादुत्तमव्यतिरिक्तानामेवाहनां पत्नीसंयाजानन्तरं व्यापारोपरमः।

षष्ठाध्यायस्य द्वितीयपादे प्रथमाधिकरणे चिन्तितम्—

सत्रे फलांशः प्रत्येकं सर्वे वाऽऽद्यः समूहके।
कर्तृत्वादन्य एकैकस्यापि तत्त्वाद्बहुत्वतः॥

इदमाम्नायते—'ऋद्धिकामाः सत्रमासीरन्' इति। तत्र सत्रे बहूनां समुदायस्य कर्तृत्वमवगतम्। सप्तदशावराः सत्रमासीरन्निति श्रवणात् कर्तृत्वेन समुदायस्यैव फलित्वात्पुरुषाणां प्रत्येकं फलांश एव न तु सर्वं फलमेकैकस्येति चेन्नैवम्। एकैकस्यापि समुदायान्तःपातिनः कर्तृत्वसद्भावात्। अन्यथा समुदायस्यैकत्वेन सत्रमासीरन्निति श्रुतं कर्तृबहुत्वं नोपपद्येत। तस्मादेकैकस्य कर्तुः सर्वफलसद्भावात्सर्वफलकामिनामेवात्राधिकारो नत्वंशफलकामिनाम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
दशमोऽनुवाकः॥ १०॥

(अथ सप्तमाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः)।

एकस्मै स्वाहा द्वाभ्यां स्वाहा त्रिभ्यः स्वाहा
चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा
सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा
दशभ्यः स्वाहैकादशभ्यः स्वाहा द्वादशभ्यः स्वाहा
त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः
स्वाहा षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहाऽष्टाद-

---

१ ख. च. हारियोजनादिकं। २ घ. ङ. °शका°।

(अश्वमेधमन्त्रकथनम्)

शभ्यः स्वाहैकान्नविꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्नचत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्नषष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्नशताय स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा सर्वस्मै स्वाहा (१) ॥

(नवचत्वारिꣳशते स्वाहैकान्नैकविꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठक एकादशोऽनुवाकः) ।

दशमेऽनुवाके द्वादशाहस्यान्तिममहर्दीक्षाविशेषश्चोक्तः । अथ शिष्टेषु दशस्वनुवाकेष्वश्वमेधगता मन्त्रा उच्यन्ते ।

कल्पः—' संस्थितेऽह्न्यभित आहवनीयं षट्त्रिꣳशतमध्वर्यव उपतल्पानि[1]न्विमिन्वन्त्यस्तमित आदित्ये षट्त्रिꣳशतमध्वर्यव उपतल्पानि[2]रुख खादिरैः स्रुवैः सर्वाꣳ रात्रिमन्नहोमाञ्जुहुवत्याज्यं मधुतण्डुलान्पृथुकालाँजान्करम्बान्वानाः सक्तून्मसूस्यानि प्रियङ्गुतण्डुलानित्येकस्मै स्वाहेत्येवमनुवाकानामयुज आज्येन युजोऽन्नेनाऽऽज्येनान्ततः ' इति ।

तत्राऽऽद्यौ युजामयुजां च मिश्रितानां संघमाह—

एकस्मै स्वाहेति । अत्र त्वेकशब्देन सर्वात्मकः प्रजापतिरुच्यते । अत एव ब्राह्मणे समाम्नास्यते—' एकस्मै स्वाहेत्याह । प्रजापतिर्वा एकः । तमेवाऽऽप्नोति ' इति । अस्य च सर्वात्मकत्वाद्ये ये द्वित्वादिसंख्याविशिष्टाः पदार्थास्ते सर्वेऽपि प्रजापतिरूपाः तस्मात्प्रजापतिरूपानेतान्सर्वान्पदार्थानुद्दिश्येदं स्वाहुतमस्त्वित्येवं यथाम्नातं विꣳशदाहुतीर्जुहुयात् । अनुक्तपदार्थसंग्रहार्थं सर्वशब्दः ॥

---

१ च. °तल्प्यान्वि° । २ ख. °तल्पान° ।

(अश्वमेधगतमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

अथ सप्तमाष्टके द्वितीयप्रपाठके द्वादशोऽनुवाकः।

एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्टये स्वाहा नवषष्टये स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(एकस्मै पञ्चाशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः)।

अथायुजामेकाधिकानां संघमाह—

एकस्मै स्वाहेति। एतैरयुक्तसंख्यैर्मन्त्रैर्विंशत्याहुतीर्जुहुयात्। न चात्र पूर्वानुवाकेन सह पुनरुक्तिः शङ्कनीया। यथावचनमनुष्ठेयत्वात्। अथवाऽनन्तेषु प्रजापत्यवयवेषु यथामति विषयभेदः कल्पनीयः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अश्वमेधगतमन्त्रकथनम्)

अथ सप्तमाष्टके द्वितीयप्रपाठके त्रयोदशोऽनुवाकः)

द्वाभ्या॑ स्वाहा॑ चतुर्भ्यः॑ स्वाहा॑ षड्भ्यः॑ स्वाहा॑-
ऽष्टाभ्यः॑ स्वाहा॑ दशभ्यः॑ स्वाहा॑ द्वादशभ्यः॑ स्वाहा॑
चतुर्दशभ्यः॑ स्वाहा॑ षोडशभ्यः॑ स्वाहाऽष्टादशभ्यः॑
स्वाहा॑ विꣳशत्यै॑ स्वाहाऽष्टानवत्यै॑ स्वाहा॑ शताय॑
स्वाहा॑ सर्वस्मै॑ स्वाहा॑ (१) ॥

(द्वाभ्यामष्टानवत्यै षड्विꣳशतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके त्रयोदशोऽनुवाकः) ।

अथ द्विसंख्यामारभ्य युग्मसंख्यानां सैंघमाह—

द्वाभ्याꣳ स्वाहेति । तैरेतैर्मन्त्रैस्त्रयोदशाऽऽज्याहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतै-
त्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके चतुर्दशोऽनुवाकः) ।

त्रिभ्यः॑ स्वाहा॑ पञ्चभ्यः॑ स्वाहा॑ सप्तभ्यः॑ स्वाहा॑
नवभ्यः॑ स्वाहैकादशभ्यः॑ स्वाहा॑ त्रयोदशभ्यः॑
स्वाहा॑ पञ्चदशभ्यः॑ स्वाहा॑ सप्तदशभ्यः॑ स्वाहै-
काꣳ विꣳशत्यै॑ स्वाहा॑ नवविꣳशत्यै॑ स्वाहैकाꣳ
चत्वारिꣳशते॑ स्वाहा॑ नवचत्वारिꣳशते॑ स्वाहैकाꣳ
षष्ट्यै॑ स्वाहा॑ नवषष्ट्यै॑ स्वाहैकाꣳशीत्यै॑ स्वाहा॑
नवाशीत्यै॑ स्वाहैकाꣳ शताय॑ स्वाहा॑ शताय॑
स्वाहा॑ सर्वस्मै॑ स्वाहा॑ (१) ॥

(अश्वमेधगतमन्त्रकथनम्)

(त्रिभ्योऽष्टाचत्वारिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके चतुर्दशोनुवाकः) ।

अथ त्रिसंख्यामारभ्य विषमसंख्यानां संघमाह—

त्रिभ्य स्वाहेति । तैरेतमन्त्रैरेकोनविंशतिसंख्याका आहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके पञ्चदशोऽनुवाकः) ।

चतुर्भ्यः स्वाहाऽष्टाभ्यः स्वाहा द्वादशभ्यः
स्वाहा षोडशभ्यः स्वाहा विꣳशत्यै स्वाहा
षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै
स्वाहा (१) ॥

(चतुर्भ्यः षण्णवत्यै षोडश) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके पञ्चदशोऽनुवाकः) ।

अथ चतुःसंख्यामारभ्य चतुरुत्तराणां सप्तसंख्यानां संघमाह—

चतुर्भ्यः स्वाहेति । एतैर्मन्त्रैरष्टावाहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वे-
दीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके
पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके षोडशोऽनुवाकः) ।

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः

(अश्वमेधमन्त्रप्रकाशः)

स्वाहा वि॒श्॒शत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(पञ्चभ्यः पञ्चनवत्यै चतुर्दश) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके षोडशोऽनुवाकः) ।

अथ पञ्चसंख्यामारभ्य पञ्चोत्तराणां सप्तविंशसंख्यानां संघमाह—

पञ्चभ्यः स्वाहेति । एतैर्मन्त्रैः सप्ताऽऽहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके सप्तदशोऽनुवाकः) ।

दशभ्यः स्वाहा वि॒श्॒शत्यै स्वाहा त्रि॒श्॒शते स्वाहा चत्वारि॒श्॒शते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(दशभ्यो द्वावि॒श्॒शतिः) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके सप्तदशोऽनुवाकः) ।

अथ दशसंख्यामारभ्य दशोत्तराणां संघं दर्शयति—

दशभ्यः स्वाहेति । एतैर्मन्त्रैरेकैकयाऽऽहुतीर्जुहुयात् ॥

(अश्वमेधगतमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः)।

विꣳशत्यै स्वाहा चत्वारिꣳशत् स्वाहा षष्ट्यै स्वाहाऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा (१) ॥

(विꣳशत्यै द्वादश)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः)।

अथ विंशतिसंख्यामारभ्य विंशत्युत्तराणां संख्यानां संघमाह—विꣳशत्यै स्वाहेति। एतैर्मन्त्रैः षडाहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

अथ सप्तमाष्टके द्वितीयप्रपाठक एकोनविंशोऽनुवाकः।

पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा त्रिभ्यः शतेभ्यः स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहाऽष्टाभ्यः शतेभ्यः स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा (१) ॥

(पञ्चाशते द्वाविꣳशत्)।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठक एकोनविंशोऽनुवाकः)

अथ पञ्चाशत्संख्यामारभ्य पञ्चाशदुत्तराणां शतोत्तराणां च संघं दर्शयति-
पञ्चाशते स्वाहेति । एतैर्मन्त्रैर्द्वादशाऽहुतीर्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके विंशोऽनुवाकः) ।

शताय स्वाहा सहस्राय स्वाहाऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहाऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहाऽन्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा व्युष्टयै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(शताद्याष्टाविंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
द्वितीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

साध्याः षड्रात्रं कुसुरुबिन्दः सप्तरात्रं बृहस्पतिरष्टरात्रं प्रजापतिः क्षुधं नवरात्रं प्रजापतिर्दशहोतारमृतवं ऐन्द्रवायवाग्रान्गायत्रो वै प्रजापतिः स द्वादशरात्रं न वा एकस्मा एकस्मै द्वाभ्यां त्रिभ्यश्चतुर्भ्यः पञ्चभ्यो दशभ्यो विंशत्यै पञ्चाशतै शतायै विंशतिः ॥ २० ॥

(अश्वमेधगतमन्त्रकथनम्)

साध्या अस्मा इमे लोका गायत्रं वै तृतीयमेकस्मै

पञ्चाशत् ॥ ५० ॥

हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके

द्वितीयः प्रपाठकः ॥ २ ॥

(अथ सप्तमकाण्डे द्वितीयप्रपाठके विंशोऽनुवाकः)।

अथ शतसंख्यामारभ्योत्तरोत्तरदशगुणवृद्धियुक्तानां संख्यानां संक्रमाह—

शताय स्वाहेति। अत्र समुदादिशब्दाः सर्वे शतसहस्रादिशब्दवदुत्तरोत्तरदशगुणसंख्यावाचिन एव। परार्धं ब्रह्मण आयुष्यार्धस्याऽऽवृत्तानां मानुषसंवत्सराणामवधिभूता चरमसंख्या। न ह्यतोऽधिका काचित्संख्या कस्मिंश्चिद्विद्यते। परार्धस्य द्वैगुण्ये तु परार्धद्वयमित्येव व्यवहरन्ति। तस्मात्संख्यावृद्धिविश्रान्तिस्तत्र द्रष्टव्या।

कल्पः—'एतानुवाकान्पुनः पुनरभ्यासं रात्रिशेषं हुत्वोषसे स्वाहेत्युषसि व्युच्छन्त्यै स्वाहेति व्युच्छन्त्यां व्युष्टयै स्वाहेति व्युष्टायामुदेष्यते स्वाहेत्युपोदयमुद्यते स्वाहेत्युद्यति उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते हुत्वा' इति। अत्र व्युच्छन्त्यै स्वाहेति शाखान्तरमन्त्रः। इतरे त्वत्रत्या एव। अत्र ब्रह्मणो रात्र्यवसाने सति तदीया उषःकालादयोऽत्र विवक्षिताः। यद्वा मनुष्यप्रसिद्धाः। एवं सत्युषःशब्देन प्रभातोपक्रम उक्तः। व्युष्टिशब्देन सम्यक्प्रभातदशोक्ता। उदेष्यच्छब्देन सूर्योदयात्प्राचीनसमीपदशा। उद्यच्छब्देनोदयकालीनदशा। उदितशब्देनोदयादूर्ध्वभाविनी दशा। स्वर्गशब्देन द्युलोको विवक्षितः। लोकशब्देन प्रकाशयुक्तो भूरादिः। अत्रानुक्तसर्वविशेषसंग्रहार्थं सर्वस्मै स्वाहेत्यन्ते समाम्नातम्।

अत्र प्रपाठकस्य विनियोगसंग्रहः—

षड्रात्रः स्याद्द्वितीयाद्ये द्वितीये सप्तरात्रकः।
अष्टरात्रस्तृतीये स्याच्चतुर्थे नवरात्रकः॥ १॥
दशरात्रः पञ्चमेऽथ स्यादेकादशरात्रकः।
षष्ठे काम्यग्रहाः सप्तमे सङ्क्षेऽष्टमे श्रुतः॥ २॥

(पूर्वोक्तद्वादशाहशेषविशेषकथनम्)

द्वादशाहगतानि स्युरहान्येकादशानि तु ।
नवमे दशमे तस्य शेषः सर्वं उदीरितः ॥ ३ ॥
अथाश्वमेधशेषाः स्युर्मन्त्राः सर्वान्नहोमगाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥

(अथ सप्तमाष्टके तृतीयः प्रपाठकः)

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

प्रजवं वा एतेन यन्ति यद्दशममहः पापावहीयं वा एतेन भवन्ति यद्दशममहर्यो वै प्रजवं यतामपथेन प्रतिपद्यते यः स्थाणुꣳ हन्ति यो भ्रेषं न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स हीयते तस्मै य उपहताय ब्याह तमेवान्वारभ्य समश्नुतेऽथ यो ब्याह सः (१) हीयते तस्माद्दशमेऽहन्नविवाक्य उपहताय न ब्रूयमथो खल्वाहुर्यज्ञस्य वै समृद्धेन देवाः स्वर्गं लोकमायन्यज्ञस्य [illegible] रान्परोऽभाव-

(पूर्वोक्तद्वादशाहशेषविशेषकथनम्)

यन्निति यत्खलु वै यज्ञस्य समृद्धं तद्यजमानस्य यद्व्यृद्धं तद्ब्रह्मणस्तृव्यस्य स यो वै दशमऽहन्नविवाक्य उपहन्यते स एवातिं रेचयति ते ये बाह्या दृशीकवः (२) स्युस्ते वि ब्रूयुर्यदि तत्र न विन्देयुरन्तः सदसाद्व्युच्यं यदि तत्र न विन्देयुर्गृहपतिना व्युच्यं तद्यजमानमेवाथ वा एतत्संपराञ्चिया ऋग्भिः स्तुवन्तीयं वै सर्वतो राज्ञी यद्वा अस्याः किं चाचन्ति यदानृचुस्तेनेयꣳ संपराज्ञी ते यदेव किं च वाचाऽऽनृचुर्यदृतोऽध्यर्चितारः (३) तदुभयमाप्त्वाऽवरुध्योत्तिष्ठामेति तामिमंनसा स्तुवते न वा इमामश्वरथो नाश्वतरीरथः सद्यः पर्याप्तुमर्हति मनो वा इमाꣳ सद्यः पर्याप्तुमर्हति मनः परिभवितुमथ ब्रह्म वदन्ति परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजुꣳष्यथैतस्यैवान्तो नास्ति यद्ब्रह्म तत्प्रतिगृणत आचक्षीत स प्रतिगरः (४) ॥

(व्याहृ स दृशीकवोऽध्यर्चितारः स एकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे तृतीयः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
षड्भाद्या द्वादशाहपर्यन्ता वर्णिताः क्रमात् ।
द्वितीयेऽथ तृतीयेऽस्मिन्सत्रन्यासमुदीर्यते ॥

(पूर्वोक्तद्वादशाहशेषविशेषकथनम्)

तत्र प्रथममनुवाकेन पूर्वोक्तद्वादशाहशेषत्वेन दशमेऽहनि कियानपि विशेषोऽभिधीयते ।

प्रथमं तावत्प्रमादाद्विस्मृतस्य कस्यचिदङ्गस्य स्मारणायान्येन वचनं प्रतिषेधति—

प्रजवं वा इति । यदिदं दशममहरस्ति एतेन प्रजवं यन्ति अत्रानुष्ठेयाङ्गबाहुल्यात्तस्मिन्नेवाहनि कृत्स्नसमाप्तये प्रकृष्टो जवो वेगो यथा भवति तथैवानुतिष्ठन्ति । इयता प्रयासेनैतदनुष्ठाने कारणमुच्यते—यद्दशममहरस्त्येतेन पापाबहीयं भवन्ति पापस्यावहीयं हानिः पापक्षयमेवेनाहना भवन्ति प्राप्नुवन्ति । तस्मात्प्रयासं तोद्वाऽपि त्वरया तदहरनुष्ठेयम् । त्वयाऽनुष्ठातुः स्खलने लौकिको दृष्टान्त उच्यते—वोरव्याघ्रादिभयाकुलमहारण्ये प्रजवं यतां प्रकर्षेण वेगो यथा भवति तथा गच्छतां पुरुषाणां मध्ये यः कोऽपि मन्दबुद्धिः पुरुषः पण्डितंमन्यः सन्सर्वेषां पुरतस्त्वरया गच्छन्बुद्ध्यपराधाद्राजमार्गं परित्यज्य केनाप्यमार्गेण गच्छति । यश्चान्यः पुरुषः सहसा गच्छन्पुरोवर्तिनं स्थाणुमदृष्ट्वा पादेन तं स्थाणुं हन्ति । योऽप्यन्यः पुरुषः कण्टकादिना रोगेण वा पीडितः सन्भ्रंशं न्येति गन्तुमशक्तो गमनभ्रंशं नितरां प्राप्नोति, स त्रिविधोऽपि पुरुषो हीयते रक्षाहेतोः सहायभूताद्गच्छतो जनसंघाद्धीनो भवति । यथाऽयं त्रिविधः पुरुषो हीनस्तथा दशमेऽहन्यपि विस्मृताङ्गानुष्ठानः पुरुष ऋत्विक्संघाताद्धीयते। सोऽयं दार्ष्टान्तिक इहाभिधीयते । स यो वा एतेषां मध्ये यः कोऽप्यृत्विग्दशमेऽहन्युपहन्यतेऽस्मिन्नहन्यङ्गानुष्ठानविस्मृतिलक्षणमुपघातं प्राप्नोति । सोऽयमृत्विक्सम्यगनुष्ठातृभ्य ऋत्विग्भ्यो हीनो भवति । अविवाक्य इत्येतेन दशममहर्विशेष्यते । अन्येषु यागेषु यत्प्रमादादेकेन विस्मृतमङ्गं तदन्येन स्मारयितुं वक्तव्यं भवति । विकलं च तद्वाक्यं वक्तव्यं चेति विवाक्यं, न विद्यते विवाक्यमस्मिन्नहनि तदहरविवाक्यम्, एकेन विस्मृतमङ्गं जानताऽप्यन्येनास्मिन्नहनि न वक्तव्यमित्यर्थः । एवं सत्युपहताय स्खलितानुष्ठानाय तस्मा ऋत्विजे योऽन्यः कश्चिदृत्विग्ब्याह विस्मृतं त्वयेदमिति ब्रूते तमेव वक्तारमन्वारभ्यावलम्ब्य स्खलितानुष्ठानः स ऋत्विक्समश्नुते सम्यगनुतिष्ठति । अथानन्तरं योऽन्यो ब्याह विकलं ब्रूते सोऽयं विवेचनेनापराधेन सम्यगनुष्ठातृभ्य ऋत्विग्भ्यो हीयते । तस्मात्कारणादविवाक्येऽस्मिन्दशमेऽहन्युपहताय स्खलितानुष्ठानाय न व्युच्यं विकलमङ्गं न वक्तव्यम् ।

पक्षान्तरमाह—

(पूर्वोक्तद्वादशाहशेषविशेषकथनम्)

अथो खल्वायुरिति । अभिज्ञास्त्वेवमाहुः-यज्ञस्य यत्संपूर्णमनुष्ठानं तेन देवाः स्वर्गं गताः । यज्ञस्य यदनुष्ठानं विकलं तेनासुराःपराभवयन्पराभवं प्रापितवन्तः । संपूर्णफलं यजमानगामि विकलं तु भ्रातृव्यगामि । एवं सति दशमेऽहनि यो यजमान उपहन्यते स्खलितानुष्ठानो भवति स एव यजमानोऽतिरेचयति शास्त्रीयमनुष्ठानमतिलङ्घयति । तथा सत्यनुष्ठानस्य विकलत्वेन न्यूनफलत्वात्तत्फलं भ्रातृव्यगामि स्यात् । अतस्तत्परिहाराय विरुद्धं वक्तव्यमेव । तदाऽप्यृत्विजो वक्तुः पूर्वोक्तरीत्या प्रत्यवायो भविष्यतीति तत्परिहाराय यज्ञाङ्गभूतेभ्य ऋत्विग्भ्यो बहिर्भूता यज्ञं द्रष्टुमागता ये केचित्पुरुषाः सन्ति तेऽत्र विकलमङ्गं ब्रूयुः । एवं सत्यृत्विजः प्रत्यवायो न भविष्यति, विकलमङ्गं च समाहितं भवति ।

अथ पक्षान्तरमाह—

यदि तत्रेति । तत्र तेषु द्रष्टुमागतेषु पुरुषेषु स्खलितप्रयोगाभिज्ञानृत्विग्यजमाना यदि न लभेरंस्तदानीमन्तःसदसात्सदसो यज्ञभूमेरन्तर्मध्ये वर्तमानैरेवर्त्विग्भिस्तद्विकलमङ्गं वक्तव्यम् ।

पुनरपि पक्षान्तरमाह—

यदि तत्रेति । तत्र तेष्वृत्विक्षु वैकल्याभिज्ञान्पुरुषान्यदि न लभेरंस्तदानीं यजमानेन तद्विकलाङ्गं वक्तव्यम् ।

सर्वेषां पक्षाणां तात्पर्यं निगमयति—

तदृत्विग्भ्यमेवेति । किं बहुना द्रष्टुमागतैः पुरुषैर्वा तत्रत्यैर्ऋत्विग्भिर्वा यजमानेन वा सर्वथाऽपि तद्विकलमङ्गं वक्तव्यमेव । एवं तर्हि विकलस्यावश्यवक्तव्यत्वादविवाक्यत्वविशेषणमयुक्तमिति चेन्मैवम् । अन्यथा योजयितुं शक्यत्वात् । विवाक्यं विकलाङ्गवचनं यथा प्रतर्कं न भवति तथा सावधानैरनुष्ठेयत्वादिदमहरविवाक्यम् । इतरेष्वहःसु कथंचिद्वैकल्येऽप्यनायासेन समाधातुं शक्यम् । अत्र तु समाधानं दुःशकमित्यवश्यमप्रमत्तैर्भवितव्यमित्यर्थः ।

अस्मिन्नहनि मानसग्रहकाले स्तोत्रविशेषं विधत्ते—

अथ वा एतदिति । अथ वा अनन्तरमेव मानसग्रहकाल इत्यर्थः । एतदेवास्मिन्नहनि सर्पराज्ञियाः सर्पस्वामिन्या भूमेः संबन्धिनीभिर्ऋग्भिर्भूमेः स्तुतिं कुर्युः । का सा सर्पराज्ञी कथं वा तस्याः सर्पराज्ञीत्वमिति तदुभयमुच्यते—इयमेव भूमिः सर्पतः संचारं कुर्वतः सर्वस्य प्राणिनो राज्ञी । एतेन का तस्या

स्योत्तरं संपन्नम् । अथ कथं सर्पराज्ञीत्वमित्यस्योत्तरमुच्यते—प्राणिनां मध्ये परस्परोपकार्योपकारित्वस्य सद्भावात्केचिदर्चकाः [अर्चनीयाश्च] । तत्र यत्किंचित्प्राणिजातमन्ये पुरुषा अर्चन्ति, यदा नृचुर्यैऽपि पुरुषा अर्चयितारः, तदुभयमप्यर्चनीयार्चयितृप्राणिस्वरूपमस्यां पृथिव्यामेव वर्तते । तस्मात्सर्वतोऽर्चनादिव्यवहारं कुर्वतः प्राणिजातस्याऽऽधार इति भूमिरियं सर्पराज्ञीत्युच्यते । तस्याः सर्पराज्ञ्याः संबन्धिन्य ऋचो भूमिर्भूम्नेत्यादयः । एते च मन्त्राः प्रथमकाण्डे पुनराधानप्रकरणे समाम्नाताः । ताश्च तत्रत्ये ब्राह्मण एतन्नाम्ना व्यवहृताः—' सर्पराज्ञ्या ऋग्भिर्गार्हपत्यमादधाति ' इति । तस्माद्भूमिं [प्राणिनः] स्तुतिं कुर्युः । स्तोतॄणामत्र कोऽभिप्राय इति सोऽयमुच्यते—यदेव किंचित्प्राणिजातमन्ये पुरुषा अस्यां भूमौ वाचा पूजितवन्तः, ये चास्या भूमेरुपर्यर्चितारस्तदुभयस्वरूपमपि स्तोतारो वयं प्राप्य तच्च स्वाधीनं कृत्वा पश्चादुत्तिष्ठामेत्येवमेताभिर्ऋग्भिः स्तोतॄणामयमभिप्रायः ।

स्तोत्रान्तरेभ्यः कांचिद्विशेषं विधत्ते—

तामिति । इतरैः स्तोत्रैर्वाचिकी स्तुतिः क्रियते । ताभिस्तु सर्पराज्ञीभिरत्र मानसग्रहस्य प्रवर्तमानत्वान्मनसा स्तुतिं कुर्युः । तत्रायं हेतुरुच्यते—बलवद्भिरश्वैर्युक्तो रथोऽश्वरथः । अश्वतर्यस्तु संकीर्णजातयोऽत्यन्तबलयुक्तास्ताभिर्युक्तोऽश्वतरीरथः । तयोरन्यतरोऽप्येकस्मिन्नेव दिने भूमिमिमां कृत्स्नां व्याप्तुं नार्हति । मनस्त्वेकस्मिन्नेव क्षणे सर्वां भूमिं व्याप्तुमर्हति । अनिष्टं च सर्वं तिरस्कर्तुमर्हति । तस्माद्भूमिविषयाभिर्ऋग्भिर्मनसैव स्तोतव्यम् ।

यदुक्तं सूत्रकारेण—' होता चतुर्होतॄन्व्याचष्टे ' इति, तदिदं विधत्ते—

अथ ब्रह्मेति । पूर्वोक्ताभिर्ऋग्भिः शंसनकाले यत्र यत्राध्वर्युः प्रतिगरं प्रयुङ्क्ते तत्र तत्र प्रतिगरकाले होता ब्रह्मशब्दाभिधेयं चतुर्होतृमन्त्रं ब्रूयात् । ' ब्रह्म वै चतुर्होतारः ' इति श्रुत्यन्तरात्तस्य मन्त्रस्य ब्रह्मत्वम् । ' पृथिवी होता । द्यौरध्वर्युः ' । इत्यादिक आरण्यकाण्डाम्नातश्चतुर्होतृमन्त्रः । एतेन सर्वेऽपि होतृमन्त्रा उपलक्षिताः । अत एव सर्वेषां होतृमन्त्राणां पृथक्प्रतिगरं सूत्रकारो दर्शयति—' ओमिति दशहोतुः प्रतिगरस्तथेति चतुर्होतुरोमिति पञ्चहोतुस्तथेति षड्होतुरात्मन्हेतारिति सप्तहोतुः ' इति । शंसितुः प्रोत्साहजननं प्रतिगरः । तत्प्रतिगरविषयत्वेनारण्यकाण्डोक्ताः सर्वे दशहोत्रादिमन्त्रा

१ ख घ. च °र्यैर्चिता°।

(पूर्वोक्तदशाहशेषविशेषकथनम्)

होता वक्तव्यः। तत्सर्वमत्र संगृह्य ब्रह्म वदन्तीत्यनेन वाक्येन विधीयते। मन्त्रान्तरपरित्यागेन ब्रह्मण एव वदने हेतुरुच्यते—य आयुष्या मन्त्रास्ते परिमिताः कतिकतिचिदेव प्रयोजयत्वात्। एवं यजुषां साम्नां च परिमितत्वम्। यत्तु ब्रह्मशब्दाभिधेयं होतुमन्त्रजातमनेकमन्त्रात्मकं तस्यैवान्तः परिमितत्वं नास्ति बहुषु पदेशेषु प्रयोक्तव्यत्वात्। तस्माद्ब्रह्मशब्दाभिधेयं होतुमन्त्रजातं प्रतिगृणते प्रतिगरार्थमुद्युक्ताय ध्वर्यवे होता ब्रूयात्। सोऽयं होतुमन्त्रसंघः प्रतिगीर्यत इति प्रतिगरः, अध्वर्युकर्तृकायाः प्रतिगरणक्रियायाः कर्मभूत इत्यर्थः।

अत्र मीमांसा।

दशमाध्यायस्य षष्ठपादे त्रयोदशेऽधिकरणे चिन्तितम्—

मानसं किमहर्भिन्नमङ्गं वा दशमेऽहनि।
भिन्नं स्तुत्यादिवाऽङ्गं तद्विसर्गोक्त्यादिभिर्भवेत्॥

द्वादशाहे मानसग्रहणं श्रूयते—'अद्भ्यस्त्वा पृथिव्याः पात्रेण समुद्रस्य रसया प्रजापतये जुष्टं गृह्णामीति मानसं प्राजापत्यं गृह्णाति' इति। अयमर्थः—पृथिवी पात्रं समुद्रः सोमस्तद्रसः प्रजापतिर्देवता। एवं विशिष्टस्य ग्रहस्य ग्रहणे मनः साधनम्। तदिदं मानसमिति। एतच्च द्वादशभ्योऽहोभ्यो भिन्नमहरयोदशेऽहनि कर्तव्यो यागविशेषः। कुतः, स्तुत्यादिभ्यः। मानसेन द्वादशाहस्य स्तुतिरेवमाम्नायते—'द्वादशाहस्य हवींषि च्छन्दांसि तानि मानसेनाऽभ्यायन्ति' इति। स्तुतिसाधनं च मानसं स्तोतव्याद्भिन्नं भवितुं युक्तम्। तथा व्यपदेशभेदोऽपि श्रूयते—'वाग्वै द्वादशाहो मनो मानसम्' इति। एवमायुष्पत्तिभिर्भिन्नमहरिति प्राप्ते ब्रूमः—दशमस्याह्नोऽङ्गं तत्स्याद्विसर्गोक्त्यादिभ्यः। 'एष वै दशमस्याह्नो विसर्गो यन्मानसम्, इति विसर्गोक्तिः। इयं च दशमाहाङ्गत्वं गमयति। अहरन्तरत्वे द्वादशाहसमाख्या च विरुध्यते। अङ्गभूतेनापि मानसेन स्तुतिव्यपदेशभेदादिकमुपपद्यते। तस्मादङ्गम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अहीनद्वादशाहकथनम्)

(अथ सप्तमाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः)।

ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेऽहन्नार्त्विजां यजमानो वृङ्क्त इति तेज इन्द्रिय-मिति किं द्वितीयेनेति प्राणानन्नाद्यमिति किं तृतीयेनेति त्रीनिमाँल्लोकानिति किं चतुर्थेनेति चतुष्पदः पशूनिति किं पञ्चमेनेति पञ्चाक्षरां पङ्क्तिमिति किꣳ षष्ठेनेति षड्ऋतूनिति किꣳ सप्तमेनेति सप्तपदाꣳ शाक्करीमिति (१) किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृतꣳ स्तोममिति किं दशमेनेति दशाक्षरां विराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति किं द्वादशेनेति द्वादशाक्षरां जगतीमित्येतावद्वा अस्ति यावदेतावदेवास्ति तदेषां वृङ्क्ते (२) ॥

(शक्वरीमित्येकचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके द्वादशाहसत्रविवाक्यमहः प्रपञ्चितम् । अथ द्वितीये प्रश्नोत्तराभ्यामहीनद्वादशाह आर्त्विज्यानेन्दामुखेन तद्याजिनं यजमानं दर्शयति—

ब्रह्मवादिन इति । अहीनस्य द्वादशाहस्यानुष्ठाता यजमान ऋत्विजां सम्बन्धि यच्छ्रेयोऽस्ति तत्सर्वं तैर्वर्जितं यथा भवति तथा स्वयं सर्वमादत्त इत्येवमर्थं(+सिद्धवत्कृत्य केनाहर्विशेषेण किं फलविशेषमादत्त इत्येवं) ब्रह्मवादिनः पप्रच्छुः । तत्राभिज्ञः कश्चित्तेजआदिकं क्रमेणाऽऽदत्त इत्युत्तरं ब्रूते ।

(त्रयोदशरात्रकथनम्)

पञ्चाक्षरपादान्वितं यत्साङ्क्तं छन्दस्तेन साध्यं फलं वृङ्क्ते । एवं तत्तत्र यथा-योगमूह्यम् । एतैरुक्तैर्द्वादशभिर्वाक्यैर्यावदेतच्छ्लोक उक्तमेतावदेवेदं विद्यमानं श्रेयः । अतो यावदेषामस्ति तत्सर्वं यजमान आदत्ते ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः)।

एष वा आप्तो द्वादशाहो यन्त्रयोदशरात्रः समानꣳ ह्येतदहर्यत्प्रायणीयश्चोदयनीयश्च त्र्यतिरात्रो भवति त्रय इमे लोका एषां लोकानामाप्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो द्वितीयोऽपानस्तृतीयः प्राणापानोदानेष्वेवान्नाद्ये प्रति तिष्ठन्ति सर्वमायुर्यन्ति य एवं विद्वाꣳसꣳ त्रयोदशरात्रमासते तदाहुर्वाग्वा एषा वितता (१) यद्द्वादशाहस्तां वि च्छिन्द्युर्यन्मध्येऽतिरात्रं कुर्युरुपदासुका गृहपतेर्वाक्स्यादुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति संततामेव वाचमव रुन्धतेऽनुपदासुका गृहपतेर्वाग्भवति पशवो वै छन्दोमा अन्नं महाव्रतं यदुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति पशुष्वेवान्नाद्ये च प्रति तिष्ठन्ति (२)॥

(वितता विंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः) ।

द्वितीये द्वादशाहयाजिनः प्रसंशाऽभिहिता । अथ तृतीये त्रयोदशरात्रोऽभिधीयते—

एष वा आप्त इति । योऽयं त्रयोदशरात्रो विधास्यमान एष एव संपूर्णो द्वादशाहः । पूर्वस्माद्द्वादशाहादेकदिनाधिक्येन फलाधिक्याद्दिनाधिक्ये सति केन साम्येन द्वादशाहत्वमिति चेत् । तदुच्यते—प्रायणीय उदयनीयश्चेत्युभयं द्वादशाहे यादृशं तादृशमेवात्रापीति द्विर्विधस्याहनः सपानत्वाद्द्वादशाहत्वोपचारः ।

अथ विशेषं विधत्ते—

त्र्यतिरात्र इति । द्वादशाहे प्रायणीयोदयनीयौ द्वौ विधेयातिरात्रौ । अत्र तु मध्येऽपि कश्चिदतिरात्रः । तेन लोकत्रयपूर्तिः । अत्राहुः—कस्मिँ सूत्रकारो दर्शयति—' अतिरात्रः पृष्ठ्यः षडहः सर्वस्तोमोऽतिरात्रश्चत्वारश्छन्दोमा अतिरात्रः ' इति । यद्यपि चतुर्विंशच्चतुश्चत्वारिंशाच्चत्वारिंशत्पात्राणि एव छन्दोमा विद्यमानास्तथाऽप्यन्ताद्लोपो वृद्धिर्वेति न्यायेनाष्टाचत्वारिंशत्स्थाऽऽवृत्त्या चतुःसंख्या पूरणीया ।

अथ त्रयोदशरात्रं विधत्ते—

प्राणो वै प्रथम इति । व्याप्तेनोदानादीनामप्युपलक्षितत्वादुदानेनोपसंहारो न विरुद्धः ।

योऽयं मध्यमोऽतिरात्रस्तस्य छन्दोमानामधस्तात्सूत्रकारः शास्त्रान्तरानुसारेण स्थानं निर्दिदेश तदिदं दूषयित्वा छन्दोमानामुपरि स्थानं विधत्ते—

तदाहुर्वाग्वा इति । योऽयं द्वादशाहोऽस्ति सोऽयं विस्तीर्णवाक्स्वरूपः । तत्रत्येष्वहःसु विद्यमानानां स्तोत्रशस्त्राणामविच्छेदस्य प्रकृतिभूते तस्मिन्द्वादशाहे कल्प्यत्वात् । एवं च सति षडहस्य छन्दोमानां च मध्ये यदि कश्चिदन्यः सर्वस्तोमोऽतिरात्रोऽनुष्ठीयेत तदानीं द्वादशाहगतां कल्प्यां संततां वाचमनुष्ठातारो विच्छिन्द्युः । तथा सति यजमानस्य वागुपक्षयशीला स्यात् । अतस्तत्परिहाराय छन्दोमानामुपरि यदविवाक्यमहर्द्वादशाहगतं तदेवाहः सर्वस्तोमातिरात्ररूपं कुर्यात् । तस्मिंश्च महाव्रतधर्मातिदेशाभिप्रायेण महाव्रतशब्दप्रयोगः । एवमुपरिष्टादनुष्ठाने सति संततामेव वाचं प्राप्नोति । न तु यजमानस्य वागुपक्षीयते ।

---

१ क. घ. ङ. 'क्याख्यिना' ।

(चतुर्दशरात्रकथनम्)

तदेवोपरिष्टादनुष्ठानं प्रकारान्तरेण प्रशंसति—

पशवो वा इति। सत्सु प्रथमं पशुषु सत्त्वाद्घृतक्षीरादिरूपमन्नाद्यं युक्तम्। तस्मादन्नरूपस्य महाव्रतधर्मकस्यातिरात्रस्योपरिष्टादेवानुष्ठानं न्याय्यम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः)

आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति त एतं चतुर्दशरात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै त उभयोर्लोकयोरार्ध्नुवन्नस्मि॑श्चामुष्मि॑श्च य एवं विद्वा॑ꣳसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मि॑श्चामुष्मि॑श्च चतुर्दशरात्रो भवति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्यै यत्पराचीनानि पृष्ठानि (१) भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत्प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकमभि जयन्ति त्रयस्त्रि॑ꣳशौ मध्यतः स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्त्यतिरात्रावभितो भवतः परिगृहीत्यै (२) ॥

(पृष्ठानि चतुस्त्रि॑ꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयेऽनुवाके त्रयोदशरात्रोऽभिहितः। अथ चतुर्थे चतुर्दशरात्रोऽभिधीयते। तमेवं विधत्ते—

आदित्या इति। तत्राहनां संख्यां प्रशंसति—

चतुर्दशरात्र इति। ग्राम्याश्चाऽऽरण्याश्चासक्तद्व्यवख्याताः।

प्रायणीयोदयनीययोर्मध्यवर्तीनि द्वादशसंख्याकान्यहानि विधत्ते—

यत्पराचीनानीति। रथंतरबृहद्वैरूपवैराजशाक्वररैवतसामसाध्यैः पृष्ठस्तोत्रैरुक्तान्यहानि पृष्ठानीत्युच्यन्ते। तेषामुक्तोऽनुक्रमः पराचीनत्वं, विपरीतक्रमः प्रतीचीनत्वम्। तेन द्वैविध्येन लोकद्वयप्राप्तिः।

एतमेवाऽऽरोहावरोहप्रकारं पुनः प्रशंसति—

त्रयस्त्रिंशाविति। त्रिवृत्पञ्चदशः सप्तदश एकविंशस्त्रिणवस्त्रयस्त्रिंश इत्येष स्तोमानां षट्स्विहाऽऽरोहक्रमः। त्रयस्त्रिंशस्त्रिणव एकविंशः सप्तदशः पञ्चदशस्त्रिवृदित्यवमवरोहक्रमः। एवं च सत्येषु द्वादशस्वहःसु मध्ये षष्ठसप्तमयोरहर्नामभिरन्तर्येण त्रयस्त्रिंशस्तोमौ संपद्येते। तेन च यजमानाः साम्राज्यं गच्छन्ति। किंचैतावन्येषां स्तोमानामधिराजावर्वाचीनानां तत्रान्तर्भावात्। अतो यजमानाः सर्वेषामन्येषामधिराजा भवन्ति।

अथ प्रायणीयोदयनीयावहर्विशेषौ विधत्ते—

अतिरात्राविति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः)।

**प्रजापतिः सुवर्गं लोकमैत्तं देवा अन्वायन्ता-
नादित्याश्च पशवश्चान्वायन्ते देवा अब्रुवन्याम्पशू-
नुपाजीविष्म त इमेऽन्वागमिष्यन्ति तेभ्य एतं चतु-
र्दशरात्रं प्रत्यौहन्त आदित्याः पृष्ठैः सुवर्गं लोक-**

(अभ्यश्चतुर्दशरात्रकथनम्)

माऽरोहन्त्यहाभ्यामस्मिँल्लोके पशून्प्रत्यौहन्पृष्ठैरा-दित्या अमुष्मिँल्लोक आध्नुवन्त्यहाभ्यामस्मिन्(१) लोके पशवो य एवं विद्वाꣳसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मिꣳश्चामुष्मिꣳश्च पृष्ठैरेवामुष्मिँल्लोक ऋध्नुवन्ति त्र्यहाभ्यामस्मिँल्लोके ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योति-रन्तरिक्षं गौरसावायुरिमानेव लोकान्भ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधꣳ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वाय (२) ओजो वै वीर्यं पृष्ठा-न्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रतिष्ठित्यै तिष्ठन्त्येते वै यज्ञस्यांऽसायनी स्तुती ताभ्यामेव सवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वात्तिष्ठन्ति चतु-र्दशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्-विराजैवान्नाद्यमव रुन्धते याश्चतस्रश्चतस्रो दिशो दिक्ष्वेव प्रतिष्ठन्त्यतिरात्रावभितो भवतः परि-गृहीत्यै (३) ॥

(आध्नुवन्त्यहाभ्यामस्मिन्त्सविवधत्वाय प्रतिष्ठित्या एकत्रिꣳश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अन्यच्चतुर्दशरात्रकथनम्)

(अथ सप्तमकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः)

चतुर्थेऽनुवाके एकस्यचतुर्दशरात्रस्याभिहितः । अथ द्वयोरन्यश्चतुर्दशरात्रोऽभिधीयते ।

तमेव विधातुं प्रस्तौति—

प्रजापतिः सुवर्गमिति । यदा प्रजापतिः स्वर्गं गतस्तदा प्रजापतिमनु सर्वेऽपि देवा गताः । तान्देवाननु पश्चादादित्याः पशवश्च गताः । तानादित्यान्पशूनुभयविधान्दृष्ट्वा ते देवाः परस्परमिदमब्रुवन्—यान्पशूनुपेत्य मनुष्यैः सहिताः सर्वे वयमजीविष्म ते पशवः सर्वेऽप्यस्माकं पृष्ठत एव समागताः । आगतानामादित्यानां पशूनां च मध्य आदित्याः स्वर्गमारोहन्तु, पशवः प्रतिनिवृत्य भूमौ गच्छन्तु, तत्र क उपाय इति विचार्यैतं चतुर्दशरात्रं प्रत्यावृत्तिगुणयुक्तमनुष्ठितवन्तः । तत्रेयमहःकल्प्तिः—आदावेकोऽतिरात्रः । ततो ज्योतिर्गौरायुरित्यारोहरूपास्त्रिरात्रः । ततः पृष्ठ्यः षडहः । तत आयुर्गौर्ज्योतिरित्यवरोहरूपस्त्रिरात्रः । ततोऽतिरात्र इति । तस्मिन्ननुष्ठिते सति पृष्ठशब्दाभिधेयैः षड्भिरहोभिरादित्याः स्वर्गमारोहन् । प्रत्यावृत्तियुक्ताभ्यां त्र्यहाभ्यां देवाः पशूनस्मिँल्लोके प्रतिनिवर्तितवन्तः । तत्राऽऽदित्याः पृष्ठैः स्वर्गं प्राप्य तत्र समृद्धिं गताः । पशवस्तु त्र्यहाभ्यामस्मिँल्लोके समृद्धिं गताः ।

तदिदानीं विधत्ते—

य एवं विद्वानिति । अथाऽऽरोहरूपं प्रथमं त्र्यहं विधत्ते—

ज्योतिर्गौरायुरिति । ज्योतिष्टोमगवामयुष्टोमरूपा अहर्विशेषा मिलित्वा त्र्यहः । तेन च त्रित्वसाम्यात्त्रिलोकत्वप्राप्तिर्भवति ।

अथ षडहगतान्यहानि विधत्ते—

यदन्यतः पृष्ठानीति । विवधशब्देनोभयतः शिक्येपेतः क्षीराज्यादिवाही यष्टिविशेष उच्यते । तस्य चोभयतो भार समानः । एवं सत्यत्राप्यं पृष्ठ्यः षडह आदावन्ते वा यद्येकस्मिन्पार्श्वे भदेनदा भारद्वयसाम्याभावाद्विविधलक्षणमिदं कर्म स्यात् । अतो विवधसदृशत्वाय पृष्ठस्थान्यहानि मध्ये कर्तव्यानि । किंचैतानि पृष्ठानि शरीरबलस्थेन्द्रियसामर्थ्य च हेतुत्वात्प्रभूतानि । तस्मात्तेषां मध्यतोऽनुष्ठिते सत्योजो वीर्यं च मध्ये धृतं भवति ।

अथ तेष्वहःसु चोदकप्राप्तानि वैरूपवैराजादिसामान्यपवादितुं विधत्ते—

बृहद्रथंतराभ्यामिति । प्रथमतृतीयपञ्चमेष्वहःसु रथंतरसाम्ना पृष्ठस्तोमं

(पञ्चदशरात्रकथनम्)

निष्पादनीयम्। द्वितीयचतुर्थषष्ठेष्वहःसु बृहत्साम्नेति विवेकः। अवशिष्टं वाक्यम् 'साध्या वै देवाः सुवर्गकामाः' इत्यस्मिन्ननुवाके व्याख्यातम्।

अथ प्रत्यवरोहरूपं त्र्यहं विधत्ते—

पराञ्चो वा इति। ये यजमाना अनुक्रमगतानि पृष्ठाख्यान्यहान्यनुतिष्ठन्त्येते यजमानाः प्रत्यावृत्तिरहिताः स्वर्गमारोहन्ति। अतः स्वर्गात्प्रत्यवरोहाय प्रत्यावृत्त आयुर्गौर्ज्योतिरित्येवंविधस्त्र्यहः कर्तव्यः। अपि चायं त्र्यहोऽस्मिँल्लोके प्रतिष्ठायै संपद्यते। तस्मादुभयोरपि लोकयोः समृद्धिं प्राप्योत्कर्षेण तिष्ठन्ति।

अहर्गतां संख्यां प्रशंसति—

चतुर्दशैतास्तामामिति। चतुर्दशरात्रक्रतुगता या रात्रय एताश्चतुर्दशसंख्याकास्तासां मध्ये या रात्रयो दशसंख्याकास्ताभिः संख्यासाम्यादिराड्दाराज्यप्राप्तिः। यास्तूपरिष्टाच्चतस्रो रात्रयस्ताभिः संख्यासाम्याच्चतुर्दिक्षु प्रतिष्ठन्ति।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः॥ ५॥

(अथ सप्तमाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः)

इन्द्रो वै सहस्रदेवताभिरासीत्स न व्यावृतमगच्छत्स प्रजापतिमुपाधावत्तस्मा एतं पञ्चदशरात्रं प्रायच्छत्तमाऽहरत्तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एव विद्वाꣳसः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति ज्योतिर्गौरायुरितिं त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षम् (१) गौरमावास्यरेष्वेव लोकेषु प्रतितिष्ठन्त्यसत्रं वा एतद्यदच्छन्दोमं यच्छं-

स्तोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशून्छन्दोभिरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्त्यतिरात्रावभितो भवत इन्द्रियस्य परिगृहीत्यै (२) ॥

(अन्तरिक्षमिन्द्रियस्यैकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमे द्वितीयश्चतुर्दशरात्रोऽभिहितः । अथ षष्ठे पञ्चदशरात्रोऽभिधीयते । तमेतं विधत्ते—

इन्दो वै ब्रह्मणस्पतिरिति । देवस्वामित्वार्होऽपीन्द्रः स्वामित्वमलभमानोऽन्याभिर्देवताभिः समान एवाऽऽसीन्न तु व्यावृत्तिं प्राप्तवान् । ततः प्रजापतिं गत्वा प्रजापत्युपदेशात्पञ्चदशरात्रमनुष्ठाय व्यावृत्तिं प्राप्नोत् । तद्वदन्येऽपि तमनुष्ठाय पाप्मना भ्रातृव्येण च व्यावृत्ता भवन्ति ।

तत्रैकं त्र्यहं विधत्ते—

ज्योतिर्गौरायुरिति । अथ चतुरश्छन्दोमान्पृष्ठ्यं षडहं च विधत्ते—

असत्रं वा इति । नात्र च्छन्दोरहितस्य सत्रत्वनिषेधे तात्पर्यं, किंतु च्छन्दोमवतः प्रशंसायां तात्पर्यम् । अत एतस्य च्छन्दोमवत्त्वे सति प्रशस्तं सत्रं भवति । किंच पृष्ठसंज्ञकैरहोभिर्देवताः प्राप्नुवन्ति । छन्दोमैश्चतुर्भिः पशून्प्राप्नुवन्ति । किंच पृष्ठानां षण्णामहृनामोजोवीर्यरूपत्वाच्छन्दोमानां चतुर्णामहृनां पशुरूपत्वाच्च तदनुष्ठानेनोभे(भय)ओजआदिषु प्रतितिष्ठन्ति । तस्मात्पृष्ठ्यः षडहश्चतुरश्छन्दोमा इत्येतानि दशाहान्यनुष्ठेयानीत्यर्थः ।

अथ क्रतुगतामहःसंख्यां प्रशंसति—

पञ्चदशरात्र इति । पञ्चदशस्तोमस्य हिंसाहेतुत्वाद्वज्रत्वम् । तद्धेतुत्वं च होतृब्राह्मणे समाम्नातम् ' वै पञ्चदशः स्तोमो मध्यत उद्यतूणत् ' इति । एत-

(द्वितीयपञ्चदशरात्रकथनम्)

संख्यासाम्येन पञ्चदशरात्रस्यापि वज्ररूपत्वात्तदनुष्ठातारो भ्रातृव्येभ्यो वज्रं प्रहरन्त्येव ।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति । अस्य क्रतोरिन्द्रेणानुष्ठितत्वादत्रेन्द्रियपरिग्रहः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

अथ सप्तमाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः ।

इन्द्रो वै शैथिल इवाप्रतिष्ठित आसीत्सोऽसुरेभ्योऽबिभेत्स प्रजापतिमुपाधावत्तस्मा एतं पञ्चदशरात्रं वज्रं प्रायच्छत्तेनासुरान्पराभाव्यं विजित्य श्रियमगच्छदाप्नुवन्पाप्मानं निरदहत पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्नधत्त य एवं विद्वाꣳसः पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्यं विजित्य श्रियं गच्छन्त्यभिभुवां पाप्मानं निः (१) दहन्ते पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्दधत एता एव पशव्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरं पशवोऽनुप्र जायन्ते तस्मात्पशव्या एता एव संवत्स्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरः सुवर्गो लोकस्तस्मात्सुवर्ग्या ज्योतिर्गौरायुरितिऽह्यहो भवतीयं वाव ज्योतिरन्तरिक्षम् (२ गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविधꣳ स्यान्मध्ये पृष्ठानि भवन्ति सविधत्वायौजो

(द्वितीयपञ्चदशरात्रकथनम्)

वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रतिष्ठित्यै वै यज्ञस्यौज्मार्यनी स्तुती ताभ्यामेव सुवर्गं लोकम् (३) यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्ङहो भवति प्रत्यवरूढया अथो प्रतिष्ठित्या उभयोर्लोकयोरूर्ध्वोत्तिष्ठन्ति पञ्चदशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते याः पञ्च पञ्च दिशो दिक्ष्वेव प्रतिष्ठित्यतिरात्रावमितो भवत इन्द्रियस्य वीर्यस्य प्रजायै पशूनां परिगृहीत्यै (४) ॥

(गच्छन्त्यग्निष्टुता पाप्मानं निरन्तरिक्षं लोकं प्रजायै द्वे च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाके प्रथमः पञ्चदशरात्रोऽभिहितः । अथ सप्तमे द्वितीयः पञ्चदशरात्रोऽभिधीयते ।

तमेतं विधत्ते—

इन्द्रो वै शिथिल इति । इन्द्रः कदाचिच्छिथिलो यो दुधुक्षत्यर्थः सेनारहित एकाकी दरिद्र इवैकत्रावस्थातुमसुरोपद्रवरहितं स्थानमलभमान आसीत् । सोऽसुरेभ्यो भीतः सन्प्रजापत्युपदेशाद्बृहद्रथन्तरसामानं वक्ष्यमाणं पञ्चदशरात्रकतुमनुष्ठाय तेन तानसुरान्पराभूवान्कृत्वा स्वयं दिग्जित्य श्रियमाप्नोत् । तस्मिन्कृतौ यदिदमग्निष्टुदाख्यं द्वितीयमहस्तेन स्वशैथिल्यहेतुं पाप्मानं निरदग्धवान् । अवशिष्टेन

(द्वितीयपञ्चदशरात्रकथनम्)

पञ्चदशरात्रकतुभागेन बलहेतुमोजोरूपं सप्तमधातुं शारीरं बलमिन्द्रियपाटवं युद्धे विजयोत्साहं च स्वस्मिन्संपादितवान्।

वेदनं प्रशंसति—

य एवं विद्वाꣳस इति। इन्द्रवदन्येऽपि यजमानाः फलं प्राप्नुवन्ति।

एतस्मिन्क्रतौ विद्यमानाः पञ्चदशसंख्याका रात्रीः प्रशंसति—

एता वै पशव्या इति। अस्मिन्क्रतौ या रात्रय एताः पशुभ्यो हितास्तत्प्राप्तिहेतुत्वात्। कथमिति तदुच्यते—एकस्यार्धमासस्य पञ्चदश रात्रयः सन्ति। स चार्धमासः क्रमेण वर्तमानः संवत्सरत्वमापद्यते। पशवश्च संवत्सरमात्रं गर्भे स्थित्वा प्रजायन्ते। तस्मात्ता रात्रयः संख्याद्वारा पशुहेतुभूताः।

पुनरपि प्रकारान्तरेण प्रशंसति—

एता एव सुवर्ग्या इति। पूर्वोक्तरीत्या संख्याद्वारा संवत्सरसंपत्तौ तत्प्राप्तौ च संवत्सरो वसन्तकालीनज्योतिष्टोमानुष्ठानद्वारा स्वर्गप्राप्तिहेतुः। तस्मादेवा रात्रयः स्वर्गाय हिताः।

अथाहर्विशेषा विधातव्याः। तत्राग्निष्टुदाख्यमेकमहः स्तुत्यैवोक्तविधिकमिति द्रष्टव्यम्। अग्निष्टुता पाप्मानं निरदहेति स्तुतिः पूर्वमुदाहृता। अत ऊर्ध्वमहं विधत्ते—

ज्योतिर्गौरायुरिति। पूर्ववद्व्याख्येयम्।

अथ पृष्ठ्यषडहगतान्यहानि विधत्ते—

यदन्यतः पृष्ठानीति। एतदपि पूर्ववद्व्याख्येयम्।

आरोहरूपाण्यहः पूर्वं विहितः। इदानीमवरोहरूपं त्र्यहं विधत्ते—

पराञ्चो वा इति। एतदपि पूर्ववद्व्याख्येयम्।

अथ क्रतुगतां रात्रिसंख्यां प्रशंसति—

पञ्चदशैतास्तासामिति। ऊर्ध्वया सह त्रिंशत्पञ्चत्वम्। अन्यत्पूर्ववद्व्याख्येयम्। प्रायणीयोदयनीयौ विधत्ते—

अतिरात्रावितीति। इन्द्रेणानुष्ठितत्वादिन्द्रियहेतुत्वं, वज्ररूपत्वाच्च वीर्यहेतुत्वं, पशव्यत्वस्य च पूर्वमुक्तत्वात्तस्य चोपलक्षणत्वात्प्रजापशुहेतुत्वम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

---

१ ख. निर्दहन्त इति। २ ख, घ, ङ, च. तत।

(सप्तदशरात्रकथनम्)

(अथ सप्तमाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः) ।

प्रजापतिरकामयतान्नादः स्यामिति स एतꣳ सप्तदशरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै सोऽन्नादोऽभवद्य एवं विद्वाꣳसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति पञ्चाहो भवति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव सँवत्सरे प्रति तिष्ठन्त्यथा पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धतेऽसत्रं वा एतत् (१) यदेछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति सप्तदशरात्रो भवति सप्तदशः । प्रजापतिः प्रजापतेराप्त्या अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै (२) ॥

(एतत्सप्तत्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमे द्वितीयः पञ्चदशरात्रोऽभिहितः । अथाष्टमे सप्तदशरात्रोऽभिधीयते । तमेतं विधत्ते-

प्रजापतिरिति । अथैतदीयेष्वहःसु ज्योतिर्गौरायुरित्येवंविधमहर्नां पञ्चकं विधत्ते-

पञ्चाहो भवतीति । द्विरावृत्ते ऽह्ने द्वितीयज्योतिर्वर्जितोऽवशिष्टः पञ्चाहः । हेमन्तशिशिरयोरेकीभावादहर्नां पञ्चत्वम् ।

अथ पृष्ठयं षडहं चतुरश्छन्दोमांश्च विधत्ते-

असत्रं वा इति । पूर्ववद्व्याख्येयम् ।

(विंशतिरात्रकथनम्)

क्रतुगतां रात्रिसंख्यां प्रशंसति—

सप्तदशरात्र इति। आश्रावयेत्यादिसप्तदशाक्षरात्मकत्वात्पजापतेः सप्तदशत्वम्।

प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति। अन्नाद्यस्य फलत्वं विधिवाक्ये स्पष्टम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ सप्तमाष्टके तृतीयप्रपाठके नवमोऽनुवाकः)।

सा विराड्विक्रम्यातिष्ठद्ब्रह्मणा देवेष्वन्नेनासुरेषु ते देवा अकामयन्तोभयꣳ सं वृञ्जीमहि ब्रह्म चान्नं चेति त एता विꣳशतिꣳ रात्रीरपश्यन्ततो वै त उभयꣳ समवृञ्जत ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा अभवन्य एवं विद्वाꣳस एता आसत उभयमेव सं वृञ्जते ब्रह्म चान्नं च (१) ब्रह्मवर्चसिनोऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति तिष्ठन्ति विꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव पुरुषस्तमाप्त्वोत्तिष्ठन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकान्भ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं (२) लोकमभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविधꣳ स्यान्मध्ये पृष्ठानि भवन्ति सविधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते

(विंशतिरात्रकथनम्)

बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदा-
भ्यामेव यन्त्यथो अनयोरेव प्रतिं तिष्ठ-
न्त्येते वै यज्ञस्यार्ध्नसायनी स्रुती ताभ्यामेव सुवर्गं
लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारो-
हन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्ङयहो
भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लो-
कयोर्ऋद्ध्वोत्तिष्ठन्त्यतिरात्रावभितो भवतो ब्रह्मव-
र्चसस्यान्नाद्यस्य परिगृहीत्यै (३) ॥

(वृञ्जते ब्रह्म वान्नं च सुवर्गमेते सुवर्गं
त्रयोविंशतिश्च)

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः) ।

अष्टमे सप्तदशरात्रोऽभिहितः । अथ नवमे विंशतिरात्रोऽभिधीयते ।

तमेतं विधत्ते—

सा विराडिति । दशरात्राभिमानिनी काचिद्विराड्देवता रूपद्वयेन विभ-
ज्यातिष्ठत्—देवेषु ब्रह्मवर्चसरूपेणासुरेषु चान्नरूपेण । तदानीं देवा असुरेभ्योऽ-
न्नमपनीय तदेतदुभयं वयमेव लभेमहीत्यकामयन्त । ततस्तत्साधनत्वेन वक्ष्यमाणा
विंशतिसंख्याका रात्रीर्निश्चित्य तदनुष्ठानेनासुरेभ्यस्तदपनीय स्वयमेवाधिकेन
ब्रह्मवर्चसेनान्नेन च संपन्ना अभवन् । एवमन्येऽपि तदनुष्ठानेन तत्फलं प्राप्नु-
वन्ति । पूर्वत्राहःसंघप्राधान्येन सप्तदशरात्रपञ्चदशरात्रादीनामेकवचनेन नि-
र्देशः । अत्र तु क्रत्ववयवभूतरात्रिप्राधान्येन बहुवचननिर्देशः ।

क्रतुगतां विंशतिरात्रिसंख्यां प्रशंसति—

द्वे वा एते इति । दशसंख्यया विभज्यमाने द्वे एते विराजौ संपद्येते ।
तयोश्च ब्रह्मवर्चसान्नसाधनभूतयोः पृथगेव प्रतितिष्ठन्ति, एकैकं फलमितरनिर-
पेक्षत्वेनैव संपूर्णं लभत इत्यर्थः । अथ वा विद्वत्सभायामुपयुक्तं ब्रह्मवर्चसम् ।

(विंशतिरात्रकथनम्)

धनिकसभायामुपयुक्ताऽन्नसमृद्धिः । एवं नानाविधा प्रतिष्ठा । किंच पुरुषस्य हस्तपादगताङ्गुलिसंख्यासाम्याद्यावान्गुणसंघः पुरुषे संभावितस्तं सर्वं प्राप्नोति।

अथात्र नवाहानि विधत्ते—

ज्योतिर्गौरायुरिति । यथा प्रथमस्याहो ज्योतिरादिक एवं द्वितीयतृतीयापि ज्योतिरादिको न त्वत्र कश्चिदप्यायुरादिकोऽस्ति । एवं सत्यनक्रमेणैवं स्वर्गंप्यारोहन्ति ।

एतेषां त्र्यहाणां वक्ष्यमाणत्र्यहस्य च मध्ये पृष्ठं विधत्ते

यदन्यतः पृष्ठानि स्युरिति । पूर्वोक्तेषु त्र्यहेषु योऽयमन्त्यस्त्र्यहो यश्च भावी त्र्यहस्तयोरुभयोर्मध्यवर्तित्वेन विवक्षसाम्यम् । अन्यत्पूर्ववद्व्याख्येयम् ।

अथ प्रत्यवरोहरूपं त्र्यहं विधत्ते -

पराञ्चो वा इति । पूर्ववद्व्याख्येयम् ।

प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति । फलद्वयं विधिवाक्य एव विस्पष्टम् ।

अत्र मीमांसा ।

चतुर्थाध्यायस्य तृतीयपादेऽष्टमाधिकरणे चिन्तितम्—

स्वर्गाय वा प्रतिष्ठायै रात्रिसत्रमिहाग्रिमः ।
पूर्ववत्स्यात्प्रतिष्ठाऽत्र श्रुता तेनाश्रुताद्वरम् ॥

सत्रकाण्डे श्रूयते—'प्रतितिष्ठन्ति ह वा एता रात्रीरुपयन्ति' इति, 'ब्रह्मवर्चसिनोऽन्नादा भवन्ति' इति, 'य एता उपयन्ति' इति च । द्वादशाहादूर्ध्वभाविनस्त्रयोदशचतुर्दशरात्रादयः सर्वे सत्रविशेषाः । त्रयोदशसंख्याका रात्रयो यस्मिन्सत्रविशेषे सोऽयं त्रयोदशरात्र इति समुदायप्राधान्येनैकवचनान्ततया प्रायेण निर्देशो भवति । क्वचित्तु समुदायिनां रात्रिविशेषाणां प्राधान्यमभ्युपेत्यैक एव सत्रविशेषो बहुवचनान्तेन रात्रिशब्देनाऽऽम्नायते । तद्यथा—'त एता विꣳशतिꣳ रात्रीरपश्यन्' इति । तादृशे रात्रिसत्रे विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्पनीय इति प्राप्ते ब्रूमः—अस्य रात्रिसत्रविधेस्तावदर्थवादे प्रतिष्ठा श्रुता । सा चास्मिन्वाक्येऽत्यन्ताश्रुतात्स्वर्गात्प्रत्यासन्ना । तस्मात्प्रतिष्ठाकामो रात्रिसत्रं कुर्यादित्येवं प्रतिष्ठैव फलत्वेन कल्पनीया ॥

---

१ क. °वत्सा प्रति° । २ क. ब ङ. °ता. नेहाश्रुतात्पर° । ३ ख. °णां प्रत्येकं प्रा° । ४ ख. °विधेः स्तावकेऽर्थ° ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके दशमोऽनुवाकः)।

असावादित्योऽस्मिँल्लोक आसीत्तं देवाः पृष्ठैः परिगृह्य सुवर्गं लोकमगमयन्परैरवस्तात्पर्यगृह्णन्दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन्परैः परस्तात्पर्यगृह्णन्पृष्ठैरुपावारोहन्त्स वा असावादित्योऽमुष्मिँल्लोके परैरुभयतः परिगृहीतो यत्पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं यजमाना यन्ति परैरवस्तात्परिगृह्णन्ति दिवाकीर्त्येन (१) सुवर्गे लोके प्रति तिष्ठन्ति परैरवस्तात्पर्यं गृह्णन्ति पृष्ठैरुपावरोहन्ति यत्परे परस्ताच्च स्युः पराञ्चः सुवर्गाल्लोकान्निष्पद्येरन्यद्यवस्तात्च स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परःसामानो भवन्ति सुवर्ग एवैनाँल्लोक उभयतः पर्यं गृह्णन्ति यजमाना वै दिवाकीर्त्यं संवत्सरः परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति संवत्सर एवोभयतः (२) प्रति तिष्ठन्ति पृष्ठं वै दिवाकीर्त्यं पार्श्वे परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठꣳ शस्यते यज्ञस्यैव तन्मध्यतो ग्रन्थिं ग्रथ्नन्त्यविस्रꣳसाय सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणानेव यजमानेषु दधाति यत्पराचीनानि पृष्ठानि

(एकविंशतिरात्रकथनम्)

भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमं लोकं न (३) प्रत्यवरोहेयुरुद्वा मार्येयुर्यजमानाः प्र वा मीयेरन्यत्प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनु-न्मादायेन्द्रो वा अप्रतिष्ठित आसीत्स प्रजापति-मुपाधावत्तस्मा एतमेकवि॰शतिरात्रं प्रायच्छत्त-माऽहरत्तेनायजत ततो वै स प्रत्यतिष्ठद्ये बहुयाजि-नोऽप्रतिष्ठिताः (४) स्युस्त एकवि॰शतिरात्रमा-सीरन्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असा-वादित्य एकवि॰श एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाधावत्तस्मा एतमेकवि॰शतिरात्रं प्राय-च्छत्तमाऽहरत्तेनायजत ततो वै सोऽरोचत य एवं विद्वा॰स्स एकवि॰शतिरात्रमासते रोचन्त एवैक-वि॰शतिरात्रो भवति रुग्वा एकवि॰शो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकवि॰शोऽति-रात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृ-हीत्यै (५)।

[गुह्यन्ति दिवाकीर्त्यनेवोभयतो नार्पविष्ठिता आसत एकवि॰शतिश्च]

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया सप्तमाष्टके तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः)।

नवमेऽनुवाके विंशतिरात्रोऽभिहितः। अथ दशम एकविंशतिरात्रोऽभिधी-यते। तत्र प्रावदियमहःकल्पिः—आदावतिरात्रः। ततः पृष्ठ्यः षडहः। ततः

स्वरसामानस्त्रयोऽहर्विशेषाः। ततो दिवाकीर्त्यमेकमहः। पुनरपि त्रयः स्वरसामानः। पुनरपि पृष्ठ्यः षडहः। ततोऽतिरात्रः, इति।

तमिमं विधातुं प्रस्तौति—

असावादित्य इति। असौ स्वर्गे दृश्यमान आदित्यः पुरा भूलोक एव तिष्ठति स्म। तमादित्यं देवैः परिगृह्य पृष्ठारूढैः षड्भिरहोभिः स्वर्गं प्रापितवन्तः। तत्र च परशब्देन स्वरसामशब्देन च तत्र तत्र व्यवहियमाणैस्त्रिभिरहोभिरवस्तात्पर्यगृह्णन्, आदित्यो यथाऽवस्तान्नाऽऽगच्छति तथा व्यवधानं कृतवन्तः। परशब्दाभिधेयं किंचित्साम, तेन साम्ना निष्पाद्यमाना अहर्विशेषाः परा इत्युच्यन्ते। तथा दिवैव कीर्तनीयं किंचित्साम, तेन च निष्पाद्यमहरपि दिवाकीर्त्यमित्युच्यते। तेन चाहना तमादित्यं स्वर्गे प्रतिष्ठापितवन्तः। पुनरप्यनुष्ठीयमानैः परशब्दाभिधेयैरहोभिः परस्तादादित्यं पर्यगृह्णन्, यथा तत्र ऊर्ध्वमादित्यो न गच्छति तथा प्रतिबन्धं कृतवन्तः। एवं कृत्वा पुनरनुष्ठीयमानैः पृष्ठारूढैः षड्भिरहोभिः स्वर्गादुपावारोहन्। सोऽसौ दिवि दृश्यमान आदित्यः स्वर्गे लोके पराख्यैरहोभिरुभयतो नियमितत्वान्नोर्ध्वं गच्छति नाप्यवस्तादागच्छति।

तान्येतान्यहानि विधत्ते—

यत्पृष्ठानीति। आदित्यवाक्यवद्यजमानवाक्यं व्याख्येयम्।

दिवाकीर्त्यस्योभयतोऽनुष्ठेयान्परारूपानहर्विशेषान्व्यतिरेकमुखेन(ण) प्रशंसति—

यत्परे परस्तादिति। यद्युपरितनाः परारूपा अहर्विशेषा न स्युस्तदानीं स्वर्गं गता यजमानास्ततोऽप्यूर्ध्वं गमनस्य निवारकाभावात्स्वर्गादूर्ध्वं निर्गच्छेयुः। यदि चावस्तनाः परारूपा नानुष्ठीयेरंस्तदानीं व्यवधायकाभावादादित्यात्मकाः सर्वे यजमाना भूमिवर्तिनः प्रजाः सर्वा निमिषेण दहेयुः। तस्माद्दिवाकीर्त्यस्य पुरस्ताच्चोपरिष्टाच्च परःसामानोऽनुष्ठेयाः। ते चैनान्यजमानान्स्वर्गमिवावस्तादुपरिष्टाच्च निरुध्य स्थापयन्ति।

प्रकारान्तरेण दिवाकीर्त्यं परःसामारूपान्यहानि प्रशंसति—

यजमाना इति। दिवाकीर्त्यस्य यजमानस्थानीयत्वात्परःसाम्नां च संवत्सरस्थानीयत्वादुभयतस्तदनुष्ठाने यजमाना अवस्ताच्चोपरिष्टाच्च संवत्सरदेवतायामेव प्रतितिष्ठन्ति।

---

१ क. घ. ङ. च. अयं।

(एकविंशतिरात्रकथनम्)

पुनरपि प्रकारान्तरेण प्रशंसति—

पृष्ठं वै दिवाकीर्त्यमिति । यथा लोके पुरुषस्य पृष्ठभागो मध्यवर्ती पार्श्वभागावभयतो वर्तिनावेवमत्रापि दिवाकीर्त्यं पृष्ठस्थानीयं परःसामानस्तूभय-पार्श्वस्थानीयाः । किं चैवमस्मिन्दिवाकीर्त्ये परःसामानु चातिग्राह्या ग्रहा अपि भूयिष्ठा गृह्यन्ते । तथा हि दिवाकीर्त्ये परःसामानश्च गवामयन उत्पन्नाः । तत्र हि षोदकपात्रेभ्योऽतिग्राह्येभ्योऽधिकास्त्रयोऽतिग्राह्यास्तृतीयकाण्डोक्ता अङ्गच-स्त्वौषधीभ्य इत्यादिमन्त्रसाध्या विहिताः सन्ति । तद्विकृतित्वादत्रापि तेऽधिका ग्रहा गृह्यन्ते । अत एव शस्त्रपद्धावेकं शस्यते । तत्तेनाधिकानुष्ठानेन यज्ञस्यै-कविंशतिरात्ररूपस्य ग्रन्थिं ग्रथ्नन्ति दृढबन्धनं कुर्वन्ति । तच्च यज्ञस्य विस्रं-सनपरिहाराय भवति ।

पुनरपि दिवाकीर्त्ये विशेषं दर्शयति—

सप्त गृह्यन्त इति । दिवाकीर्त्यात्प्रतीचीनेषु दिनेष्वेकैकस्मिन्नेकैकोऽति-ग्राह्य इत्यनुक्रमेण त्रयो गृह्यन्ते । उत्तरेषु दिनेषु त एवावरोहक्रमेण गृह्यन्ते । त एते षडपि दिवाकीर्त्यदिने तथैव गृह्यन्ते । तेषां मध्ये सौर्यं उदुत्यं जातवेद-सिमिति मन्त्रसाध्यः सप्तमो गृह्यते । तदेवं तस्मिन्दिने सप्ताधिका ग्रहाः । ते च सैकयज्ञस्यामूर्ध्वगतसप्तच्छिद्रकर्तृप्राणसमाः । अतस्तदनुष्ठानेन यजमानेषु प्रा-णान्स्थापयन्ति । तदेवं दिवाकीर्त्यमहः प्रशस्तम् । यद्वा भूयिष्ठा ग्रहा इत्यादि गवामयनसम्बन्धिमन्त्रत्यागां चाहूनां प्रकृतिविकृतिभावद्योतनाय तल्लिङ्गं दर्शयितुं विधिरेवास्तु ।

अथावरोहरूपं पृष्ठषडहं विधत्ते—

यत्परराचीनानीति । दिवाकीर्त्यसदृशेभ्यः परःसामभ्यः पूर्वमनुष्ठितानि परराचीनान्यवरोहरूपाणि यानि पृष्ठसाम्यान्यहानि सन्ति तैर्यजमानाः स्वर्गं लोक-मारोहन्त्येव । अत ऊर्ध्वमिमं लोकं प्रति यद्यवरोहसाधनानि कानिचिदहानि नानुतिष्ठेयुस्तदानीं ते यजमाना मूर्तं लोकव्यवहारक्षमं विस्मृत्योन्मत्ता मृता वा भवेयुः । तस्मात्प्रतीचीनान्यवरोहरूपाणि पृष्ठाख्यान्यहान्यनुष्ठेयानि । तैरहोभि-रिमं लोकं प्रत्यवरोहन्ति । अपि त्वेनं लोकं प्रतिष्ठिता अनुन्मत्ताश्च भवन्ति ।

पूर्वं सुवर्गमेव तैर्लोकं यजमाना यन्तीत्यादिना कतिपयानामहर्विशेषाणां फलोपन्यासमुखेन स्वर्गार्थमयं कर्तव्यतया विहितः । अथ प्रतिष्ठार्थमिमं कर्तुं विधत्ते—

---

१ क. ख. ङ. च. °नीयो किं । २ स. °सामयुता अति°।

इन्द्रो वा इति । पुरा यथेन्द्रः प्रजापत्युपदेशादिमं क्रतुमनुष्ठाय प्रत्यतिष्ठत्, एवं बहुयागान्कृत्वाऽप्यप्रतिष्ठिता यजमाना एतं क्रतुमनुष्ठायाहर्गणैकविंशतिसंख्यासाम्नादुद्वादशमासाभिमानिदेवस्थानेषु पञ्चस्वृत्वभिमानिदेवस्थानेषु त्रिषु पृथिव्यादिलोकेष्वेकस्मिन्नादित्यलोके च तेष्वेकविंशतिस्थानेषु यथापूर्वं प्रतिष्ठन्ति तल्लोकवासिनः सर्वे प्राणिनो यथाप्रतिष्ठितास्तद्वत्प्रतिष्ठन्तीत्यर्थः ।

एवं प्रतिष्ठार्थं क्रतुं विधाय फलान्तरार्थं पुनर्विधत्ते—

असावादित्यो नेति । पुरा कदाचिदादित्यः स्वर्भान्वाख्येनासुरेण तमसा विद्धोऽन्येन वा मेघहिमादिना निरन्तरमावृतः सन्विशेषेण नाद्दीप्यत । ततः प्रजापत्युपदेशादेतं क्रतुमनुष्ठायादीप्यत । तद्वदन्येऽपि यजमानाः पूर्वं विद्याधनादिभिर्मनुष्येष्वप्रकाशमाना एतं क्रतुमनुष्ठाय पश्चात्प्रकाशन्ते । किंचात्राहुनामेकविंशतिसंख्यासद्भावात्तैकविंशतिस्तोमेन ऋद्धिप्रकाशहेतुत्वाद्ब्रह्मवर्चसं परिगृहीतम् । स च विबुधाद्यपेक्षया प्रौढत्वाद्दीप्यमान इव । अतस्तत्सम्पादेतदनुष्ठायिनोऽपि प्रकाशं प्राप्नुवन्ति, एकविंशतिस्तोमस्येतरप्रतिष्ठाधारत्वात् ।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्रावीति । अस्य विद्यादिप्रकाशहेतुत्वाद्ब्रह्मवर्चसमत्र परिगृहीतं भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः) ।

अर्वाङ्यज्ञः सं क्रामत्वमुष्मादधि मामभि ।
ऋषीणां यः पुरोहितः । निर्दैवं निर्वीरं कृत्वा
विष्कन्धं तस्मिन्हीयतां योऽस्मान्द्वेष्टि । शरीरं
यज्ञशमलं कृणोदिं तस्मिन्त्सीदतु योऽस्मान्द्वेष्टि ।
यज्ञं यज्ञस्य यत्तेजस्तेन सं क्राममामभि । ब्राह्म-
णानृत्विजं देवान्यज्ञस्य तपसा ते सवाहमा हुवे ।
इडेन पक्ष पं (१) ते हुवे सवाहम् । सं ते वृञ्जे ।

(अश्वमेधगतमन्त्रकथनम्)

सुकृतꣳ सं प्रजां पशून्। प्रैषान्त्सामिधेनीराघाराऽऽज्यभागावाश्रुतं प्रत्याश्रुतमा शृणामि ते। प्रयाजानूयाजान्त्स्विष्टकृतमिडामाशिष आ वृञ्जे सुवः। अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः। याज्यानुवाक्याभ्यामुप ते हुवे सवाहं यज्ञमा ददे ते वषट्कृतम्। स्तुतꣳ शस्त्रं प्रतिगरं ग्रहमिडामाशिषः (२) आ वृञ्जे सुवः। पत्नीसंयाजानुप ते हुवे सवाहꣳ सन्नितयजुरा ददे तव। पशून्त्सुतं पुरोडाशान्त्सवनान्योत यज्ञम्। देवान्त्सेन्द्रानुप ते हुवे सवाहमग्निꣳ स्विष्टान्त्सोमवतो ये च विश्वे (३)॥

(उप ग्रहमिडामाशिषो द्वाविꣳशच)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः॥ ११॥

(अथ सप्तमकाण्डे तृतीयप्रपाठक एकादशोऽनुवाकः)

दशमेऽनुवाक एकविंशतिराग्नेयोऽभिहविः। अथावशिष्टेष्वनुवाकेष्वश्वमेधगता मन्त्रा उच्यन्ते। तत्रास्मिन्ननुवाक आप्त्याख्यानामष्टाहुतीनां मन्त्रा उच्यन्ते। अत एव ब्राह्मणे विनियोगः पठ्यते—' अर्वाङ्यज्ञः संक्रामत्वित्याप्त्यै जुहोति ' इति।

तत्र प्रथममाह—

अर्वाङ्यज्ञ इति। योऽश्वमेधाख्यो यज्ञः स ऋषीणां ज्ञानवतां पूर्वसिद्धानां यजमानानां पुरोहितः सर्वार्थसाधनभावेन पुरस्तादवस्थापितः। स यज्ञोऽस्मान्मद्व्यतिरिक्तं देवदत्तादेर्यजमानादपक्रम्य मामभि मामुद्दिश्यार्वाङभिमुखः सन्नधिसंक्रामतु आभिमुख्येनाऽऽगच्छतु। अथ द्वितीयामाह—

निर्देवं निर्वीरमिति। यः पुरुषोऽस्मान्द्वेष्टि तस्य शरीरं निर्देवादिविशे

षणविशिष्टं कृत्वा तस्मिन्द्वेषणि पुरुषे क्षीयतां क्षीनत्वेनावस्थाप्यताम् । कार्त्स्न्यं शरीरम्, निर्देवं निर्गता यज्ञाङ्गभूता देवा यस्मात्तन्निर्देवं देवताभक्तिरहितमित्यर्थः । निर्गता वीराः पुत्रा भूत्वाश्च यस्मात्तन्निर्वीरम् । विरूपाः स्कन्धाद्यवयवा यस्य तद्विष्कन्धम् । किं च योऽस्मान्द्वेष्टि तस्मिन्द्वेषणि पुरुषे यज्ञशमलं यज्ञानुष्ठाने मलिनं कदाचिदप्यनुष्ठानरहितमित्यर्थः । तादृशं यत्कुसीदं निरन्तरं धनवृद्ध्याद्यर्जनेन यज्जीवनं तत्सीदतु क्षीणं पुमान्यज्ञे विमुखः केवलो वणिग्भूत्वा यथाकथंचित्तिष्ठत्वित्यर्थः ।

अथ तृतीयामाह—

यज्ञं यज्ञस्येति । हेऽश्वमेधाख्य यज्ञ सम्यगनुष्ठितस्य यज्ञस्य तव यत्तेजः फलं तेन फलेन सह त्वामभि संकामामिमुखो भूत्वा त्वां प्रविश । सूयतेऽभिषिच्यतेऽत्येभिषेकयुक्तो यज्ञः सवः । हे सव सम्यगनुष्ठितस्य यज्ञस्य ते तव तपसा सामर्थ्येनानुग्रहरूपेणानुगृहीतोऽहं ब्राह्मणान्सदस्यानृत्विजोऽध्वर्युप्रभृतीन्देवान्यष्टव्यानाहुव इहकर्मण्याह्वयामि ।

अथ चतुर्थीमाह—

इष्टेन पक्वमिति । हे सव यज्ञ, त इष्टेन त्वदीयेनेष्टयजनेनाहं पक्वमन्नमुपहुवे समीप आह्वयामि । ते तवानुग्रहात्सुकृतं संकृत्ये सम्यगावर्जितं कुर्वे पुण्यं संपादयामीत्यर्थः । तथा प्रजां पशून्संपादयामि ।

अथ पञ्चमीमाह—

प्रैषान्त्सामिधेनीरिति । प्रैषादीनि यज्ञाङ्गानि प्रसिद्धानि, तानि सर्वाणि तदुत्सिद्ध्यर्थमाशृणामि सर्वतः शास्त्रमुखाच्छ्रुत्वा संपादयामि । तथा प्रयाजादीनि यज्ञाङ्गानि सुवः फलरूपं स्वर्गं चाऽऽवृञ्जे सर्वतः संपादयामि ।

अथ षष्ठीमाह—

अग्निनेन्द्रेणेति । हे सव यज्ञाभ्यादयो ये देवा उक्ता याश्चानुक्ता अन्याः सर्वा देवताः, ये च तद्देवताविषये याज्यानुवाक्ये, तैः सर्वैः सहितोऽहं ते त्वत्तिसिद्ध्यर्थमुपहुवे समीप एवाध्वर्युप्रभृतीननुष्ठातॄनाह्वयामि । तथा ते त्वत्तिसिद्ध्यर्थं वषट्कृतं वषट्कारसहितं यज्ञं कृत्स्नमयेगमादहं स्वी करोमि ।

अथ सप्तमीमाह—

स्तुतश्च शस्त्रमिति । स्तोत्रशस्त्रादीनि यज्ञाङ्गानि सुवः फलरूपं स्वर्गं चाऽऽवृञ्जे सर्वतः संपादयामि । स्वर्गस्य प्राधान्यात्पुनरभिधानम् । हे सव त्व-

(अश्वमेधगतमन्त्रैकथनम्)

त्सिदूष्यर्थं पत्नीसंयाजानुद्दिश्योपहुव ऋत्विजः समीषमाहूवयामि । तथा तव त्वत्सिदूष्यर्थं समिष्टयजुः स्वी करोमि ।

अथाष्टमीमाह—

पशून्त्सुतमिति । येऽग्नीषोमीयादयः पशवः, यश्चाभिषुतः सोमो ये च सवनीयपुरोडाशा यानि च प्रातःसवनादीनि, यश्च तैर्निष्पाद्यः क्रत्सो यज्ञस्त्वाभ्यर्थनायुक्त इत्यनुवर्तते । हे सव ते त्वत्सिदूष्यर्थमहं देवानुपहुवे समीप आहूवयामि । किदृशान्देवान्, इन्द्रेण सह वर्तन्त इति सेन्द्रान् । अग्निर्मुखं येषां तेऽग्निमुखास्तान् । सोमो येषामस्ति ते सोमवन्तस्तान् । अपि च येऽन्ये विश्वे देवास्तान्सर्वानप्युपहुवे ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः) ।

भूतं भव्यं भविष्यद्वषट्त्स्वाहा नमः ऋक्साम यजुर्वषट्त्स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्त्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्त्स्वाहा नमोऽग्निर्वायुः सूर्यो वषट्त्स्वाहा नमः प्राणो व्यानोऽपानो वषट्त्स्वाहा नमोऽन्नं क्षत्रियविट्वषट्त्स्वाहा नमः पिता पुत्रः पौत्रो वषट्त्स्वाहा नमो भूर्भुवः सुवर्वषट्त्स्वाहा नमः (१) ॥

(भूरष्टौ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः)।

एकादश आप्त्याख्या मन्त्रा उक्ताः। अथ द्वादशे पर्याप्त्याख्या मन्त्रा उच्यन्ते।

तथा च ब्राह्मणे विनियोगः श्रूयते—'भूतं भव्यं भविष्यदिति पर्याप्तिर्जुहोति' इति।

तत्र प्रथममन्त्रमाह—

भूतं भव्यं भविष्यदिति। वषट्कारादीनि त्रीणि ब्रह्मणो नामानि। एभिश्च सत्यत्वमारूप्यायते। तथा सति कालत्रयवर्तीनि सत्यानीति वाक्यार्थो भवति। आदरार्थमेकार्थवाचिनां वषडादीनां त्रयाणां प्रयोगः। एतेभ्यः स्वाहेति शेषः। एवमुत्तरेष्वपि योजनीयम्।

तानेवानुत्तरान्मन्त्रानाह—

ऋक्साम यजुरिति। वेदच्छन्दोलोकदेवपाणान्नपितॄव्याहृतिविषया एतेऽष्टौ मन्त्राः पूर्वेण मन्त्रेण सहैतैर्मन्त्रैर्नवभिः पर्याप्त्याख्या आहुतयो होतव्याः।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः)।

आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान्। आपो देवीर्यज्ञिया माऽऽविशन्तु सहस्रस्य मा भूमा मा प्र हासीत्। आ मे ग्रहो भवत्वा पुरोरुक्स्तुतशस्त्रे माऽऽविशतां समीची। आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत्। आ मांऽग्निष्टोमो विशतूक्थ्यश्चातिरात्रो माऽऽविशत्वापिशर्वरः। तिरोअह्निया मा सुहुता आ वि-

(अश्वमेधगतमन्त्रकथनम्)

शन्तु सहस्रस्य मा भूमा मा प्र हासीत् (१)॥

(अग्निष्टोमो विंशत्यक्षरादिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके त्रयोदशोनुवाकः)।

पर्याप्तिनामका मन्त्रा द्वादशोऽभिहिताः। अथाऽऽभूनामका होमसम्बन्धत्रयोदशोऽभिधीयन्ते। तथाच ब्राह्मणे विनियोगः—'आ मे गृहा भवन्त्वित्यामुर्जुहोति' इति।

तत्र प्रथममाह—

आमे गृहा इति। मे मदर्थं ग्रहाः समीचीना आभवन्तु सर्वतः संपद्यन्ताम्। तथा प्रजा पुत्रादिरूपाऽपि मे मदर्थमाभवतु। तथा वीर्यावान्कर्मोपेतो यज्ञश्च मामाविशतु। तथा यज्ञिया यज्ञार्हा आपो देवीर्जलदेवता मामाविशन्तु। सहस्रस्य भूमा सहस्रसंख्याकस्य धनस्य बाहुल्यं मां कदाचिदपि मा प्रहासीन्मा परित्यजतु।

अथ द्वितीयमाह—

आ मे ग्रहो भवत्विति। मे मदर्थं ग्रहोऽप्यैन्द्रवायवादिकः स आभवतु सर्वतः संपद्यताम्। तथा पुरोरुग्रहं ग्रहीतुं पुरतः पठ्यमानो मन्त्रोऽप्यागच्छतु। तथा स्तोत्रशस्त्रे अपि समीची अनुकूले मामाविशताम्। तथाऽऽदित्याद्या देवाः सदस्या ब्राह्मणाश्च मामाविशन्तु। सहस्रस्येत्यादि पूर्ववत्।

अथ तृतीयमाह—

आ मेऽग्निष्टोम इति। सोमयागेषु प्रथमसंस्यारूपो योऽयमग्निष्टोमः स मामाविशतु। यश्च द्वितीयसंस्यारूप उक्थ्यः सोऽयं मामाविशतु। यश्चतुर्थसंस्यारूपोऽतिरात्रः सोऽपि मामाविशतु। कीदृशोऽतिरात्रः, अपिशर्वरः, अपि शर्वराणि मामानि शर्वर्या पठितव्यानि स्तोत्राणि यस्यासावपिशर्वरः। तथा विरो अह्नियाऽहन्[ह्]स्तिरस्कृत्य रात्रौ प्रयोक्तव्या अतिरात्रगवाः सोमविक्रेयाः। ते च सुष्ठु हुताः सन्तो मामाविशन्तु। सहस्रस्येत्यादि पूर्ववत्।

(अश्वमेधगतमन्त्रैकेचनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठके चतुर्दशोऽनुवाकः) ।

अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान्वातेन प्राणान्त्सूर्येण चक्षुंषि चन्द्रमसा नक्षत्राणि यमेन पितॄन्राज्ञा मनुष्यान्फलेन नादेयानजगरेण सर्पान्व्याघ्रेणाऽऽरण्यान्पशून्छ्येनेन पतत्रिणो वृष्णाऽश्वानृषभेण गा वस्तेनाजा वृष्णिनाऽवीर्म्रीहिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुम्बरेणोर्जं गायत्रिया छन्दाꣳसि त्रिवृता स्तोमान्ब्राह्मणेन वाचम् (१) ॥

(ब्राह्मणेनैकं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके चतुर्दशोऽनुवाकः) ।

आभूनामका मन्त्राश्चतुर्दशोऽभिहिताः । अथानुभूनामकाश्चतुर्दशोऽधीयन्ते तथा च ब्राह्मणे विनियोगः—'अग्निना तपोऽन्वभवदित्यनुभूर्जुहोति' इति । पाठस्तु—

अग्निना तपोऽन्वभवदिति । अयं यजमानोऽग्निना तपोऽन्वभवदग्निरूपो भावा तत्सामर्थ्येन सर्वं तपो व्याप्नोति । एवमुत्तरेष्वपि त्रयोविंशतिमन्त्रेषु व्याख्येयम् । तृतीयान्तैस्तत्तदात्मकत्वं यजमानस्येत्युच्यते । द्वितीयान्तैरर्पाप्यं वस्तु । अन्वभवदिति सर्वत्रानुषज्यते । ब्रह्म मन्त्रजातम् । रूपाणि प्रतिबिम्बात्मकानि । फलेन वृक्षगतेन पक्वेन । नादेयानदीवत्संपूर्णान्रसान् । मण्डूकादीनामिदं वनु-

(अश्वमेधगतमन्त्रकथनम्)

प्राणां निर्हरणे समर्थः प्रौढः सर्पोऽजगरः। वृषा पौढोऽधः। वाचं वेदात्मिकाम्। स्पष्टमन्यत्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके चतुर्दशोऽनुवाकः॥ १४॥

(अथ सप्तमाष्टके तृतीयप्रपाठके पञ्चदशोऽनुवाकः)।

स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽऽधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा कामाय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहाऽदित्यै स्वाहाऽदित्यै महि स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निखर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा (१)॥

(पुरुरूपाय स्वाहा दश च)।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके पञ्चदशोऽनुवाकः॥ १५॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके पञ्चदशोऽनुवाकः)।

अनुवाकमन्त्राश्चतुर्दशेऽभिहिताः। अथ पञ्चदशे वैश्वदेवाख्या आहुतिमन्त्रा उच्यन्ते।

कल्पः—'आकूत्यै प्रयुजेऽग्नये स्वाहेति चत्वार्याज्यग्रहणानि जुहोति स्वा-

हाऽऽधिमाधीताय स्वाहेति त्रीणि वैश्वदेवानि, सोऽयं दीक्षाहुतिकालो विपृक्तः सप्ताहमन्वहमौद्ग्रहणैर्वैश्वदेवैश्चात्तरोत्तरैः प्रचरति बहुत्वमेऽहन्यौद्ग्रहणानि जुहोति सर्वस्मै स्वाहेति पूर्णाहुतिमुत्तमाम्, इति ।

तत्रौद्ग्रहणमन्त्राः प्रथमकाण्डे सामाम्नाताः। वैश्वदेवमन्त्रा इहाऽऽम्नायन्ते।

तेषु प्रथमदिनमन्त्रानाह—

स्वाहाऽऽधिमाधीतायेति। एते च मन्त्रा उभयतः स्वाहाकाराः। तत्रान्तिमस्वाहाकारो हविष्प्रदाने वर्तते। प्रथमस्तु स्वाहाकारो निपाता अनेकार्था इति न्यायेनोचितार्थे योजनीयः। आ समन्ताद्धीयते स्थाप्यते मन्त्राद्यनुष्ठाननिर्णयोऽस्यां बुद्धावित्याधिर्बुद्धिस्तां बुद्धिं स्वाहा संपादयामीत्यत्रोचितार्थः। अधीताय तस्यां बुद्धौ स्थापिताय मन्त्राभिमानिने देवाय स्वाहुतमिदमस्तु। तथाऽऽधीतं बुद्धौ संगृहीतं स्वाहा विस्मरणमन्तरेण धारयामि। मनसे तद्धारणसमर्थायान्तःकरणाय स्वाहुतमिदमस्तु । तथा मनस्त्वयाविश्चेन्तःकरणं स्वाहा संपादितवानस्मि। प्रजापतये तस्य मनसः प्रेरकाय स्वाहुतमिदमस्तु।

अथ द्वितीयदिनमन्त्रानाह—

काय स्वाहेति। प्रथममन्त्रगतः कशब्दः प्रजापतिवाचकः। को ह वै नाम प्रजापतिरिति श्रुत्यन्तरात्। द्वितीयमन्त्रगतस्तु कशब्दः सर्वनामत्वात्प्रश्नस्तवाची। तेन चाविज्ञानं लक्ष्यते । ईदृशोऽयमिति केनापि ज्ञातुमशक्य इत्यर्थः। कतमशब्दो बहूनां मध्ये निर्धारणप्रश्ने वर्तते । तेन च सर्वेषु देवेषु मध्ये शास्त्रविवरणानिर्धारणीयस्वरूप इत्युक्तं भवति।

अथ तृतीयदिनगतान्मन्त्रानाह—

अदित्यै स्वाहाऽदित्या इति। अदितिर्भूमिः। मही विस्तीर्णा। सुभूतिका सुखप्रदा।

अथ चतुर्थदिनगतान्मन्त्रानाह—

सरस्वत्यै स्वाहेति। पावकायै शोधयित्र्यै।

अथ पञ्चमदिनगतान्मन्त्रानाह—

पूष्णे स्वाहेति। अदृष्टार्थं श्रौतस्मार्तमार्गाय हितः पथ्यः। नराणां धारयिता नरांधिषः।

अथ षष्ठदिनगतान्मन्त्रानाह—

---

१ क. घ. ङ. च. °वानीति। सोऽ°। २ ख. °विचारेण नि°।

(अश्वमेधगतमन्त्रकथनम्)

त्वष्ट्रे स्वाहेति। तूर्णं प्राप्तस्तुरीपः। बहुमूर्तिर्विशेषैर्युक्तः पुरुरूपः।

अथ सप्तमदिनगतान्मन्त्रानाह—

विष्णवे स्वाहेति। नितरां खुरं पापरोगादिबाधमर्हन्तीति निखुर्याः। तेषां पाता निखुर्यपः। विद्यैश्वर्यादिराहित्येन न्यग्भावयोग्या निभूयास्तेषां पाता निभूयपः।

अथ पूर्णाहुतिमन्त्रमाह—

सर्वस्मै स्वाहेति। सर्वप्रकारपालकाय स्वाहुतमित्यर्थः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके पञ्चदशोऽनुवाकः॥ १५॥

(अथ सप्तमाष्टके तृतीयप्रपाठके षोडशोऽनुवाकः)।

दद्भ्यः स्वाहा हनूभ्यꣳ स्वाहोष्ठाभ्यꣳ स्वाहा मुखाय स्वाहा नासिकाभ्यꣳ स्वाहाऽक्षीभ्यꣳ स्वाहा कर्णाभ्यꣳ स्वाहा पार इक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहाऽवार इक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्ष्णे स्वाहा भ्रूभ्यꣳ स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्यः स्वाहा वहाय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीकसाभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्यꣳ स्वाहा (१) अꣳसाभ्यꣳ स्वाहा दोषभ्यꣳ स्वाहा बाहुभ्यꣳ स्वाहा जङ्घाभ्यꣳ स्वाहा श्रोणीभ्यꣳ स्वाहोरुभ्यꣳ स्वाहाऽष्ठीवद्भ्यꣳ स्वाहा जङ्घाभ्यꣳ स्वाहा भसदे स्वाहा शिश्नखण्डेभ्यः स्वाहा वालधानाय स्वाहाऽण्डाभ्यꣳ

स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यः
स्वाहा प्रजननाय स्वाहा पद्भ्यः स्वाहा शफेभ्यः
स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा लोहिताय
स्वाहा मांसाय स्वाहा स्नावभ्यः स्वाहाऽस्थभ्यः
स्वाहा मज्जभ्यः स्वाहाऽङ्गेभ्यः स्वाहाऽऽत्मने
स्वाहा सर्वस्मै स्वाहा (२) ॥

[पार्श्वाभ्याꣳ स्वाहा मज्जभ्यः स्वाहा पद्भ्यं]

इति [illegible] तृतीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके षोडशोऽनुवाकः) ।

पञ्चदशे वैश्वदेवाहुतिमन्त्रा उक्ताः । षोडशे पशुरुद्रहोममन्त्रा उच्यन्ते । तथा च ब्राह्मणम्—'दृढ्यः स्वाहा हनूभ्याꣳ स्वाहेत्यङ्गहोमाञ्जुहोति' इति ।

पाठस्तु—

दृढ्यः स्वाहेति । अत्र दन्तहन्वादयोऽवयवाः प्रसिद्धाः । इक्षवोऽक्षिरोमाणि । ते च पार उपरिभागे वर्तन्ते । कस्मात्पार इति तदुच्यते—अवार्येभ्यः पक्ष्मभ्योऽधोभागवर्तिभ्यो रोमभ्य उपरि वर्तन्ते । एतादृशा ये सन्ति तेभ्यः स्वाहेति योजनीयम् । एवं पार्येभ्यः पक्ष्मभ्योऽवारेऽधोभागे ये केचिदिक्षवो वर्तन्ते । अत्र शिरःशब्देन ललाटादधोभागो विवक्षितः । मूर्धशब्देन चोपरिभागः । तत्रत्यं मांसं मस्तिष्कः । वहशब्देन रथयुगस्य वाहकः प्रदेश उच्यते । ग्रीवाशब्देन गलगता नाड्यः । स्कन्धशब्देन गलस्योपरिभागावयवाः । कीकसाशब्देन पृष्ठास्थिगता गुलिकाः । पृष्टिशब्देनोभयपार्श्वगता अस्थिविशेषाः । पाजो बलं तत्स्थानं हृदयं पाजस्यम् । दोःशब्देन बाहुशब्देन च पूर्वपदयोरुत्तराधरभागावुच्येते । जङ्घाशब्देन मध्यभागः । श्रोण्यादिशब्दैश्चतुर्भिः पृष्ठगतयोः पादयोश्चत्वार ऊर्ध्वाधोभागा उच्यन्ते । भसच्छब्देनापानप्रदेशः । शिखण्डा ऊर्ध्वकेशाः । वालधानं पुच्छदण्डः । प्रजननमुत्पादनसामर्थ्यम् । अङ्गान्यनुक्तावयवाः । आत्मा तत्रत्यो जीवः । सर्वं कृत्स्नशरीरम् । एतैः पञ्चाशन्मन्त्रैरङ्गहोमान्कुर्यात् ॥

(अश्वमेधगतमन्त्रकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

अथ सप्तमाष्टके तृतीयप्रपाठके सप्तदशोऽनुवाकः।

अञ्ज्येताय स्वाहाऽञ्जिसक्थाय स्वाहा शितिपदे स्वाहा शितिककुदे स्वाहा शितिपृष्ठाय स्वाहा शित्यंसाय स्वाहा पुष्पकर्णाय स्वाहा शित्योष्ठाय स्वाहा शितिभ्रुवे स्वाहा शितिभसदे स्वाहा श्वेतानूकाशाय स्वाहाऽञ्जये स्वाहा ललामाय स्वाहाऽसितग्रीवे स्वाहा कृष्णैताय स्वाहा रोहितैताय स्वाहाऽरुणैताय स्वाहेदृशाय स्वाहा कीदृशाय स्वाहा तादृशाय स्वाहा सदृशाय स्वाहा विसदृशाय स्वाहा सुसदृशाय स्वाहा रूपाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(रूपाय स्वाहा द्वे च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके सप्तदशोऽनुवाकः)।

षोडशोऽनुवाकेऽङ्गहोममन्त्रा उक्ताः। अथ सप्तदशाष्टादशयो रूपहोममन्त्रा उच्यन्ते। तथाच ब्राह्मणम्—' अञ्ज्येताय स्वाहा कृष्णाय स्वाहा श्वेताय स्वाहेत्यश्वरूपाणि जुहोति ' इति।

तत्रैकानुवाकगतानाह—

अञ्ज्येताय स्वाहेति। अञ्जिः शुक्लः। एतः सांध्यो वर्णः। अञ्जिश्वेतावेतश्चेत्यञ्जेतः। मिश्रवर्ण इत्यर्थः। अञ्जिसक्थः श्वेतारुणः। शितिः

श्वेतस्तादृशपादयुक्तः शितिपात् । ककुदादयोऽपि श्वेता यस्येति योज्यम् । रन्ध्राणि कर्णादिच्छिद्राणि । पुष्पाकारलक्षणं कर्णयोर्यस्यासौ पुष्पकर्णः । श्वेताभ्यां भ्रूभ्यां युक्तः शितिभ्रूः । श्वेतेनापानेन युक्तः शितिमत्तत् । अनुकाशमक्षुण्णदेशः । अक्तिः श्वेतरूक्षशरीरः । ललाटश्वेत्ययुक्तो ललामः । कृष्णजानुयुक्तोऽसितज्ञुः । कृष्णमिश्रसांध्यवर्णयुक्तः कृष्णेतः । जपाकुसुमवद्रक्तवर्णयुक्तः संध्यावर्णो लोहितैतः । ईषदारुण्ययुक्तः संध्यावर्णोऽरुणेतः । इदमिति स्पष्टत्वेनावभासमानाकार ईदृशः । किमित्यनिश्चितत्वेनावभासमानः कीदृशः । दूरस्थदृष्टान्तेनोपमीयमानस्तादृशः । समीपस्थदृष्टान्तेनोपमीयमानः एतादृशः । उपमारहितो विसदृशः । सुखेनोपमातुं शक्यः सुसदृशः । आकारसामान्यं रूपम् । अनुक्तसंग्रहार्थः सर्वशब्दः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके तृतीयप्रपाठकेऽष्टादशोऽनुवाकः) ।

कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहाऽरुणाय स्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहा शोणाय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सुरूपाय स्वाहाऽनुरूपाय स्वाहा विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निमक्षाय स्वाहा सर्वस्मै स्वाहा (१) ॥

(कृष्णाय षट्चत्वारिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अश्वमेधगतमन्त्रकथनम्)

(अथ सप्तमकाण्डे तृतीयप्रपाठकेऽष्टादशोऽनुवाकः)।

सप्तदशेऽश्वावयवरूपमन्त्रा उक्ताः। अष्टादशे त्ववयविरूपमन्त्रा उच्यन्ते। विनियोगस्तु पूर्वमेवोदाहृतः।

पाठस्तु—

कृष्णाय स्वाहेति। कृत्स्नेऽपि शरीरे काष्ण्र्ययुक्तः कृष्णः। एवं श्वेतादयः। पिशङ्गो गोरोचनवर्णः। सारङ्गः श्वातकवर्णः। ईषद्रक्तोऽरुणः। गौरोऽत्यन्तश्वेतः। बभ्रुः कपिलः। नकुलो नकुलवर्णः। रोहितोऽत्यन्तरक्तः। शोणः पीतलोहितः। श्यावः पीतकृष्णवर्णः। श्यामो नीलः। अत्यन्तकृष्णः पाकलः। शोभनरूपः सुरूपः। अनुकूलरूपोऽनुरूपः। विविधरूपो विरूपः। समानरूपः सरूपः, नात्यन्तं सुरूपो नात्यन्तं कुरूप इत्यर्थः। प्रतिकूलरूपः प्रतिरूपः। मिश्रवर्णः शबलः। कमलवर्णः कपलः। चित्रवर्णः पृश्निः। तथाविधाम्भां सक्रियम्भामुपेतः पृश्निसक्थः। अनुक्तसंग्रहार्थः सर्वशब्दः। पूर्वानुवाकोक्तैः षड्विंशतिमन्त्रैरेतदनुवाकोक्तैस्त्रयोविंशतिमन्त्रैश्चेत्येवमेकोनपञ्चाशन्मन्त्रैरश्वरूपाणि जुहुयात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

(अथ सप्तमाष्टके तृतीयप्रपाठक एकोनविंशोऽनुवाकः)।

ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वस्मै स्वाहा (१)॥

(ओषधीमन्त्रश्चतुर्विंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयप्रपाठके एकोनविंशोऽनुवाकः॥ १९॥

(अथ सप्तमकाण्डे तृतीयप्रपाठक एकोनविंशोऽनुवाकः)।

अक्षयविरूपमन्त्रा अष्टादशे प्रोक्ताः। अथौषधिमन्त्रा एकोनविंशेऽभिधीयन्ते। तथा च ब्राह्मणम्—' ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहेत्योषधिहोमाञ्जुहोति ' इति।

पाठस्तु—

ओषधीभ्यः स्वाहेति। तूलान्यग्राणि काण्डानि दण्डसदृशा भागाः। वल्शानि दैधीभावसंधयः। गृहीतानि प्राणिभिरुपयुक्तानि। अगृहीतानि प्राणिभिरनुपयुक्तानि। अवपन्नानि स्तम्बेभ्यो वियुज्य भूमौ पतितानि। शयानानि स्तम्बैः सह भूमौ पतितानि। अनुक्तसंग्रहार्थः सर्वशब्दः। एतैर्दर्शमिर्मन्त्रैरोषधिहोमाञ्जुहुयात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठक एकोनविंशोऽनुवाकः॥ १९॥

(अथ सप्तमाष्टके तृतीयप्रपाठके विंशोऽनुवाकः)।

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धेभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा सꣳशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहाऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा सꣳरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा (१)॥

(वनस्पतिभ्यः षट्चत्वारिꣳशत्)।

(अथमेधगतमन्त्रकथनम्।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
तृतीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

प्रजवं ब्रह्मवादिनः किमेष वा आप्त्या आदित्या उभयोः प्रजापतिरन्वायत्त इन्द्रो वै सहस्क्रिन्द्रो वै शिथिलः प्रजापतिरकामयताऽऽदः सा विराडसावादित्योऽवाङ्भूतमा मेऽग्निना तपः स्वाहाऽऽधिं दद्भ्योऽज्येतायं कृष्णाषोषधीभ्यो वनस्पतिभ्यो विंशतिः ॥ २० ॥

प्रजवं प्रजापतिर्यदैच्छन्दोमं तेऽहवे तवाहमोषधीभ्यो
द्विचत्वारिंशत् ॥ ४२ ॥
हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके तृतीयः
प्रपाठकः ॥ ३ ॥

(अथ सप्तमकाण्डे तृतीयप्रपाठके विंशोऽनुवाकः)।

ओषधिहोममन्त्रा एकोनविंशेऽभिहिताः। वृक्षमन्त्रा विंशेऽभिधीयन्ते। तथा च ब्राह्मणम्—'वनस्पतिभ्यः स्वाहेति वनस्पतिहोमाञ्जुहोति' इति।

पाठस्तु—

वनस्पतिभ्य इति। स्कधांसि द्वैधीभावसंशयः। एकस्मिन्कर्मणीदानीमुपयुक्तादन्यः कालान्तर उपयोक्ष्यमाणः शिष्टः। कालान्तरेऽपि तत्कर्मोपयुक्तादन्योऽतिशिष्टः। कर्मान्तरेष्वप्युपयुक्तादन्यः परिशिष्टः। लोकव्यवहारेऽप्युपयुक्तादन्यः संशिष्टः। उपयुज्य त्यक्त उच्छिष्टः। इदानीं पूर्वैः फलैर्वर्जितो रिक्तः। तद्युक्तस्त्वरिक्तः। सर्वदा तद्वर्जितः परिक्तः। पर्णैरपि वर्जितः संरिक्तः। सर्वैः सर्वदा संसृष्ट उदिक्तः। अनुक्तसंग्रहार्थः सर्वशब्दः। एतेषामेकोनविंशतिमन्त्रैर्वनस्पतिहोमाञ्जुहुयात्।

अथास्य प्रपाठकस्य विनियोगसंग्रहः—

अविधाकर्म तृतीयाद्ये द्वितीये क्रतुसंस्तवः।
यज्ञयोदशरात्रोऽसौ तृतीयेऽथ चतुर्थके ॥ १ ॥

---

१ ख. च सर्वेषु।

(अश्वमेधगतमन्त्रकथनम्)

स्याच्चतुर्दशरात्रोऽथ पञ्चमेऽन्यश्च तादृशः ।
षष्ठसप्तमयोः स्यातां द्वौ पञ्चदशरात्रकौ ॥ २ ॥
यः सप्तदशरात्रोऽथमष्टमे नवमे पुनः ।
नवोद्विंशतिरात्रोऽथ दशमे समुदीरितः ॥ ३ ॥
एकविंशतिरात्रोऽथ मन्त्राः सर्वेऽश्वमेधगाः ।
अर्वाङ्नष्टावाप्तिमन्त्रा भूतं पर्याप्तयो नव ॥ ४ ॥
आभूमन्त्रास्त्रयो ह्या मे ह्यनुभूमन्त्रकाः पुनः ।
चतुर्विंशतिसंख्याः स्युरग्निनेत्येवमादयः ॥ ५ ॥
दीक्षाहोमार्थमन्त्रास्तु स्वाहा द्वाविंशतिर्मताः ।
दद्म्योऽङ्कमन्त्राः पञ्चाशदङ्गि षड्विंशतिस्तथा ॥ ६ ॥
कृष्णा त्रयोविंशतिः स्युर्मिलित्वा रूपमन्त्रकाः ।
द्वादशौषधिमन्त्राः स्युस्त्रयोविंशतिरीरिताः ॥ ७ ॥
वनस्पतिभ्यो वृक्षाख्यमन्त्रा उक्ताः प्रपाठके ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुरुषार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥

(प्रथमचतुर्विंशतिरात्रकथनम्)

(अथ सप्तमाष्टके चतुर्थः प्रपाठकः)

तत्र प्रथमोऽनुवाकः।

हरिः ॐ।

बृहस्पतिरकामयत श्रन्मे देवा दधीरन्गच्छेयं पुरोधामिति स एतं चतुर्विꣳशतिरात्रमपश्यत्तमाऽहरत्तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत्पुरोधां य एवं विद्वाꣳसश्चतुर्विꣳशतिरात्रमासते श्रद्देभ्यो मनुष्या दधते गच्छन्ति पुरोधां ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरमावास्यः (१) इमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्त्यसंत्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं दवता एव प्रष्ठरवं रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथंतराभ्यां वन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव (२) यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्यार्द्धमासार्धनी द्युती ताभ्यामेव सुवर्गं लोकं यन्ति चतुर्विꣳशतिरात्रो भवति चतुर्विꣳशतिरर्धमासाः सँवत्सरः सँवत्सरः सुवर्गो लोकः सँवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै (३)॥

(अन्तरिक्षं गौरसावायुराभ्यामेव, पञ्चचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ तृतीयकाण्डे चतुर्थः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
एकविंशतिरात्रान्तं तृतीयके ।
चतुर्विंशतिरात्रादि चतुर्थेऽथ प्रवक्ष्यते ॥

द्वौ चतुर्विंशतिरात्रौ तयोराद्यं प्रथमेऽनुवाके विधत्ते—

बृहस्पतिरिति । पुरा कदाचिद्बृहस्पतिर्देवैरिन्द्रादिभिरविभ्यतनीयः सन्यज्ञस्येवमकामयत—एते देवा मे मदर्थं अहदवीरत्वयं बृहस्पतिरस्मभ्यं हित इति विभ्यतं धारयन्तु । ततोऽहं पुरोधां पौरोहित्यमाचार्यत्वरूपं मुख्यत्वं वा गच्छेयमिति । ततस्तदुपायं विचार्य शास्त्रमुखेन(ण) चतुर्विंशतिरात्रं निश्चित्य तमनुष्ठाय देवैर्विभ्यतनीयः सन्पुरोधां प्राप्तवान् । एवमन्येऽपि यजमाना एतदनुष्ठानेन मनुष्यैर्विभ्यतनीयाः सन्तः पुरोधां प्राप्नुवन्ति ।

तत्र कानिचिदहानि विधत्ते—

ज्योतिर्गौरायुरिति । अत्र चत्वारस्त्र्यहा विज्ञेयाः । चाक्ता विवक्षितसंख्यायाः पूरणात् ।

तत्र चतुर्णां त्र्यहानामानुपूर्व्यं विधत्ते—

अभिपूर्वमिति । इतो निर्गतानामानुपूर्व्येणाथ स्वर्गलोकारोहणम् ।

अथ पृथग्यः षडहश्चत्वारश्छन्दोमा इत्येवं द्वादशाहगतानि दशाहानि विधत्ते—

असत्रं वा इति । पूर्ववद्व्याख्येयम् ।

अथैतत्कृतगतामहःसंख्यां प्रशंसति—

चतुर्विंशतिरात्र इति । संवत्सरसाम्यादर्धमासद्वारा संवत्सरं प्राप्य तत्कालीनकर्मानुष्ठानद्वारा स्वर्गं प्रविविक्षन्ति । तथा गायत्रीद्वारा ब्रह्मवर्चसं प्राप्नुवन्ति ।

(द्वितीयचतुर्विंशतिरात्रकथनम्)

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति। गायत्रीद्वारा ब्रह्मवर्चसप्राप्तेरुक्तत्वात्तत्परिग्रहः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके
प्रथमोऽनुवाकः॥ १॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः)।

यथा वै मनुष्या एवं देवा अश्वं आसन्तेऽकाम-
यन्तावर्ति पाप्मानं मृत्युमपहत्य देवीꣳ सꣳसदं
गच्छेमेति त एतं चतुर्विꣳशतिरात्रमपश्यन्तमाऽह-
रन्तेनायजन्त ततो वै तेऽवर्ति पाप्मानं मृत्युमप-
हत्य देवीꣳ सꣳसदमगच्छन्न्य एवं विद्वाꣳसश्चतु-
र्विꣳशतिरात्रमासतेऽवर्तिमेव पाप्मानमपहत्य श्रियं
गच्छन्ति श्रीर्हि मनुष्यस्य (१) देवीं सꣳसज्ज्यो
तिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै
पृष्ठ्यः षडहो भवति षड्वा ऋतवः संवत्सरस्तं
मासा अर्धमासा ऋतवः प्रविश्य देवीꣳ सꣳसदमग-
च्छन्न्य एवं विद्वाꣳसश्चतुर्विꣳशतिरात्रमासते संव-
त्सरमेव प्रविश्य वस्यसीꣳ सꣳसदं गच्छन्ति त्रय-
स्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः
परस्तात्त्रयस्त्रिꣳशैरेवोभयतोऽवर्ति पाप्मानमपहत्य
देवीꣳ सꣳसदं मध्यतः (२) गच्छन्ति पृष्ठानि
हि दैवीꣳ सꣳसज्जामि वा एतत्कुर्वन्ति यत्त्रयस्त्रयस्त्रि-
ꣳशा अन्वञ्चो मध्येऽनिरुक्तो भवति तेनाजाम्यू-
र्ध्वानि पृष्ठानि भवन्त्यूर्ध्वाश्छन्दोमा उभाभ्यांꣳ

रूपाभ्यां॰ सुवर्गं लोकं यन्त्यसंत्रं वा एतद्यद्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरवं रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवः (३) छन्दोमा ओजस्येव वीर्ये पशुषु प्रतिं तिष्ठन्ति त्रयस्त्रयस्त्रिं॰शा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिं॰शाः परस्तान्मध्ये पृष्ठान्युरो वै त्रयस्त्रिं॰शा आत्मा पृष्ठान्यात्मन एव तद्यजमानाः शमं नह्यन्तेऽनार्त्यै बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रतिं तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्तुती ताभ्यामेव (४) सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि [illegible] प्रत्यङ्पडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोरूर्ध्वोत्तिष्ठन्ति त्रिवृतोऽधि त्रिवृतमुप यन्ति स्तोमानां॰ संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययं वाव स क्षयोऽस्मादेव तेन क्षयान्न यन्ति चतुर्विं॰शतिरात्रो भवति चतुर्विं॰शतिरर्धमासाः सांवत्सरः सांवत्सरः सुवर्गो लोकः सांवत्सर एव सुवर्गे लोके प्रतिं तिष्ठन्त्यथो चतुर्विं॰शत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै (५) ॥

(मनुष्यस्य मध्यतः पशवस्ताभ्यामेव सांवत्सरश्चतुर्विं॰शतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(द्वितीयचतुर्विंशतिरात्रकथनम्)

(अथ सप्तमकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके कश्चिच्चतुर्विंशतिरात्रोऽभिहितः। अथ द्वितीयेऽन्यश्चतुर्विंशतिरात्रोऽभिधीयते।

तमेवं विधत्ते—

यथा वै मनुष्या इति। यथा मनुष्या दारिद्र्यहेतुभूतपापयुक्ता एवं देवा अपि पूर्वमासन्। ते च देवाः कदाचिदेवमकामयन्त। वार्तिर्वृत्तिर्जीवनोपायो धनसंपत्। तद्भावोऽवार्तिः। तत्र हेतुः पाप्मा दारिद्र्यहेतुर्जन्मान्तरकृतः पापविशेषः। स एव क्लेशहेतुत्वान्मृत्युः। तमेवादृशमवार्तिं पाप्मानं मृत्युं केनापि सुकृतानुष्ठानेनापहत्य देवसंबन्धिनीं संपत्तिं प्राप्नुयामेति विचार्य चतुर्विंशतिरात्रं क्रतुयागं शास्त्रमुखान्निश्चित्य तदनुष्ठानेन तत्फलं प्राप्ताः। एवं मनुष्या अपि तदनुष्ठानेन दारिद्र्यहेतुपापनिवृत्तिद्वारा देवसंबन्धिनीं संसदं प्राप्नुवन्ति। देवाः सम्यक्सीदन्ति सुखेनावतिष्ठन्ते यस्यां श्रियां सा श्रीरेव दैवी संसत्। मनुष्या हि श्रियमेव देवसभां मन्यन्ते।

तत्र प्रथममहर्विधत्ते—

ज्योतिरतिरात्र इति। ज्योतिष्टोमविशेषो योऽयमतिरात्रः स एव प्रथममहस्तेन ज्योतिषा स्वर्गः प्रकाश्यते।

अनन्तरभावीनि षडहानि विधत्ते—

पृष्ठ्यः षडह इति। षड्विधैः पृष्ठस्तोत्रैर्निष्पाद्यः पृष्ठ्यः षडहः स्तोमानुष्ठेयः। षट्संख्याका ऋतवस्ते च संभूय संवत्सरी भवन्ति। तं च संवत्सरं द्वादश मासाश्चतुर्विंशतिरर्धमासाः षड्ऋतवश्चावयवत्वेन प्रविशन्ति येन धनसमृद्धां सभां प्राप्नुवन्ति। मनुष्या अपि तथैव पृष्ठ्यषडहयुक्तेन चतुर्विंशतिरात्रेण फलं प्राप्नुवन्ति।

अथान्यान्यपि षडहानि विधत्ते—

त्रयस्त्रयस्त्रिꣳशा इति। अत्रेयमहःकल्प्तिः सूत्रकारेण दर्शिता—'संसदा चतुर्विंशतिरात्रेण स्वर्गे लोके सीदन्त्यतिरात्रश्चतुर्विंश उक्थ्य आरम्भणीयस्त्रिवृदा पृष्ठ्यस्तोमः। षडहस्त्रयस्त्रिꣳशमहर्निरुक्तं त्रयस्त्रिꣳशं [निरुक्तं] त्रिणवं त्रयोविंशे त्रिणवं त्रयस्त्रिꣳशमहर्निरुक्तं त्रयस्त्रिꣳशनिरुक्तं पृष्ठ्यस्तोमः षडहः पञ्चदशत्रिवृदहरनिरुक्तं ज्योतिष्टोमो वैश्वानरोऽतिरात्रः' इति। यदेतमतिरात्ररूपं प्रथममहः सूत्रेऽभिहितं तज्ज्योतिरतिरात्रो भवतीति वाक्येनाऽऽम्नातम्। यच्चा-

रम्भणीयरूपं द्वितीयमहस्तच्छाखान्तरगतम् । तृतीयमहरारम्भाष्टमान्तः परामृशः पृष्ठ्यः षडहः । तत्र षष्ठमहरारभ्य त्रयस्त्रिंशरूपम् । यश्चाऽऽ(श्चाऽऽ)दित आरभ्य गणनायामष्टममहः । ततो नवममहरनिरुक्तं त्रयस्त्रिंशं, स्पष्टलिङ्गैर्मन्त्रैर्गानं निरुक्तं, तद्विपरीतमनिरुक्तम् । ततो दशममहर्निरुक्तं त्रयस्त्रिंशम् । त एवैकादशमनवमदशमा अहर्विशेषाख्ययोऽवस्तादधोभागे वर्तमानास्त्रयस्त्रिंशाः । तत एकादशद्वादशत्रयोदशचतुर्दशाख्यान्यहानि त्रिणवैकविंशद्वयत्रिणवरूपाणि मध्यवर्तीनि पृष्ठानीत्युच्यन्ते । ततः पञ्चदशषोडशसप्तदशा अहर्विशेषाभिसंज्ञकाः परस्तादूर्ध्वभागे वर्तमानास्त्रयस्त्रिंशाः । तेषु त्रिषु मध्यमं(मे !) निरुक्तं त्रयस्त्रिंशम् । तस्मादुपरितनं त्रयस्त्रिंशस्तोमयुक्तं[क्तम् निरुक्तम्] । सप्तदशसंख्यापूरकं दिनमारभ्य द्वाविंशदिनपर्यन्तमावृत्तः पृष्ठ्यः षडहः । अत एवायं मध्यवर्तीति निर्दिश्यते । तत ऊर्ध्वमुपान्तिममहस्त्रिवृदनिरुक्तं ज्योतिरभिष्टोमसंज्ञम् । तत ऊर्ध्वमतिरात्रोऽन्तिमः । एवं स्थिते सत्येकादशादिचतुर्दशान्ताः मध्यवर्तिनोऽहश्चतुष्टयादध उपरिष्टाच्च ये त्रिसंख्याकास्त्रयस्त्रिंशास्तेरुभयतोऽवस्थितैर्दारिद्र्यहेतुं पाप्मानमपहत्य दैवीं सभां मध्यवर्तिनीं गच्छन्ति । यानि मध्यवर्तीनि चत्वारि पृष्ठारव्यान्यहान्येतान्येवात्र दैवी संसदित्युच्यते । तस्मादुभयतस्त्रयस्त्रिंशयुक्तान्यहानि कुर्यादिति विध्युन्नयः ।

अथाधोवर्तिषु त्रिषु त्रयस्त्रिंशेषु यो मध्यमो यश्चोर्ध्ववर्तिषु त्रिषु मध्यमस्तस्योभयविधस्य मध्यमस्यानिरुक्तं विधत्ते—

जामि वा इति । यद्यनुक्रमवर्तिनः सर्वेऽपि त्रयस्त्रिंशा एकविधाः स्युस्तदानीमनुष्ठातार आलस्यं कुर्वन्ति । तस्मान्मध्ये वर्तमानमहर्विशेषमनिरुक्तत्वेनेतरस्मान्निरुक्तादिलक्षणं कुर्युः । तेन वैलक्षण्येनाऽऽलस्यं परिहृतं भवेत् ।

उभयतोऽवस्थितानां त्रयस्त्रिंशानां मध्यवर्तिषु चतुर्ष्वहःसु कंचिद्विशेषं विधत्ते—

ऊर्ध्वानि पृष्ठानीति । रथंतरबृहदाद्यनुक्रमगतानि पृष्ठस्तोत्राणि निष्पादनीयानि तथा चतुर्विंशचतुश्चत्वारिंशाद्यनुक्रमगताश्छन्दोमा निष्पादनीयाः । यद्यपि त्रिणवैकविंशद्वयत्रिणवस्तोमैस्तान्यहानि निष्पाद्यानीति शास्त्रान्तरानुशासनेन सूत्रेऽभिहितं, तथाऽप्यत्र वचनबलात्पवमानादिषु केषुचित्स्तोत्रेषु चतुर्विंशाद्यश्छन्दोमा अनुक्रमेण प्रयोक्तव्याः । एवं सत्युभाभ्यां पृष्ठ्यच्छन्दोमाभ्यां स्वर्गं प्राप्नुवन्ति ।

---

१ ख. °ममनि° । २ ब. ङ. च. °न्तं आद्यं° ।

(द्वितीयचतुर्विंशतिरात्रकथन .)

तमेतं पृष्ठ्यच्छन्दोमविधिं प्रशंसति—

असत्रं वा इति । पूर्ववद्व्याख्येयम् ।

तान्येतानि मध्यवर्तीनि पृष्ठान्युभयतोऽवस्थितांस्त्रयस्त्रिंशांश्च प्रकारान्तरेण प्रशंसति—

त्रयस्त्रयस्त्रिंशा इति । य एतेऽधोवर्तिनस्त्रयस्त्रिंशा ये चोपरिवर्तिनस्ते सर्वेऽपि पुरुषशरीररूपस्योरोदेशस्थानीयाः । यानि तु मध्यवर्तीनि पृष्ठानि तानि जीवात्मस्थानीयानि । तत्तेनोभयविधानुष्ठानेन यजमानाः स्वार्थं शर्म नह्यन्ते सुखं बध्नन्ति संपादयन्तीत्यर्थः । तच्चानार्त्यै दुःखविनाशाय भवति।

उक्तेषु पृष्ठस्तोत्रेषु तार्यायेण सामद्वयमेव विधत्ते—

बृहद्रथंतराभ्यामिति । पूर्ववद्व्याख्येयम् ।

अथोपान्त्यं त्रयोविंशमहर्विधत्ते—

त्रिवृतोऽधीति । आवृत्तः पृष्ठ्यः षडहस्त्रयस्त्रिंशादिस्त्रिवृन्तः । तथा सति द्वाविंशे दिने त्रिवृत्स्तोमः प्राप्नोति । तस्मात्त्रिवृत्स्तोमयुक्तादह्नोऽप्यूर्ध्वं त्रयोविंशदिने त्रिवृतमेवानुतिष्ठेयुः । तथा सति त्रिवृत्स्तोमस्य सांतत्यादेषां स्तोमानां संपत्तिर्भवति । सा च संपत्तिर्यजमानस्य पुत्रादिप्रभवाय संपद्यते । स च त्रिवृत्स्तोमयुक्तमहर्विशेषो ज्योतिष्टोमः कार्यः, सप्तसंस्थारूपेऽग्निष्टोमे प्रथमसंस्थारूपं कुर्यादित्यर्थः । अयमेव मनुष्यलोकः सोऽग्निष्टोमरूपः क्षयो निवासार्थो गृहविशेषः । तेनाग्निष्टोमानुष्ठानेनास्माद्भूलोकवर्तिनः क्षयाद्गृहान्नयन्ति न विनश्यन्तीत्यर्थः ।

अथ क्रतुगतामहःसंख्यां प्रशंसति—

चतुर्विंशतिरात्र इति । पूर्ववद्व्याख्येयम् ।

अथोदयनीयमहर्विधत्ते—

अतिरात्राविति । पूर्वं विहितेन ज्योतिरतिरात्रो भवतीत्यनेन प्रायणीयेन सह निर्देष्टुं द्विवचनम् । वर्णसंख्यायां गायत्रीसाम्याद्ब्रह्मवर्चसफलत्वेन तत्परिग्रहः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अथ सप्तमाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ।

ऋक्षा वा इयमलोमकाऽऽसीत्साऽकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति सैताꣳशतꣳ रात्रीरपश्यत्ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिरियं वा अक्षुध्यत्सैतां विराजमपश्यत्तामात्मन्धित्वान्नाद्यमवारुन्धौषधीः (१) वनस्पतीन्प्रजां पशून्तेनावर्धत स जेमानं महिमानमगच्छद्य एवं विद्वाꣳसं एता आसते विराजमेवाऽऽत्मन्धित्वाऽन्नाद्यमव रुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानं गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तून्नवारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव (२) प्रति तिष्ठन्ति त्रयस्त्रिꣳशात्रयस्त्रिꣳशमुपयन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिꣳशः प्रजापतिमेवाऽऽरभन्ते प्रतिष्ठित्यै त्रिणवो भवति विजित्या एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्दधते त्रिवृदग्निष्टुद्भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत्तेज एवाऽऽत्मन्दधते पञ्चदश इन्द्रस्तोमो भवतीन्द्रियमेवाव (३) रुन्धते सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्दधते चतुर्विꣳशो भवति चतुर्विꣳश-

(त्रिंशद्रात्रकथनम्)

तिरधमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विंषुवान्विंषुवन्तो भवन्ति य एवं विद्वाꣳस एता आसते चतुर्विꣳशात्पृष्ठान्युप यन्ति संवत्सर एव प्रतिष्ठाय (४) देवता अभ्यारोहन्ति त्रयस्त्रिꣳशा-स्त्रयस्त्रिꣳशमुप यन्ति त्रयस्त्रिꣳशद्वै देवता देवता-स्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रि-णव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकविꣳशौ भवतः प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्दधते बहवः षोडशिनो भवन्ति तस्माद्बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादियमोषधी-भिर्वनस्पतिभिर्व्यतिषक्ता (५) व्यतिषज्यन्ते प्रजया पशुभिर्य एवं विद्वाꣳस एता आसतेऽक्लृप्ता वा एते सुवर्गं लोकं यन्त्युच्चावचाह्ये स्तोमानुपयन्ति यदेत ऊर्ध्वाः क्लृप्ताः स्तोमा भवन्ति क्लृप्ता एव सुवर्गं लोकं यन्त्युभयोरेभ्यो लोकयोः कल्पते त्रिꣳशदेतास्त्रिꣳशदक्षरा विराडन्नं विराड्विराजैवा-न्नाद्यमव रुन्धतेऽतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै (६) ॥

(ओषधीः संवत्सर एवाग्नं प्रतिष्ठाय व्यतिषक्तैकाच्च पञ्चाशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(त्रिंशद्रात्रकथनम्)

(अथ सप्तमकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः)।

द्वितीये द्वितीयश्चतुर्विंशतिरात्रोऽभिहितः। अथ तृतीये त्रिंशद्रात्रोऽभिधीयते। तमेतं विधत्ते—

ऋक्षा वा इयमिति। ओषधयो वनस्पतयश्च पृथिव्या लोमानि, तद्हित-त्वात्कदाचिदियमृक्षा परुषाऽऽसीत्। तत ओषधिवनस्पत्युत्पादनं कामयित्वा त्रिंशद्रात्रयागानुष्ठानेनोत्पादयामास। एवमन्येऽपि तदनुष्ठानेन प्रजाः पशूंश्चोत्पादयन्ति। समुदायप्राधान्यं परित्यज्य प्रत्येकप्राधान्यविवक्षया रात्रीरिति बहुवचननिर्देशः।

अथान्नप्राप्त्यर्थं तमेव क्रतुं विधत्ते—

इयं वा अक्षुध्यादिति। इयं भूमिरन्नाभावात्कदाचित्क्षुधिताऽभूत्। ततस्तत्परिहारं विचार्यैतां त्रिंशद्रात्रिरूपां विराजमपश्यत्। त्रिंशदक्षरसाम्याद्विराट्त्वम्। तां च विराजं स्वमनसि स्थापयित्वा तदनुष्ठानेनान्नं प्राप्तवती। तच्चान्नमुदकतृणौदनरूपेण बहुविधम्। तेनौषध्यादीनवर्धयत्। वर्धयित्वा च सर्वत्र पूज्यत्वलक्षणं महित्वं च प्राप्नोत्। एवमन्येऽपि तदनुष्ठानेन तत्फलं प्राप्नुवन्ति।

तत्र प्रथममहर्विधत्ते—

ज्योतिरतिरात्र इति। अथानन्तरभावीनि षट्संख्याकान्यहानि विधत्ते—

पृष्ठ्यः षडह इति। गतम्।

अथाष्टममहर्विधत्ते—

त्रयस्त्रिꣳशादिति। पृष्ठ्यषडहे यदन्तिममहस्तदेतत्त्रयस्त्रिंशम्। तस्मादूर्ध्वं पुनस्त्रयस्त्रिंशानुष्ठानेन सजातीयत्वेन यज्ञस्य सांतत्यं भवति। अपि च त्रयस्त्रिंशस्य प्रजापतिना सृष्टत्वात्प्रभूत्वं, तेन तदनुष्ठायिनस्तेन प्रजापतिमेवानुतिष्ठन्ति। तच्च प्रतिष्ठार्थं भवति।

अथ नवममहर्विधत्ते—

त्रिणव इति। अन्यत्र 'त्रिणवेन स्तोमेनैभ्यो लोकेभ्योऽसुरान्प्राणुदन्त' इति श्रवणात्रिणवो जयहेतुः।

अथ दशममहर्विधत्ते—

एकविꣳश इति। अन्यत्र 'प्रतिष्ठा वा एकविꣳशः'। 'रुग्वा एकविꣳशः'। इति श्रवणादुभयपाप्तिः।

---

१ ख. ङ. °ने स्तो°। २ ख. °यिनः प्र°।

(त्रिंशद्रात्रकथनम्)

अथैकादशमहर्विधत्ते—

त्रिवृदग्निष्टुदिति। अग्निरेव यत्र स्तूयते सोऽग्निष्टुत्। अतोऽग्निसामर्थ्यात्तापदाहः। त्रिवृत्सामर्थ्यात्कान्तिप्राप्तिः।

अथ द्वादशमहर्विधत्ते—

पञ्चदश इति। इन्द्र एव यत्र स्तूयते सोऽयमिन्द्रस्तोमस्तेनेन्द्रियप्राप्तिः।

अथ त्रयोदशमहर्विधत्ते—

सप्तदश इति। सप्तदशस्तोमस्यान्नप्रजाहेतुत्वादुभयप्राप्तिः।

अथ चतुर्दशमहर्विधत्ते—

एकविꣳश इति। पूर्ववद्व्याख्येयम्।

अथ पञ्चदशमहर्विधत्ते—

चतुर्विꣳश इति। संख्यासाम्यादर्धमाससंवत्सरद्वारा स्वर्गे प्रतिष्ठा। अपि चायमहर्विशेषो विषूवान्विविधा सृतिः फलोत्पत्तिरिति विषूवद्वानयम्। तस्मादेवं विदित्वाऽनुष्ठातारोऽपि विविधफलोत्पत्तिमन्तो भवन्ति।

अथ षोडशमारभ्यैकाविंशतिपर्यन्तानि षट्संख्याकान्यहानि विधत्ते—

चतुर्विꣳशादिति। प्रतिष्ठाहेतुसंवत्सरात्मकचतुर्विंशस्तोमयुक्ताद्दशन ऊर्ध्वं पृष्ठ्यषडहानुष्ठाने सति प्रथमसंवत्सरे प्रतिष्ठां प्राप्य पश्चात्षड्भिरहोभिरारभ्य देवताः प्राप्नोति।

अथ द्वाविंशं दिनं विधत्ते—

त्रयस्त्रिꣳशादिति। पृष्ठ्ये षडहेऽन्तिमं त्रयस्त्रिंशं ह्यस्मादूर्ध्वं पुनरपि त्रयस्त्रिंशानुष्ठाने ये देवा दिव्येकादश स्थेत्यादिनन्वाक्ता त्रयस्त्रिंशत्संख्याकास्त देवतास्वेव प्रतिष्ठिता भवन्ति।

अथ त्रयोविंशं दिनं विधत्ते—

त्रिणवो भवतीति। नवसंख्याविषयया त्रिसंख्यया समानत्वाल्लोकत्रये प्रतिष्ठा।

अथ त्रयोविंशचतुर्विंशदिने विधत्ते—

द्वावेकविꣳशाविति। पूर्ववद्व्याख्येयम्।

अथ पञ्चविंशदिनमारभ्यैकोनत्रिंशपर्यन्तानि पञ्चाहानि विधत्ते—

बहवः षोडशिन इति। षोडशस्तोमयुक्ता अहर्विशेषाः षोडशिनः। ते च बहवो नैरन्तर्येणात्र पञ्चैवानुष्ठेयाः। तावतैवापेक्षितसंख्यायाः पूरितत्वात्।

यस्मात्प्रजोत्पत्तिहेतवः षोडशिनोऽत्र बहवोऽनुष्ठितास्तस्माल्लोके प्रजासु मध्ये वृषणः पुंस्त्वधर्मयुक्ता बहवो दृश्यन्ते ।

एतेभ्यः षोडशिभ्य ऊर्ध्वदिनेष्वनुष्ठितान्परस्परविलक्षणान्स्तोमान्प्रशंसति—

यदेते स्तोमा इति । यस्मादेते स्तोमा न्यूनाधिकभावेन संकीर्णास्तस्मा-द्भूमिरपि व्यवस्थामन्तरेणौषधीभिर्वनस्पतिभिश्च सर्वत्र संकीर्णा दृश्यते ॥

स्तोमव्यतिषङ्गवेदनं प्रशंसति—

व्यतिषज्यन्त इति । एतास्त्रिंशद्रात्रीर्येऽनुतिष्ठन्ति तेषां मध्ये एकस्य प्रजा अपरस्य पशव एवेति व्यवस्था नास्ति, किंतु सर्वेऽपि प्रजया पशुभिश्च संकीर्णा भवन्ति ।

अथ षोडशिष्वहःस्वेकविधस्तोमान्प्रशंसति—

अकल्पता वा इति । ये यजमानाः पूर्वेषु दिनेषूच्चावचान्परस्परविलक्षणा-न्स्तोमाननुतिष्ठन्ति ते यजमाना अकल्पता वा इदमेतावत्त्व भोग्यमित्येवं निश्च-यरहिता एव स्वर्गं प्राप्नुवन्ति । तस्मात्कल्पाः कल्प्तोभयविधस्तोमानुष्ठानादे-तद्यजमानार्थमुभयोर्लोकयोर्भोग्यं कल्प्तं भवति ।

अथ क्रतुगतापहःसंख्यां प्रशंसति—

त्रिꣳशदेता इति । गतम् ।

अथान्तिममहर्विधत्ते—

अतिरात्राविति । आयुष्टोमेन सह निर्देशाद्द्विवचनम् । अन्यथाक-ल्पत्व विधिवाक्ये स्पष्टत्वात्तत्परिग्रहः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठकेऽ-नुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

प्रजापतिः सुवर्गं लोकमैत्तं देवा येनेन छन्द-साऽनु प्रायुञ्जत तेन नाऽऽप्नुवन्त एता द्वात्रिꣳशत꣡ꣳ रात्रीरपश्यन्द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजा-पतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वाऽभ्यारुह्य

---

१ ख. °क्ये इद° ।

(द्वात्रिंशद्वाक्याभिधानम्)

सुवर्गं लोकमायन्य एवं विद्वाꣳसं एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुभमनुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति (१) श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुग्वाग्गनुष्टुप्सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो भवन्ति सर्वे हि श्रियं गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहत्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति बृहद्रथंतराभ्यां यन्ति (२) इयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रतिष्ठित्यै प्रतितिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये परांचस्त्र्यहानुपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोरूर्ध्वो तिष्ठन्ति द्वात्रिꣳशदेतास्तासां यास्त्रिꣳशत्त्रिꣳशदक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धते ये द्वे अहोरात्रे एव ते उभाभ्यांꣳ रूपाभ्यांꣳ सुवर्गं लोकं यन्त्यतिरात्रावधितो भवतः परिगृहीत्यै (३)॥

[गच्छन्ति यन्ति त्रिꣳशदक्षरा द्वात्रिꣳशतिश्च]।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

तृतीयेऽनुवाके त्रिंशद्ब्राह्मणोऽभिहितः । अथ चतुर्थे द्वात्रिंशद्ब्राह्मणोऽभिधीयते । तत्रेमं विधत्ते-

प्रजापतिः सुवर्गमिति । यदा प्रजापतिः स्वर्गं प्रामोत्तदा प्रजापतिं स्वर्गं गच्छन्तं वयमप्यनु प्राप्नुम इति मन्यमाना देवा येन येन च्छन्दसा युक्तं यज्ञमन्वतिष्ठंस्तेन सर्वेणापि नाऽऽप्नुवन् । ततस्ते देवा द्वात्रिंशद्दारं तत्साधनत्वेनानुष्ठितवन्तः । तत्संख्याया अनुष्टुभि विद्यमानत्वात्प्रजापतेश्च मन्त्रराजानुष्टुभा सर्वसृष्टत्वस्य वापनीये श्रुतत्वादेनमानुष्टुभं प्रजापतिं तदीयेनैव द्वात्रिंशदक्षरेण च्छन्दसा प्राप्य स्वर्गमध्यारुह्य तत्र भोगान्प्राप्नुवन्तः । एवमन्येऽपि यजमानास्तदनुष्ठानेन प्रजापतिं प्राप्य तदनुग्रहाच्छ्रियं गच्छन्ति । न चात्र स्वर्गोऽनुक्त इति शङ्कनीयम् । यस्मान्मनुष्यस्य श्रीर्देवता स्वर्गः ।

क्रतुगतामहःसंख्यां प्रशंसति-

द्वात्रिꣳशद्वै देवता इति । एताः क्रतुगता रात्रयो द्वात्रिंशत्संख्याकाः । अनुष्टुवक्षरसंख्याऽपि तावती । अनुष्टुप्च वाग्विशेषरूपत्वाद्वागेव । तस्मादेतदनुष्ठानेन वाचं वेदशास्त्रादिरूपां सर्वामपि प्राप्नुवन्ति । सर्वेष्वपि यजमानाः तमारब्धुमनाय वाचं वदितुं समर्था भवन्ति । तेन वक्तृत्वेन पूज्यत्वलक्षणां श्रियमपि प्राप्नुवन्ति ।

अथाहानि विधत्ते-

ज्योतिर्गौरायुरिति । त्र्यहा इति बहुवचननिर्देशाद्यावद्भिरपेक्षितसंख्यापूर्तिस्तावन्तोऽनुष्ठेयाः । अत्र च नवसंख्यया तत्पूर्तेर्नवैवानुष्ठेयाः । ते सर्वेऽप्यानुलोम्येनानुष्ठेयाः । तथा सत्यनुक्रमेणैव स्वर्गं प्राप्नुवन्ति ।

अथैतेषु सप्तविंशतिदिनेषु पृष्ठस्तोत्रार्थं सामद्वयमेव पर्यायेण विधत्ते-

बृहद्रथंतराभ्यामिति । अथ प्रातिलोम्येनानुष्ठेयमेकं त्र्यहं विधत्ते-

पराञ्चो वा इति । पूर्ववद्व्याख्येयम् ।

क्रतुगतादिनसंख्या पूर्वं समूहरूपेण प्रशस्ता । इदानीं विभज्य प्रशंसति-

द्वात्रिꣳशद्वै देवता इति । अत्र त्रिंशत्संख्यया विराड्द्वाराऽन्नप्राप्तिः । उपरितनया द्विसंख्ययाऽहोरात्ररूपाभ्यां स्वर्गप्राप्तिः ।

अथ प्रायणीयोदयनीयौ विधत्ते-

अतिरात्रावितीति ।

---

१ क. श्रीरेव दे° ।

(त्रयस्त्रिंशद्ब्राह्मणकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः)।

द्वे वाव द्वेवसत्रे द्वादशाहश्चैव त्रयस्त्रिꣳशदहश्च य एवं विद्वाꣳसंत्रयस्त्रिꣳशदहमासते साक्षादेव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यविविध्यति पापीयान्भवति यदि नाविविध्यति सहड्क्ष्य एवं विद्वाꣳसंत्रयस्त्रिꣳशदहमासते वि पाप्मना भ्रातृव्येणाऽऽवर्तन्तेऽहर्भाजो वा एता देवा अग्र आऽहरन् (१) अहरेकोऽभजताहरेकस्ताभिर्वै ते प्रवाहुगाध्नुवन्य एवं विद्वाꣳसंत्रयस्त्रिꣳशदहमासते सर्व एव प्रवाहुगृध्नुवन्ति सर्वे आग्नेयीं प्राऽऽप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते त्रिण्यश्विनानि भवन्ति त्रय इमे लोका एषु (२) एव लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते विश्वजिदभिजिद्वत्यन्नाद्यस्यावरुद्ध्यै सर्वपृष्ठो भवति सर्वस्याभिजित्यै वाग्वै द्वादशाहो यत्पुरस्ताद्द्वादशाहमुपेयुरनाप्तां वाचमुपेयुरुपदासुकैषां वाक्स्या दुपरिष्टाद्द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मादपरिष्टाद्वाचा वदिष्यमोऽवान्तरम् (३) वै

(त्रयस्त्रिंशद्रात्रकथनम् ५)

दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उद्दालकः शौल्वायनः सत्रस्यार्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शान्तिर्द्व्यर्धनीका वा एता रात्रयो यजमाना विश्वजित्सहातिरात्रेण पूर्वाः षोडश सहातिरात्रेणोत्तराः षोडश य एवं विद्वाꣳसस्त्रयस्त्रिꣳशद्दहमासत ऐषा द्व्यर्धनीका प्रजा जायतेऽतिरात्रावभितो भवतः परिगृहीत्यै (४) ॥

(अहरन्तेष्ववान्तरꣳ षोडश सह सप्तदश च ॥)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः) ।

चतुर्थेऽनुवाके द्वात्रिंशद्रात्रोऽभिहितः। अथ पञ्चमे त्रयस्त्रिंशद्रात्रोऽभिधीयते। तमिमं विधत्ते—

द्वे वाव देवसत्रे इति । देवानां प्रिये सत्रे द्वे एव योऽयं द्वादशाहो यश्चायं त्रयस्त्रिंशदहः, एतयोरुभयोरतिप्रीतिः । एतां प्रीतिं ज्ञात्वा येऽनुतिष्ठन्ति ते विलम्बमन्तरेणैव देवताः प्राप्नुवन्ति । न केवलं देवताप्राप्तिः किंतु पापव्यावृत्तिरपि । तत्र कश्चिद्व्यतिरेकदृष्टान्तः—यथा लोके श्रेयान्राजामात्यादिः प्रशस्तः पुरुषो राज्यमभ्यारूढः पुनरप्यधिकं राज्यं कामयमानस्तथा कर्तेति यादृशेन सामभेदाद्युपायेन तद्राज्यान्तरं प्राप्स्यति तादृशं करोति । यद्यवक्ष्यति तस्मिन्नुपाये प्रमाद्यति तदानीं पापीयान्भवति पूर्वं विद्यमानमपि श्रेष्ठ्यमपगच्छतीत्यर्थः। यदि नावक्ष्यति न प्रमाद्यति तदाऽपि सदृङ्भवति पुरा यादृशः श्रेयान्पश्चादपि तादृश एव भवति । पूर्वं राजेति व्यवहरन्तः प्राणिनः पश्चादपि राजेत्येव

(त्रयस्त्रिंशद्रात्रकथनम्)

व्यवहरन्ति न तु तस्मादुत्कृष्टः कश्चिदुत्तमवहारस्तस्मिन्विद्यते । सोऽयं व्यतिरेकदृष्टान्तः । इह तु पूर्वे विद्येश्वर्यादिसंपन्ना अपि मनुष्या यजमानास्त्रयस्त्रिंशद्रात्रस्य महिमानं जानन्तोऽनुष्ठाय देवत्वप्राप्तिप्रतिबन्धकपापरूपेण भ्रातृव्येण वियुक्ताः सन्तः पूर्वसिद्धान्मनुष्यत्वादप्यधिकं देवत्वं प्राप्नुवन्तीति विशेषः ।

पुनरपि प्रकारान्तरेण प्रशंसति—

अहर्भाजो वा इति । अहानि भजन्तेऽनुतिष्ठन्तीत्यहर्भाजः । तादृशा देवा एतास्त्रयस्त्रिंशत्संख्याका रात्रीः संपादितवन्तः । कथमिति तदुच्यते—एको देव एकमहरन्वतिष्ठत् । पुनरप्येको देवोऽन्यदहरन्वतिष्ठत् । एवं त्रयस्त्रिंशत्संख्याका देवास्तत्संख्याकान्यहान्यन्वतिष्ठन्, ताभिरनुष्ठिताभी रात्रिभिरेव ते सर्वेऽपि देवाः प्रबाहुगाघ्नुवन्समं यथा भवति तथा समृद्धिं प्राप्नुवन्, न त्वेकोऽपि तन्मध्ये समृद्धिविकलः । एवं यजमाना अपि सर्वे साम्येन समृद्धिं प्राप्नुवन्ति । सैव समृद्धिः स्पष्टी क्रियते—पर्वे ग्रामणीयं ग्रामस्वामित्वं प्राप्नुवन्ति ।

अथाहानि विधत्ते—

पञ्चाहा भवन्तीति । ज्योतिर्गौरायुरित्येवंविधो द्विरावृत्तस्त्र्यहो द्वितीयज्योतिर्विवर्जितः पञ्चाहः । तादृशाश्च पञ्चाहा यावन्तोऽपेक्षितास्तावन्तोऽनुष्ठेयाः । इह तु चतुर्भिरपेक्षितसंख्यापूरणाच्चत्वारो विधीयन्ते । हेमन्तशिशिरयोरैक्यात्पञ्चसंख्याका ऋतवस्तद्द्वारेण संवत्सरे प्रतितिष्ठन्ति । किंच पञ्चसंख्यया पङ्क्तिद्वारेण यज्ञं प्राप्नुवन्ति ।

प्रायणीयोदयनीययोरतिरात्रयोर्मध्यमे चातिरात्रे शस्त्राणि विधत्ते—

त्रीण्याश्विनानीति । आश्विनेन शस्त्रेणोपलक्षितान्यहानि त्रीण्यनुष्ठेयानि । तेन लोकत्रये प्रतिष्ठिता भवन्ति । किंच यज्ञस्येन्द्रियस्थानानि सवनानि त्रीणि, तान्यपि प्राप्नुवन्ति ।

अन्यदहर्विधत्ते—

विश्वजिदिति । विश्वजयहेतोरहहेतुत्वं सुलभम् ।

तमेव विश्वजितं विशिनष्टि—

सर्वपृष्ठ इति । रथंतरबृहदानीनि षट्संख्याकानि पृष्ठानि सर्वाण्यपि यस्मात्तौ सर्वपृष्ठः । तेन सर्वमपि फलं भवति ।

अथान्यान्यहानि विधत्ते—

वाग्वै द्वादशाह इति । बहुविधस्तोत्रशस्त्रोपेतत्वाद्द्वादशाहो वाग्रूपः ।

तथाविधं द्वादशाहं यद्युक्तेभ्योऽहोभ्यः पूर्वमनुतिष्ठेयुस्तदानीं तत्रत्यानां स्तोत्र-शस्त्राणामनुक्तत्वादनाप्तामसंपूर्णां वाचमुपेयुः प्राप्नुयुः । तेषां यजमानानां वागु-पक्षयशीला स्यात् । तस्मादुक्तेभ्योऽहोभ्य ऊर्ध्वं द्वादशाहमनुतिष्ठेयुः। तस्मादाप्तां संपूर्णामेव वाचं प्राप्नुवन्ति । यस्मादूर्ध्वभागे वाग्रूपस्य द्वादशाहस्यानुष्ठानं तस्मात्कारणान्नाभेरुपरिष्टान्मुखेन वयं वाचा वदामः ।

अत्र द्वादशाहशब्देन प्रायणीयोदयनीयौ वर्जयित्वाऽवशिष्टस्य दशरात्रस्य विवक्षां दर्शयति—

अवान्तरं वा इति । अवान्तरं वै द्वादशाहस्यावयवभूतेनैव दशरात्रेण पुरा कदाचित्प्रजापतिः प्रजा असृजत । अतो यद्यत्र दशरात्रो भवेत्तर्हि तेन यजमानाः प्रजाः सृजन्ते । तमेव दशरात्रं पुनः प्रशंसति—

एता२ ह वा इति । उदङ्क्ङो नामतः, स च शुल्बस्यापत्यभूतः । एतस्य सत्रस्याङ्गभूतो योऽयं दशरात्रोऽस्त्येतेन क्रतस्नस्य सत्रस्यैतामृद्धिं फलमुदङ्क् उवाच । अतो यदि दशरात्रोऽनुष्ठीयते तर्हि क्रतस्नसमृद्धिस्तेन भवति । अपि च पूर्वेष्वहःसु यदेवाङ्गं विकलमनुष्ठीयते तस्य सर्वस्यैषा दशरात्रानुष्ठितिरुपशमहेतुर्भवति ।

इदानीं योऽयं विश्वजित्सर्वपृष्ठो विहितस्तस्य स्थानविशेषं विधत्ते—

द्व्यनीका वा इति । अनीकं सेना, द्वे अनीके सेनारूपे यासां रात्रीणां ता द्व्यनीकाः, सेनाद्वयसमाना इत्यर्थः । तत्र प्रायणीयातिरात्रेण सह त्रयः पञ्चाहाः षोडश पूर्वभाविन्यो रात्रय एका सेना । उदयनीयेनातिरात्रेण सहैकः पञ्चाहो दशरात्रं चेत्युत्तरभाविन्यः, एताः षोडश रात्रयो द्वितीया सेना । विश्वजिद्यजमानस्थानीयत्वादुभयपार्श्ववर्तिन्योः सेनयोर्मध्येऽवस्थितो राजेव सप्त-दशसंख्यापूरके मध्यमदिने प्रयोक्तव्यः । एवं विदित्वा क्रतुमनुतिष्ठतां यजमानानां बहुपुत्ररूपा बहुकन्यकारूपा च द्विविधा प्रजा सर्वतो जायते ।

अथ प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेद-दीपतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

---

१ ख. घ. च. दाऽनेन ।

(षट्त्रिंशद्रात्रकथनम्)

(अथ सप्तमाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः)।

आदित्या अकामयन्त सुवर्गं लोकमियामेति ते सुवर्गं लोकं न प्राजानन्न सुवर्गं लोकमायन्त एतꣳ षट्त्रिꣳशद्रात्रमपश्यन्तमाऽहरन्तेनायजन्त ततो वै ते सुवर्गं लोकं प्राजानन्त्सुवर्गं लोकमायन्य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गं लोकं यन्ति ज्योतिरतिरात्रः (१) भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै षडहा भवन्ति षड्वा ऋतव ऋतुष्वेव प्रतिं तिष्ठन्ति चत्वारो भवन्ति चतस्रो दिशो दिक्ष्वेव प्रतिं तिष्ठन्त्यसत्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पुष्टिरवं रुन्धते पशूञ्छन्दोभिरोजो वै वीर्यं पृष्ठानिं पशवश्छन्दोमा ओजस्येव (२) वीर्ये पशुषु प्रतिं तिष्ठन्ति षट्त्रिꣳशद्रात्रो भवति षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसाꣳ स्वाराज्यमाश्नुताश्नुवते स्वाराज्यं य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं यन्त्यतिरात्रावभितो भवतः सुवर्गस्य लोकस्य परिगृहीत्यै (३) ॥

(अतिरात्र ओजस्येव षट्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः)।

पञ्चमेऽनुवाके त्रयस्त्रिंशद्ब्राह्मणोऽभिहितः। अथ षष्ठे षट्त्रिंशद्ब्राह्मणोऽभिधीयते। तमेवं विधत्ते-

आदित्या अकामयन्तेति। पुरा कदाचिदादित्याः स्वर्गं लोकं गन्तुकामा मार्गमप्यज्ञात्वा स्वर्गं न प्राप्ताः। ततस्तदुपायं विचार्य षट्त्रिंशद्ब्राह्मणं निश्चित्य तदनुष्ठानेन मार्गमवगत्य स्वर्गं प्राप्ताः। एवमन्येऽपि यजमानाः स्वर्गं प्राप्नुवन्ति।

प्रायणीयमहर्विधत्ते-

ज्योतिरतिरात्र इति। अथोत्तराणि कानिचिदहानि विधत्ते-

षडहा भवन्तीति। ज्योतिर्गौरायुरायुर्ज्योतिरित्ययमेकोऽभिष्टवः षडहः। द्वादशाः षडहा यावन्तोऽपेक्षितास्तावन्तोऽनुष्ठेयाः।

तेषां संख्यां विधत्ते-

चत्वार इति। चतुर्भिः षडहैरत्रापेक्षिता संख्या पूर्यते।

अथ पृष्ठ्यः षडहश्चत्वारश्छन्दोमा इत्येवंविधं द्वादशाहस्य दशरात्रं विधत्ते-

असत्रं वा इति। पूर्ववद्व्याख्येयम्।

ऋतुगवामहःसंख्यां प्रशंसति-

षट्त्रिꣳशद्ब्राह्मण इति। पशूनां बार्हतत्वं चयनब्राह्मणे स्पष्टमाम्नातम्- 'छन्दाꣳसि पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्बार्हताः पशव उच्यन्ते' इति। किंच, छन्दसां मध्ये बृहती स्वाराज्यं प्राप्तवती। तस्मादेतदनुष्ठायिन इह स्वाराज्यं प्राप्य परत्र स्वर्गं प्राप्नुवन्ति॥

अथोदयनीयं विधत्ते-

अतिरात्राविति। प्रायणीयेन सह निर्देष्टुं द्विवचनम्। स्वर्गहेतुत्वस्य विधिवाक्ये स्पष्टत्वात्तत्परिग्रहः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः

वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामिति

(एकोनपञ्चाशद्ब्राह्मणकथनम्)

सौदासाऽभवद्यमिति स एतमेकस्मान्नपञ्चाशमपश्यत्तमाऽहरत्तेनायजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवं विद्वाꣳसं एकस्मान्नपञ्चाशमासते विन्दन्ते प्रजाममिं भ्रातृव्यान्भवन्ति त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳ शन्ति दश पञ्चदशा भवन्ति पञ्चदशो वज्रः (१) वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्दशमनहर्भवति वज्र एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानिं पृष्ठैरेवर्तून्त्वारोहन्त्यृतुभिः संवत्सरं ते सँवत्सर एव प्रतितिष्ठन्ति द्वादशैकविꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् (२) दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानिं भवन्ति षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्यदेकंस्यै न पञ्चाशदतिरिक्तास्तद्यद्भूयसीरष्टाचत्वारि꣡ꣳशदूनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिर्वैराजे वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं विद्वाꣳसं एकस्मान्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्त्यतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै (३) ॥

(एकोनपञ्चाशद्ब्राह्मणकथनम्)

(वज्रं आत्मन्प्रजया द्वाविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः)।

षष्ठे षट्त्रिंशद्ब्राह्मणोऽभिहितः। अथ सप्तम एकोनपञ्चाशद्ब्राह्मणोऽभिधीयते। तमेतं विधत्ते—

वसिष्ठो हतपुत्र इति। विश्वामित्रशापेन हतेषु पुत्रेषु प्रजां शत्रुक्षयं च कामयमानो वसिष्ठस्तदुपायत्वेनैकस्मात्पञ्चाशं निश्चित्य तदनुष्ठानेन प्रजां लब्ध्वा सौदासानभ्यभवत्। सुदासस्य पुत्राः सौदासास्ते च वसिष्ठस्य शत्रवः। वसिष्ठवद्यजमाना अपि तदनुष्ठानेन प्रजां लब्ध्वा भ्रातृव्यानभिभवन्ति।

अथाहानि विधत्ते—

त्रयस्त्रिवृत इति। त्रिवृत्स्तोमयुक्ता अग्निष्टोमरूपा अहर्विशेषास्त्रयः कर्तव्याः। 'त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्रहरति' इति श्रुत्यन्तराद्भ्रातृव्यस्य वज्रस्य मुखमनेन तीक्ष्णं कुर्वन्ति।

अथान्यानि कानिचिदहानि विधत्ते—

दश पञ्चदशा इति। पञ्चदशस्तोमयुक्ता अहर्विशेषा दशसंख्याकाः कर्तव्याः। 'तं पञ्चदशस्तोमो मध्यत उदतृणत्' इत्येवमन्यत्र हिंसाहेतुत्वश्रवणात्पञ्चदशस्य वज्रत्वम्।

अथान्यदहर्विधत्ते—

षोडशिमदिति। षोडशिस्तोत्रयुक्तं दशरात्रस्य दशममविवाक्यमेकमहः कार्यम्। तेन पूर्वोक्ते वज्रे वीर्यं स्थापयन्ति।

अथान्यानि कानिचिदहानि विधत्ते—

द्वादश सप्तदशा इति। सप्तदशस्तोमयुक्ता अहर्विशेषा द्वादशसंख्याकाः कार्याः। सप्तदशस्तोमस्योदरभागजन्यत्वादन्नहेतुत्वम्। सप्तदशाक्षरस्य प्रजापतिरूपत्वाच्च प्रजाहेतुत्वम्।

अथ षट्संख्याकान्यहानि विधत्ते—

पृष्ठ्यः षडह इति अथान्यानि कानिचिदहानि विधत्ते—

---

१ क. घ. ङ. च. 'ऽस्तो'।

(संवत्सरसत्रदीक्षाकालः)

द्वादशैकविंशा इति। एकविंशस्तोमयुक्ता अहर्विशेषा द्वादश कर्तव्याः। एकविंशस्तोमस्य प्रतिष्ठाहेतुत्वं कान्तिहेतुत्वं चासकृदुक्तम्।

अथान्यानि कानिचिदहानि विधत्ते—

बहवः षोडाशिन इति। षोडशिस्तोमयुक्ता अहर्विशेषा यावत्संख्यापेक्षितास्तावन्तः कार्याः। अत्र त्रिभिरपेक्षितसंख्यायाः पूरणाश्रयः कार्याः।

एतत्कतुगतेषु षट्स्वहःस्वाश्विनशस्त्रं विधत्ते—

षडाश्विनानीति। एकोनपञ्चाशद्भूपं स्तौति—

ऊनातिरिक्ता वा इति। अस्मिन्क्रतौ विधीयमाना एता राश्य ऊनाश्चातिरिक्ताश्च भवन्ति। कथमिति तदुच्यते—यद्यस्मात्कारणादेकोनपञ्चाशदेकया राश्या वर्जिता पञ्चाशत्संख्या तस्मादेता ऊनाः। यद्यस्मात्कारणादष्टाचत्वारिंशत्संख्याया अधिकास्तस्मादतिरिक्ताः। पजापतिः पुरा क्वचिदूनादल्पाहीर्यास्तौढशरीररूपाः प्रजा असृजत। क्वचिच्चातिरिक्तादधिकादाकाशादेरुत्तरोत्तरन्यूनान्वाय्वादीनसृजत। तस्मादूनातिरिक्तरूपोऽयं क्रतुः प्रशस्तः।

पूर्वं विधिवाक्येऽभिहितं फलमुपसंहरति—

ये प्रजाकामा इति। क्रतुगतामहःसंख्यां प्रशंसति—

वैराजो वा इति। चतुर्व्यहर्दशकेषु दशसंख्यासद्भावान्मुख्यं वैराजत्वम्। पञ्चमस्य दशकस्यैकेन न्यूनत्वेऽपि वैराजत्वमुपचरितुं शक्यम्। 'न वा एकेनाक्षरेण च्छन्दांसि वियन्ति न द्वाभ्याम्' इति श्रुत्यन्तरात्। अतो वैराजत्वादनपायिः।

प्रायणीयोदयनीयौ विधत्ते—

अतिरात्राविति। उक्तन्यायेनानहेतुत्वादनपरिग्रहः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः॥ ७॥

(अथ सप्तमाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः)।

संवत्सरायं दीक्षिष्यमाणा एकाष्टकायां दीक्षे-

---

१ क. घ. ङ. च. °दशीस्तो'।

(संवत्सरसत्रदीक्षाकाउः)

रश्नेषा वै सँवत्सरस्य पत्नी यदेकाष्टकैतस्यां वा एष एताꣳ रात्रिं वसति साक्षादेव सँवत्सरमारभ्य दीक्षन्त आर्तं वा एते सँवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तं वा एते सँवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन्मुखं वा एतत् (१) संवत्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव सँवत्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यत्सांमेघ्ये विषूवान्त्सपद्यते चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्सँवत्सरस्य यच्चित्रापूर्णमासो मुखत एव सँवत्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्तेषामेकाष्टकायां क्रयः सं पद्यते तेनैकाष्टकां न छम्बट्कुर्वन्ति तेषामु (२) पूर्वपक्षे सुत्या सं पद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति तान्कल्याणी कीर्तिरनूत्तिष्ठत्यरात्सुरिमे यजमाना इति तदनु सर्वे राध्नुवन्ति (३)॥

(एतच्छम्बट्कुर्वन्ति तेषां चतुस्त्रिꣳशच्च)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टमोऽनुवाकः)।

सप्तमेऽनुवाक एकोनपञ्चाशद्वाक्योऽभिहितः । अथाष्टमादिषु चतुर्ष्वनुवाकेषु सँवत्सरसत्रमभिधीयते ।

(संवत्सरसत्रदीक्षाकालः)

तत्राष्टमेऽनुवाके संवत्सरसत्रस्य दीक्षाकालं विधत्ते--

संवत्सरायेति। ये यजमानाः संवत्सरसत्रार्थं दीक्षिष्यन्ते ते यजमाना एकाष्टकायां माघकृष्णाष्टम्यां दीक्षां कुर्युः। येयमेकाष्टकाभिमानिनी देवता सेयं संवत्सराभिमानिनो देवस्य पत्नी। एकाष्टकाया अभिमानिदेवतारूपत्वं गर्भधारणादवगम्यते। तथा चाग्निकाण्डे मन्त्र आम्नायते--' एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् ' इति। संवत्सरस्य पतित्वं चान्यत्र मन्त्रान्तरेणाऽऽम्नातम्-- ' एकाष्टका तपसा तप्यमाना संवत्सरस्य या पत्नी दुदुहे प्रपीना ' इति।

एष संवत्सराभिमानी देव एतां माघकृष्णाष्टमीं रात्रिं सर्वाप्येतस्यामेकाष्टका देवतायामेव वसति। अतस्तत्र दीक्षां कुर्वन्तो यजमाना मुख्यमेव संवत्सरमारभ्य दीक्षितवन्तो भवन्ति।

तमेतं पक्षं दूषयित्वा पक्षान्तरं विधत्ते--

आर्तं वा एत इति। ये यजमाना एकाष्टकायां दीक्षन्ते ते यजमानाः संवत्सरसत्रस्याऽऽर्तमभि विनाशमभिलक्ष्य दीक्षन्ते। तत्रायं हेतुः--पुष्य (पौष) माघरूपावृत्ववयवौ संवत्सरस्यान्त इत्येतन्नामधारिणौ। तयोः शिशिरर्तुरूपत्वात्। तेन चर्तुना पूर्वसंवत्सरस्य समाप्तत्वात्पौषपौर्णमासीमारभ्य फाल्गुनपौर्णमास्याः प्राचीनः कालः संवत्सरस्यान्तः। किंचैकाष्टकायां दीक्षमाणाः संवत्सरस्य व्यस्तमभि विपर्यासमभिलक्ष्य दीक्षन्ते। आदौ हि दीक्षा कर्तव्या। अयं च संवत्सरस्यान्तः कालः। ऋत्ववयवयोरेकयोरुक्तन्यायेनान्तनामोपेतत्वात्। तस्मादुत्तरफल्गुनीयुक्ते पूर्णमासे दीक्षां कुर्युः। तस्य च भाविसंवत्सरोपक्रमदिनत्वात्। एतदेवाभिप्रेत्याऽऽधानब्राह्मणे समाम्नातम्--' उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य। यदुत्तरे। फल्गुनी। ' इति।

एतमपि पक्षं दूषयित्वा पक्षान्तरं विधत्ते--

तस्यैकैव निर्येति। तस्य फल्गुनीपूर्णमासदीक्षापक्षस्यैकैव निर्या वक्ष्यमाण एक एव दोषः, न तु पूर्वोक्तार्तत्वव्यस्तत्वदोषौ। कोऽसावेको दोष इति स उच्यते--समीचीना अतिवर्षणक्षमा मेघा यस्मिन्वर्षर्तौ सोऽयं संमेघः। तस्य संबन्धी प्रत्यासन्नः कालः सांमेघ्यः अस्मिन्काले विषूवानहः(?) संपद्यते। तथा हि विषूवानिति संवत्सरस्य मध्यवर्ती मुख्योऽहर्विशेषः। ततः पूर्वे षण्मासाः। उत्तरे च षण्मासाः। तयोरुभयोर्मासषटकयोर्मध्ये सोऽहर्विशेषः कर्तव्यः। अत्र च फल्गुनीपूर्ण-

(संवत्सरसत्रदीक्षाकालः)

मासमारभ्य द्वादश दीक्षा द्वादशोपसदश्चानुष्ठायोत्तरदिने प्रथममासोपक्रमः कार्यः। तथा सति चैत्रशुद्धनवम्यामुपक्रमो भवति । आश्वयुजशुद्धाष्टम्यां मासषट्कं समाप्य नवम्यां विषूवान्कार्यः। स च वर्षर्तोः प्रत्यासन्नः। भाद्रपदपौर्णमास्यां वर्षर्तौ समाप्ते सत्यनन्तरमासवर्तित्वात् । अतो वर्षर्तुसमीपे विषुवद्दिनसंपत्तिपरिहाराय चित्रानक्षत्रयुक्तायां पौर्णमास्यां दीक्षा कर्तव्या । सोऽपि वसन्तर्तुमध्यपातित्वात्संवत्सरस्य मुखमेव । अतो मुखत एवाऽऽरम्भः कृतो भवति । एवं सति कार्तिकशुद्धनवम्यां विषूवान्संपद्यते । तच्च दिनं वर्षर्तोर्दूरवर्ति । अतो वृष्टिशङ्कया अभावाद्विसम्भेणानुष्ठातुं शक्यत इति तस्य पक्षस्य न कोऽपि दोषोऽस्ति ।

अथ गुणविशेषमवलोक्य पक्षान्तरं विधत्ते—

चतुरहे पुरस्तादिति । माघपौर्णमास्याः पुरस्ताच्चतुरहे शुक्लैकादश्यां दीक्षेरन् । तथा सति माघकृष्णसप्तम्यां द्वादशदीक्षाणां समाप्तत्वात्तदनन्तरवर्तिन्यामेकाष्टकायां सोमक्रयः संपद्यते । तथा सत्येकाष्टकाया अप्युपयुक्तत्वात्संवत्सरपत्नीत्वेन मुख्यामेतां न च्छम्बट्कुर्वन्ति निष्प्रयोजनां न कुर्वन्ति । ततः संवत्सरपत्न्याः सत्कार एको गुणः ।

अथ गुणान्तरं दर्शयति—

तेषां पूर्वपक्ष इति । तेषामेकाष्टकायां क्रयमनुतिष्ठतां यजमानानां तद्दिनमारभ्यानुष्ठीयमाना उपसदश्चैत्रशुद्धचतुर्थ्यां संपद्यन्ते । तत उत्तरदिने क्रियमाणा सुत्या शुक्लपक्ष एवो क्रान्ता भवति । तत आरभ्य सर्वेऽपि मासाः शुक्लपक्षमेवाभिलक्ष्य समाप्यन्ते । तेषु समाप्तेषु ते ऋत्विजोऽपि पूर्वपक्ष एव सत्रादुत्तिष्ठन्ति । उत्तिष्ठतस्तान्यजमाननु भूम्यामोषधयो वनस्पतयश्च सत्कर्मानुष्ठानसामर्थ्यादुद्भवं गच्छति । तदुद्भवे सति तान्यजमाननु पुण्यकीर्तिरुत्तिष्ठति । कीदृशी कीर्तिरिति सोच्यते—एते यजमाना अरात्सुः समृद्धिं गता इत्येतादृशी कीर्तिः। सत्कीर्त्युत्थानमनु सर्वे प्राणिनः समृद्धा भवन्ति । एतदीयेन सत्कर्मानुष्ठानेन भूमौ सर्वस्याभिवर्धनात् । तस्मादीदृशं गुणसंघमवेक्ष्य माघशुक्लैकादश्यां दीक्षेत्ययमेव मुख्यः पक्षः ।

अत्र मीमांसा ॥

षष्ठाध्यायस्य पञ्चमपादे दशमाधिकरणे चिन्तितम्—

(दीक्षोपसत्कथनम्)

गवामयन उक्ता तु या काचित्पूर्णिमाऽथवा ।
चैत्री माघ्युत काचित्स्यादविशेषात्प्रशंसया ॥
चैत्री स्यात्क्रय एकाष्टकायामित्युपवर्णितम् ।
माघकृष्णाष्टमी त्वेकाष्टकाऽतो माघपूर्णिमा ॥

गवामयने श्रूयते—' चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्तेषामेकाष्टकायां क्रयः संपद्यते ' इति । पौर्णमास्याः पूर्वस्मिंश्चतुरहे दीक्षेरन्नेकादश्यां दीक्षामारभेत । तथा सति पौर्णमास्या उपरितने सप्तमे दिने द्वादश दीक्षाः पूर्यन्ते । तत उपरितन्यामष्टम्यां सोमक्रय इत्यर्थः । तत्र विशेषस्यादृष्टत्वाद्या काचित्पूर्णिमेत्येकः पक्षः । ' चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासः ' इति प्रशस्यमानतया चैत्री पौर्णमासीति द्वितीयः पक्षः । यौगिकसमाख्यया माघकृष्णाष्टम्येकाष्टका । तत्र सोमक्रयसंपत्तये माघ्याः पौर्णमास्याः पूर्वस्यामेकादश्यां दीक्षाऽऽरब्धव्या ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः) ।

सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानꣳ श्रपयन्त उपसद्भिर्द्वाभ्यां लोमावद्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद्द्वाभ्यां माꣳसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रधीयाꣳसः सुवर्गं लोकमयामेति (१) ॥

(सुवर्गं पञ्चाशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहिताया सप्तमाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

संपद्यते । अतः सत्रिणोऽतिरात्रमनुतिष्ठन्तीति यदेतद्वा एतस्मिन्सोमानुष्ठानेऽग्निष्टोमं प्रथममनुतिष्ठन्ति, अथोक्थ्यषोडश्यतिरात्रान्, तदेतदनुपूर्वमेवानुक्रमेणैव यज्ञक्रतूनुपेत्यानुष्ठातुं निश्चित्य तान्क्रतूनुपक्रम्य परितः स्वीकृत्य ततः सर्वत्र सोममेव पिबन्तः सत्रिण आसते । तस्मादग्निष्टोमपरित्यागाभावादतिरात्ररूपं ज्योतिष्टोमं प्रथममनुतिष्ठेयुः । स हि ज्योतिष्टोमो ज्योतिर्गौरायुरित्येतन्नामकानां स्तोमानां क्रतूनां मुखसदृशः । तस्मान्मुखत एवाऽऽरभ्य स्तोमान्क्रतून्सत्रिणः प्रयुञ्जते ।

गोष्टोमायुष्टोमाभ्यां पूर्वभावित्वं ज्योतिष्टोमस्य प्रकारान्तरेण पुनः प्रशंसति—

ते सप्तस्तुता इति । ज्योतिष्टोमे स्तोत्रगता य ऋग्विशेषाः सन्ति ते संस्तुताः सन्तो विराजं दशसंख्यामेव प्राप्नुवन्ति न तु न्यूना नाप्यधिकाः । इतरयोस्तु गोष्टोमायुष्टोमयोर्द्वे ऋचावतिरिच्येते, दशसंख्यां न प्राप्नुतः । तत्कथमिति तदुच्यते—एकयर्चा गोष्टोमो दशसंख्याया अतिरिक्तः आयुष्टोमस्त्वेकया न्यूनः । तस्माद्विराड्रूपत्वं ज्योतिष्टोमस्य प्राशस्त्ये हेतुः । किंच भासकत्वाज्ज्योतिष्टोमः स्वर्गलोकात्मको विराड्रूपः । तस्मादुभयथा प्रशस्तेन तेन ज्योतिष्टोमेन स्वर्गं लोकं प्राप्नुवन्ति ।

अथास्मिन्नतिरात्रसंस्थे ज्योतिष्टोमे सामविशेषं विधत्ते—

रथंतरं दिवेति । दिवा पृष्ठस्तोत्रं रथंतरं गीयते, नक्तमपि रात्रिपर्यायेषु रथंतरं गीयते, तत्तदानीमालस्यं भवति । तादृशालस्यपरिहारः केनान्येन साम्ना भवतीति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञा उत्तरमाहुः—सौभरालस्यं यदन्यत्साम्नास्ति तत्तृतीयसवने ब्रह्मसामत्वेन गेयम् । तच्च बृहत्पौढं, तदेतद्बृहद्रथंतरयोरुभयोर्मध्ये स्थापयन्ति । तच्च यज्ञस्य धृत्यै संपद्यते । तेन विजातीयसाम्नाऽऽलस्यपरिहारो भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके एकादशोऽनुवाकः) ।

ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके
प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुप यन्त्यन्तरिक्ष एव

(मासगताहकथनम्)

तेन प्रतिं तिष्ठन्त्यायुष्टोमं तृतीयमुपं यन्त्यमुष्मिन्नेव तेन लोके प्रतिं तिष्ठन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुर्यदेतान्स्तामानुपयन्त्येष्वेव तल्लोकेषु सन्निर्णः प्रतितिष्ठन्तो यन्ति ते सश्स्तुता विराजम् (१) अभि सं पद्यन्ते द्वे चर्चावतिं रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः संवर्गो वै लोको ज्योतिरूर्विराडूर्जमेवावं रुन्धते ते न क्षुधाऽऽर्तिमार्छन्त्यक्षोधुका भवन्ति क्षुत्संबाधा इव हि सन्निर्णोऽभिष्टोमावभितः प्रधी तावुक्थ्या मध्ये नभ्यं तच्चदेतत्परियद्वैवचक्रं यदेतेन (२) षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्टये ते स्वस्ति सभश्नुवते षडहेन यान्ति षडवा ऋतवं ऋतूष्वेव प्रतिं तिष्ठन्त्युभयतोज्योतिषा यन्त्युभयत एव संवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ (३) तत्पुरुषमनु पर्यावर्तन्ते ऋषयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणास्तत्प्राणाननु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्विंशतिरहानि सं पद्यन्ते चतुर्विंशतिरर्धमासाः संवत्सरस्तत्संवत्सरमनु पर्यावर्तन्तेऽप्रतिष्ठितः संवत्सर इति खलु वा आहुर्वर्षीयान्प्रतिष्ठाया इत्येतावद्वै संवत्सरं

(मासगताहकथनम्)

रस्य ब्राह्मणं यावन्मासो मासिमास्येव प्रतिति-
ष्ठन्तो यन्ति (४) ॥

(विराजमेतेन द्वादशावेतावद्वा अष्टौ च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठक एकादशोऽनुवाकः) ।

दशमे प्रायणीयमहरुक्तम् । अथैकादशे मासगतान्युच्यन्ते ।

तत्राऽऽदौ तावत्त्रीण्यहानि विधत्ते—

ज्योतिष्टोममिति । ज्योतिष्टोमगोष्टोमायुष्टोमा एकाहविशेषाः । इतरेवानुलोमप्रतिलोमगतैरभिप्लवः षडहः संपद्यते । तस्मिन्षडहे पूर्वभागवर्तिनेऽनुलोमगता एतेऽनुष्ठेयाः । क्रमेणैतैर्लोकत्रये प्रतिष्ठा भवति । ज्योतिरादीनां भूरादिरूपत्वादेषां त्रयाणामनुष्ठानेन त्रिणो लोकत्रये प्रतिष्ठिताः सुखेन व्यवहरन्ति। पूर्वस्मिन्ननुवाके प्रथमदिनेऽनुष्ठेयः प्रायणीयारूपोऽविराजरूपो ज्योतिष्टोमो विहितः । इह तु तृतीयदिनेऽनुष्ठेयोऽग्निष्टोमात्मको ज्योतिष्टोम इति विशेषः ।

तस्यैतस्याग्निष्टोमरूपस्य ज्योतिष्टोमस्य प्राथम्यं पूर्वोक्तविराजवत्प्रशंसति—

ते सꣳस्तुता इति । ज्योतिष्टोमस्य स्तोत्रियागतसंख्यया विराट्संपत्तौ विराज ऊर्मूपत्वात्ते त्रिणः क्षुधा संपादितामार्तिं न प्राप्नुवन्ति । किं त्वक्षोधुकाः सर्वदा क्षुद्रहिता भवन्ति । त्रिणामनुष्ठानप्रयासबाहुल्यात्प्रायेण ते क्षुत्संपादितबाधयुक्ता इव भवन्ति । तस्मात्तेषां क्षुत्परिहारायोर्मूपविराट्संपत्तियुक्तो ज्योतिष्टोम एव प्रथममनुष्ठेयः ।

इदानीमुक्तैर्ज्योतिरादिभिरनुलोमप्रतिलोमगतैर्निष्पन्नमभिप्लव षडहं रथचक्ररूपकल्पया विधत्ते—

अग्निष्टोमावभित इति । लोके रथचक्रं फलकत्रयेण निष्पाद्यते । तत्र पार्श्ववर्तिनी फलके प्रधीत्युच्येते । प्रकर्षेण धीयते धार्यते मध्यफलकमाश्रयमिति प्रधी । मध्यफलकं तु नभ्यमित्युच्यते नाभिस्थानीयत्वात् । एवं च सत्यत्र चक्ररूपस्याभिप्लवषडहस्याभितो वर्तमानावाद्यन्तदिनयोरनुष्ठेयौ ज्योतिःशब्दाभिधेयौ यावग्निष्टोमौ तावुभौ प्रधी । ये च मध्यवर्तिनो गौरायुर्गौरित्येवमामान द्रव्यरूपाश्चत्वारः क्रतवस्ते सर्वे मिलित्वा मध्ये स्थितं नभ्यं ब्रह्मवदि । तदेत-

(मासगताहरूपनम्)

इमिश्चकषडहरूपं परियन्पुनः प्रवर्तमानं देवचक्रमित्युच्यते। यद्येतेन देवचक्ररूपेण षडहेन यजमाना अनुष्ठानं निष्पादयेयुस्तर्हि ते यजमाना देवचक्रमेव समारोहन्ति। तच्चाऽऽरोहणमरिष्टयै हिंसाराहित्याय भवति। हिंसारहिताश्च ते स्वस्ति समश्नुवते क्षेमं प्राप्नुवन्ति।

पुनरपि षडहं प्रशंसति—

षडहेनेति। तस्य षडहस्यानुलोमप्रतिलोमरूपेऽहात्मकत्वं विधत्ते—

उभयतोज्योतिषेति। ज्योतिर्गौरायुरित्येवमानुलोम्ये सत्याद्यो ज्योतिः, आयुर्गौर्ज्योतिरित्येवं प्रातिलोम्ये सत्यन्ते ज्योतिः। एवमुभयतोज्योतिषा षडहेनानुष्ठाने सति स्वर्गप्रवेशकाले फलावसानकाले च प्रतितिष्ठन्तोऽवज्ञारहिताः सन्तः संचरन्ति।

तस्य च षडहस्य द्विरावृत्तिं विधत्ते—

द्वौ षडहाविति। सक्थिशब्देन श्रोणीद्वयमुच्यते। बाहुशब्देनांसद्वयम्। आत्मा मध्यदेहः। शिरः प्रतिष्ठम्। हस्तौ पादौ च मिलित्वा चत्वार्यङ्गानि। ततो द्वौ स्तनौ द्वादशसंख्यापूरकौ। तथा सत्येवं द्वादशाहानि पुरुषमनुसृत्य पर्यावृत्तानि भवन्ति।

तस्य च षडहस्य तृतीयामावृत्तिं विधत्ते—

त्रयः षडहा इति। पूर्वाभ्यां द्विरावृत्ताभ्यां सह त्रित्वम्। अष्टादशानामहर्नां देधा विभागे सति नवसंख्यया नवच्छन्दःगतमाजाननुसृत्य षडहात्रयः पर्यावृत्ता भवन्ति।

अथाऽऽक्षेपसमाधानमुखेन सर्वमासानुष्ठानं विधत्ते—

चत्वारः षडहा इति। संख्याद्वारेणार्धमासद्वारा संवत्सरमनुसृत्य चत्वारः षडहाः पर्यावृत्ता भवन्ति। अत्र मासपूरणाय पृष्ठ्यः षडहोऽध्याहर्तव्यः। अत एव च्छन्दोगा आमनन्ति—'यदेव पृष्ठ्यः षडहो भवति वीर्यं एवान्वतः प्रतितिष्ठन्ति' इति।

अथ पूर्वाभिस्तिसृभिरावृत्तिभिः सह चतुर्थीमावृत्तिं विधत्ते—

प्रतिष्ठितः संवत्सर इति। पूर्वोक्तन्यायेन मास एकः प्रतिष्ठितो न संवत्सरः, तस्योक्तमतिष्ठाहेतोर्मासादर्धीयस्त्वादत्यन्ताधिकत्वादित्येव 'केचिद्वादिन आहुः। अत्रैतदुत्तरं—मासो ब्राह्मणं पूर्वोक्तरीत्या मासस्य प्रतिपादकं ब्राह्मणवाक्यं यावदस्ति एतावदेव संवत्सरस्य प्रतिपादकं ब्राह्मणं, नात्तिरोऽधिकं

(अश्वमेधाङ्गमन्त्रकथनम्)

किंचिदूनमस्ति । अनेनैव प्रकारेण प्रतिमासमनुविष्ठन्तो यजमानास्त्रिंशत्स्विन्मासेषु प्रतिविष्ठन्तः क्रमेण संवत्सरं यन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः) ।

मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमूसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्तिरश्चीनैर्वन्तीः स्थावन्तीस्त्वाऽवन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाध्यानां निधीनां त्वा निधिपतिꣳ हवामहे वसो मम (१) ॥

(मेषः षट्त्रिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः) ।

एकादशे संवत्सरगतेषु सर्वमासेष्वहानि विहितानि । अथावशिष्टेषूत्तरार्धेष्वश्वमेधाङ्गमन्त्रा उच्यन्ते ।

कल्पः—' मेषस्त्वा पचतैरवतीति पर्यग्नौ क्रियमाणेऽघाय्यानि जुहोति ' इति ।

पाठस्तु—

मेषस्त्वा पचतैरिति । अविजातौ मुख्यः पुमान्यो मेषोऽस्ति सोऽयं पचतैर्हविष्ट्वेन पचनीयैः क्षुद्रैरविविशेषैः सह हेऽध्व त्वामवतु । एवमुत्तरेष्वपि मन्त्रेषु त्वामवतीत्यनुषङ्गनीयम् । अजजातौ योऽयं मुख्यो वस्तो लोहितग्रीवः सोऽयमन्यैश्छागैः सह त्वामवतु । शल्मलिरित्युच्यतो वृक्षविशेषः । स च स्वकीयया वृद्ध्या सह त्वामवतु । पर्णः पलाशवृक्षः । स च स्वाभिमानिना ब्रह्मणा

(अश्वमेधाङ्गमन्त्रकथनम्)

मधेण वा सह त्वामवतु। प्लक्षो यज्ञियेषु मुख्यो वृक्षः। स च मधेन यज्ञेन सह त्वामवतु। न्यग्रोधश्चमसहेतुर्वृक्षः। स च स्वकीयैश्चमसैः[1] सह त्वामवतु। उदुम्बरः प्रतिष्ठः। स चोर्जा स्वकीयफलेन त्वामवतु। गायत्री चाय्यैस्त्रिष्टुबा-दिच्छन्दोभिः सह त्वामवतु। त्रिवृत्स्तोमश्चाग्न्येः पञ्चदशादिस्तोमैः सह त्वामवतु। एतैर्नवभिर्मन्त्रैरपाय्यास्था आहुतीर्जुहुयात्।

कल्पः—'ता दक्षिणाञ्चेकशफानुदग्रथ्य सव्योन्मसस्य दक्षिणानूरुनाध्ना नाः तिग्मिरमिधून्वत्यक्षिः प्रदक्षिणमश्वं धुवन्त्यः परियन्त्यवन्तीः स्येति[2] इति। अथ यच्छन्देन राजपत्न्यः परामृश्यन्ते, तासां प्रकृतत्वात्। मृतमश्वं प्रति पत्नीभिः क्रियमाण एष उपचारः।

पाठस्तु—

अवन्तीः स्योते। ताः पत्न्यः परस्परं संबोध्य वदन्ति—हे राजपत्न्यो यूयमवन्तीः स्थाधस्य पालयित्र्यः स्थ। हेऽथ त्वामवन्तीः पालयित्र्यः पत्न्योऽवन्तु रक्षन्तु। मम वसो वासयितस्तादृश हेऽथ प्रियाणां मध्येऽतिप्रियं त्वां हवामह आह्वयामः। आप्यानां कामप्राप्तिहेतूनां मध्ये वर्षिष्ठमतिशयेन वृद्धं त्वां हवामहे। तथा निधीनां शङ्खपद्मादीनां मध्ये निधिपतिमत्यन्तमधिकस्य निधेः पालयितारं त्वां हवामहे॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः॥ १२॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके त्रयोदशोऽनुवाकः)।

कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विक-र्म्याभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा हरयाभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्ताभ्यः स्वाहा पल्वल्याभ्यः स्वाहा वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा

---

१ ख. च. स्वकीयैश्च°। २ ख. °व्यान्वित्र°।

(अश्वमेधाङ्गमन्त्रकथनम्)

स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्ध-
वीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः
स्वाहा (१) ॥

(कूप्याभ्यश्चत्वारिꣳशत्) ।

इति कृष्णयजुर्वेदीतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके त्रयदशोऽनुवाकः) ।

अष्टाभ्यहोममन्त्रा द्वादशेऽभिहिताः । अथानुवाकद्वयेनापां होमा उच्यन्ते ।
तथा च ब्राह्मणम्—' कूप्याभ्यः स्वाहाऽद्भ्यः स्वाहेत्यपाꣳ होमाञ्जु-
होति ' इति ।

तत्र प्रथमानुवाकमन्त्रानाह—

कूप्याभ्यः स्वाहेति । कूपे भवाः कूप्या आपः । नदीपूरणेन कूले तीरे
भवाः कूल्याः । विकरे भूविवरे भवा विकर्याः । अवटे गर्ते भवा अवट्याः ।
स्वननेन निष्पन्नाः स्वन्याः । ह्रदे भवा ह्रद्याः । सूदे पङ्के भवाः सूद्याः ।
सरसि भवाः सरस्याः । वैशन्ते भवा वैशन्त्यः । यत्र कूल्यादौ पुनः पुनरापो
विशन्ति तत्रत्या इत्यर्थः । पल्वलेऽत्यल्पजलाशये भवाः पल्वल्याः । वर्षे भवा
वर्ष्याः । वर्षनैरपेक्ष्येण भूमाववस्थिता अवर्ष्याः । प्रवाहध्वनिसहिता ह्रादुन्यः ।
अवश्यायजन्याः पृथ्वाः । प्रवाहरूपाः स्यन्दमानाः । एकत्रावस्थिताः स्थावराः ।
नद्यां भवा नादेय्यः । सिन्धौ पुंनदे भवाः सैन्धव्यः । समुद्रे भवाः समुद्रियाः ।
अनुक्तसंग्रहार्थः सर्वशब्दः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके चतुर्दशोऽनुवाकः) ।

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवह-
न्तीभ्यः स्वाहा समन्तं वहन्तीभ्यः स्वाहा शीघ्रं

(अम्बेमेघाहमन्त्रकथनम्)

वहन्तीभ्यः स्वाहा शीभं वहन्तीभ्यः स्वाहोग्रं वहन्तीभ्यः स्वाहा भीमं वहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा (१) ॥

(अद्भ्य एकान्न त्रिंशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके चतुर्दशोऽनुवाकः)।

वस्मिन्नेवापां होमे द्वितीयानुवाकगतान्मन्त्रानाह—

अद्भ्यः स्वाहेति । उदकजातिमात्रयुक्ता आपः । प्रवाहरूपा वहन्त्यः । परिमण्डलरूपा आवर्तगताः परिवहन्त्यः । भूमेः समतलत्वेन सर्वतो गच्छन्त्यः समन्तं वहन्त्यः । निम्नाधिक्येन शीघ्रं वहन्त्यः । ईषन्निम्नत्वेन शीभं शोभनं यथा भवति तथा वहन्त्यः । पर्वताग्रादध उग्रं वहन्त्यः । दृश्यमानमकरादिजीवोपेता भीमं वहन्त्यः । अम्भोनभोमहःशब्दैर्लोकत्रयगता आप उच्यन्ते । 'अयं वै लोकोऽम्भोऽसि' । 'अन्तरिक्षं वै नभोऽसि' । 'असौ वै लोको महोऽसि' इति ब्राह्मणेनोक्तत्वात् । पूर्वानुवाकोक्तैर्विंशतिमन्त्रैरेतदनुवाकोक्तैर्मन्त्रैश्च रात्रावग्नहोमाः कर्तव्याः । तेषामेव मन्त्रविशेषयुक्तोऽयं होम इति व्यवहारः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके पञ्चदशोऽनुवाकः)।

यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः ।
परो मर्तः परः श्वा । अहं च त्वं च वृत्रहन्त्सं बभूव सनिभ्य आ । अरातीवा चिदद्रिवोऽनु नौ

(अश्वमेधाङ्गमन्त्रकथनम्)

देवसोच्यते । ' धर्मो वा अधिपतिः ' इति ब्राह्मणेनोक्तत्वात् । हे धर्मदेव त्वमधिपतिरसि मामप्यधिपतिं कुरु । त्वत्प्रसादादहं प्रजानामधिपतिर्भूयासम् । मां योहि प्रजानामाधिपत्ये स्थापय । यद्वि च वाः प्रजाः पालनीयत्वेन स्थापय । वैरेवैः षड्भिर्यज्यनामकैरग्नहोमाञ्जुहुयात् । उपाकृतायेत्यादिमन्त्राणां त्रयाणां कालविशेषे होमो ब्राह्मणे श्रूयते—' उपाकृताय स्वाहेत्युपाकृते जुहोति । आडग्धाय स्वाहेति नियुक्ते जुहोति । हुताय स्वाहेति हुते जुहोति ' इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके सप्तदशोऽनुवाकः) ।

मयोभूर्वातो अभि वातूषा ऊर्जस्वतीरोषधीरा रिशन्ताम् । पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड । याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद । या अङ्गिरस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ । या देवेषु तनुवमैरयन्त यासाꣳ सोमो विश्वा रूपाणि वेद । ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र (१) गोष्ठे रिरीहि । प्रजापतिर्मह्येमेता रराणो विश्वैर्देवैः पितृभिः संविदानः । शिवाः सतीरुप नो गोष्ठमाऽकस्तासां वयं प्रजया सꣳ सदेम । इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा महीमू षु मातरम् (२) ॥

(इन्द्राष्टाविंशच्च) ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके सप्तदशोऽनुवाकः)।

षोडशे यव्यारूयो होमोऽभिहितः। सप्तदशे गव्यारूयैर्मन्त्रैर्होमोऽभिधीयते।

तथाच ब्राह्मणम्—'मयोभूर्वातो अभि वातूस्रा इति गव्यानि जुहोति' इति।

तत्र प्रथमामाह—

मयोभूर्वात इति। मयोभूः सुखस्य भावयिता वातो वायुरुस्रा अभिलक्ष्य गा अभिलक्ष्य वातु प्रसरतु, अतिवातेनोपद्रवं मा करोतु, किंतु मन्दवातेन गवां सुखं यथा भवति तथा वातु। एताश्च गाव ऊर्जस्वती रसयुक्ता ओषधीरारिशन्तामा स्वादयन्तु। जीवरूपं धनं जीवधनं प्राणिजातमित्यर्थः। तदर्हन्तीति जीवधन्याः पातुं योग्या आपस्ताश्च पीवस्वत्यः पानेन पुष्टिरूपस्य स्थौल्यस्य प्रापणात्तादृशीरपो गावः पिबन्तु। हे रुद्रावतायाविंतुं रक्षितुं योग्याय पद्वते पादसंचारिणे पशवे मृड सुखं कुरु।

अथ द्वितीयामाह—

याः सरूपा इति। या गावः सरूपाः समानप्रमाणदेहा विरूपा विविधवर्णा एकरूपा एकजातियुक्ताः, अग्निराहवनीयादिरूप इष्टया यागेन निमित्तभूतेन यासां गवां नामानि सा विश्वायुः सा विश्वव्यचाः सा विश्वकर्मेत्यादीनि, इडे रन्तेऽदित इत्यादीनि वा श्रुत्युक्तानि वेद जानाति, अङ्गिरसो महर्षयस्तपसा स्वकीयेन तपःसामर्थ्येन या गा इह भूमौ चक्रुः स्थापितवन्तः, हे पर्जन्य जलदेवताभ्यो गोभ्यो महि शर्म यच्छ महत्सुखं देहि।

अथ तृतीयामाह—

या देवेष्विति। या गावो देवेषु निमित्तभूतेषु तनुवं शरीरमैरयन्व भूमौ प्रवर्तितवत्यः, सोमो देवो यासां गवां विश्वा रूपाणि शुक्लकृष्णादीनि बहुक्षीराल्पक्षीरादीनि च सर्वाणि रूपाणि वेद जानाति, हे इन्द्र पयसा पिन्वमानाः स्वकीयेन क्षीरेण प्राणिजातं प्रीणयन्तीः प्रजावतीर्बहुवत्सोपेताश्च या अस्मभ्यमस्मदर्थं गोष्ठे रिरीहि गोशालायां प्रापय।

अथ चतुर्थीमाह—

प्रजापतिरिति । यः प्रजापतिः सोऽयं मह्यं यजमानायेता उक्तलक्षणा गा रराणः प्रयच्छन्विश्वैः सर्वैर्देवैः पितृभिश्च संविदान ऐकमत्यं गतस्ताः शिवाः सतीर्बहुक्षीरादिप्रदानेन कल्याणरूपाः सतीरेता गा नो गोष्ठमस्मदीयगोशालामुपाकरुपाकरोतु प्रापयत्वित्यर्थः । वयं तासां गवां प्रजया वत्सरूपया संसदेम संगतास्तिष्ठामः (ष्ठेम) ।

अथ चत्वारि यजूंष्याह—

इह धृतिः स्वाहेति । एतानि च विभूर्मात्रेत्यनुवाकेऽश्वस्य पादचतुष्टयस्याग्निविषयत्वेन व्याख्यातानि ।

अथ द्वयोर्ऋचोः प्रतीके दर्शयति—

महीमिति । एतच्चोभयं वैश्वानरो न ऊत्येत्यत्र व्याख्यातम् । एतैर्दशभिर्गव्याख्यैर्मन्त्रैरन्वहोमाञ्जुहुयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः) ।

किꣳ स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः । किꣳ स्विदासीत्पिशङ्गिला किꣳ स्विदासीत्पिलिप्पिला । द्यौरासीत्पूर्वचित्तिरꣳ आसीद्बृहद्वयः । रात्रिरासीत्पिशङ्गिलाऽविरासीत्पिलिप्पिला । कः स्विदेकाकी चरति क उ स्विज्जायते पुनः । किꣳ स्विद्धिमस्य भेषजं किꣳ स्विदावपनं महत् । सूर्य एकाकी चरति (१) चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् । पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् । पृच्छामि त्वा

(अश्वमेधाङ्गमन्त्रकथनम्)

वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम।
वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य
नाभिम्। सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव
वाचः परमं व्योम (२)॥

(सूर्य एकाकी चरति षट्चत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः)।

सप्तदशे गव्यारूयहोम उक्तः। अष्टादशे ब्रह्मोद्यमुच्यते।

कल्पः—'अभितोऽग्निष्टं ब्रह्मोद्याय पर्युपविशेते दक्षिणो ब्रह्मोत्तरो होता किꣳ स्विदासीत्पूर्वचित्तिरितीतस्थानुवाकस्य पृष्टानि होतुः प्रतिज्ञातानि ब्रह्मणः' इति।

एकविंशतियूपेषु मध्यवर्ती यूपोऽग्निष्टः। ब्राह्मणयोरुक्तिप्रत्युक्तिरूपेण संवादो ब्रह्मोद्यम्। पृष्टानि प्रश्नवाक्यानि। प्रतिज्ञातानि प्रत्युत्तरवाक्यानि(णि)।

तस्मिन्ब्रह्मोद्ये पृष्टामृचमाह—

किꣳ स्विदासीदिति। हे ब्रह्मन्पूर्वचित्तिः किं स्विदासीत्। चित्तिर्ज्ञानम्। पूर्व(र्वं)चित्तिर्जन्मप्रभृति ज्ञानमुत्पन्नानां यस्यां विद्यते सा पूर्वचित्तिः। तादृशं(श)ज्ञानं किं नामाऽऽसीदित्यर्थः। सोऽयमेको होतुः प्रश्नः। कान्त्यर्थाद्दीधातोर्वय(यः)शब्दनिष्पत्तिः। अत्यन्तं कमनीयं यस्तु किं नामाऽऽसीदिति द्वितीयः प्रश्नः। पिशङ्गिला मिश्रवर्णा किं नामाऽऽसीदिति तृतीयः प्रश्नः। पिलिप्पिलाऽत्यन्तं प्रकाशमाना श्वेता किं नामाऽऽसीदिति चतुर्थः प्रश्नः। सामान्याभिप्रायेण किमिति नपुंसकनिर्देशः।

अथ द्वितीयामाह—

द्यौरासीदिति। तान्येतानि ब्रह्मण उत्तराणि। येयं द्यौः सैव पूर्वचित्तिः। पूर्वप्रवृत्तं हि ज्ञानं तत्रास्ति, तत्रत्यानां देवानां जन्मप्रभृतिज्ञानोपेतत्वात्। तदिदं प्रथममुत्तरम्। अश्वोऽत्यन्तं कमनीयं वस्तु। अत एव हि राजानः सर्वप्रयत्नेनाप्यश्वान्संपादयन्ति। तदिदं द्वितीयमुत्तरम्। रात्रिर्मिश्रवर्णाऽन्धकारस्य नक्षत्र-

यन्त्रमकाशस्य च विद्यमानत्वात् । तदिदं तृतीयमुत्तरम् । अवावि सर्वं प्राणिजातमिति श्रीरविः । सैवातिप्रकाशा । अत एव ब्राह्मणे 'श्रीर्वै पिडिप्पिला' इत्याख्यातम् ।

अथ तृतीयामाह—

ए एवे होतुः प्रश्नाः । को नामात्र लोके सहायान्तरनिरपेक्ष आलस्यरहितः सर्वदा चरति । को नाम पुनः पुनः शुक्लपक्षे जायते । किं नाम वस्तु शीघ्रशुष्कस्योपद्रवस्यौषधम् । किं नाम स्थानं बहूनां बीजानामावापायोपयुक्तं विशालम् ।

अथ चतुर्थीमाह—

सूर्य एकाकीति । तान्येतानि ब्रह्मण उत्तराणि स्पष्टार्थानि ।

अथ पञ्चमीमाह—

पृच्छामि त्वेति । होतुः प्रश्नाः । हे ब्रह्मंस्त्वां पृथिव्याः परमन्तं पृच्छामि । यतः परमुत्कृष्टप्रदेशोऽन्यो नास्ति सोऽयं परोऽन्तः । तथा चक्रस्य नाभिरिव सर्वस्य भुवनस्य नाभिस्थानीयं वस्तु पृच्छामि । तथा वृष्णः पुंस्त्वाधिक्याश्वस्य रेतस्थानीयं सारं वस्तु पृच्छामि । तथैवाक्षरात्मिकाया वाचः परमं व्योम विशेषेण रक्षकं स्वरूपं वस्तु पृच्छामि ।

अथ षष्ठीमाह—

वेदिमाहुरिति । तान्येतानि ब्रह्मण उत्तराणि । येयं यागे वेदिस्तामेव पृथिव्याः परमन्तं याज्ञिका आहुः । नहि वेद्या अधिकः कश्चिदुत्कृष्टप्रदेशोऽस्ति । अत एव हि सोमप्रकरणे श्रुतम्—'एतावती वै पृथिवी । यावती वेदिः' । इति । तथा यज्ञं सर्वस्य लोकस्य नाभिस्थानीयमाहुः । यथा नाभिनाभिरेव सर्वं चक्रं परिवर्तते तथा यज्ञाधीनः सर्वेषां प्राणिनामिहलोकपरलोकसंचारः । तथाऽश्वस्य रेतोवदत्यन्तं सारभूतः सोमः । अश्वमेधेन हि विरावेण यागेन ब्रह्महत्यादिकं सर्वं निष्पद्यते । यदेतन्मन्त्रसंघातरूपं ब्रह्म यदेतदक्षरात्मिकाया वाचः परमं व्योम । तेन हि मन्त्रघातेन प्राणिनो विशेषेण रक्ष्यन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमाष्टके चतुर्थप्रपाठक एकोनाविंशोऽनुवाकः।

अम्बे अम्बाल्यम्बिके न मा नयति कश्चन। ससस्त्यश्वकः। सुभगे काम्पीलवासिनि सुवर्णे लोके सं प्रोर्णवाथाम्। आऽहमजानि गर्भधमा त्वमजासि गर्भधम्। तो सह चतुरः पदः सं प्र सारयावहै। वृषा वाꣳ रेतोधा रेतो दधातूत्सक्थ्यौ-र्गुदं भेषजिमुदञ्जिमन्वज। यः स्त्रीणां जीवभो-धनो य आसाम् (१) विलधावनः। प्रियः स्त्रीणामपीच्यः। य आसां कृष्णे लक्ष्मणि सदि-गुदिं परावधीत्। अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः। उर्ध्वामेनामुच्छ्र-यताद्वेणुभारं गिराविव। अथास्या मध्यमेधताꣳ शीते वाते पुनन्निव। अम्बे अम्बाल्यम्बिके न मा यभति कश्चन। ससस्त्यश्वकः। यद्धारिणी यवमत्ति न (२) पुष्टं पशु मन्यते। शूद्रा यदर्य-जारा न पोषाय धनायति। अम्बे अम्बाल्यम्बि-के न मा यभति कश्चन। ससस्त्यश्वकः। इयं यका शकुन्तिकाऽऽहलमिति सर्पति। आहतं गभे पसो नि जल्गुलीति धाणिका। अम्बे अ-म्बाल्यम्बिके न मा यभति कश्चन। ससस्त्य-श्वकः। माता च ते पिता च तेऽग्रे वृक्षस्य रो-हतः (३)। प्र सुलाभीति ते पिता गभे मुष्टि-मꣳसयत्। दधिक्राव्णो अकारिषं जिष्णोर-श्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ण

(अश्वमेधाङ्गमन्त्रकथनम्)

आयूंष्यि तारिषत् । आपो हि ष्ठा मयोभुवस्ता
न ऊर्जे दधातन । महे रणाय चक्षसे । यो वः
शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव
मातरः । तस्मा अरं गमाम वो यस्य क्षयाय
जिन्वथ । आपो जनयथा च नः (४) ॥

(आसामसि न रोहतो जिन्वथ चत्वारिं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठक एकोनविंशोऽनुवाकः) ।

अष्टादशे ब्रह्मोद्यमुक्तम् । अथैकोनविंशे राजपत्नीनां विलापरूपो मृताश्वोपचारोऽभिधीयते ।

कल्पः—' अम्बे अम्बाल्यम्बिक इति प्रतिप्रस्थाता पत्नीरुदानयति ' इति । तत्र पाठस्तु—

अम्बे अम्बालीति । उत्तमा मध्यमाऽधमा चेत्येवं त्रिविधा राजपत्न्यः । तासिस्तासिभिर्मातृवाचकैः पदैः प्रतिप्रस्थात्रा संबोध्यन्ते । एवं संबोध्याऽऽहूतानां तिसृणां मध्ये प्रधानभूतां महिष्युत्तरं वक्ति—कश्चिदपि पुमान्मां भोगार्थं रहसि नैव नयति । एषोऽश्वकः ससस्ति निद्रां करोति । भोगाभावदुःखेनैवैनं गर्हते । गर्हार्थोऽयं कप्रत्ययः । कुत्सितोऽश्व इत्यर्थः ।

कल्पः—' सुभगे काम्पीलवासिनीति क्षौमेण वाससाऽश्वयुंमहिषीमभ्यं च प्रच्छाद्य ' इति । पाठस्तु—

सुभगे काम्पीलेति । हे सुभगे शोभनभगे महिषि हे काम्पीलवासिनि, काम्पीलशब्देन श्लाघ्यो वस्त्रविशेष उच्यते । तं वस्त आच्छादयतीति काम्पीलवासिनी तादृशे, त्वमयमश्वोऽपि सुभगे लोके स्वर्गसदृशेऽस्मिन्स्थाने संपोर्णयोरिमं क्षौमं वस्त्रं सम्यगाच्छादयतम् । आच्छाद्यमाना च तेनाश्वेन सहैवं ब्रूहि—हेऽश्व गर्भं गर्भधारिणं त्वामहं महिष्याजान्याभिमुख्येन प्रापयानि । त्वमपि गर्भं गर्भधात्रीं मामाजास्याभिमुख्येन प्राप्नुहि ।

(अश्वमेधाङ्गमन्त्रकथनम्)

तौ सहेति। कल्पः—' तौ सह चतुरः पदः संप्रसारयावहा इति पदः संप्रसारयेते ' इति। हेऽश्व यस्त्वं या चाहं महिषी तावावामुभौ मदीयं पादद्वयं त्वदीयं पश्चाद्भागवर्ति पादद्वयमित्येवं चतुरः पादान्संप्रसारयावहै संगताः परस्परं श्लिष्टा यथा भवन्ति तथा प्रसृतान्करवाव।

कल्पः—' वृषा वामित्यभिमन्त्रयते ' इति।

पाठस्तु—

वृषा वामिति। वां युवयोर्मध्ये वृषा सेवकोऽश्वः सिञ्चतित्यध्याहारः। रेतोधा वीर्यधारिणी त्वदीयं रेतो धारयतु।

कल्पः—' उत्सक्थ्योर्गुदं धेहीति प्रजनने प्रजननꣳ संनिधाय ' इति।

पाठस्तु—

उत्सक्थ्योरिति। हेऽश्व गुदं त्वदीयगुदसमीपवर्तिनं पाश्चात्यं भागं सक्थ्योर्महिषीसंबन्धिनोरूर्वोरुद्धेहि ऊर्ध्वं स्थापय। अज्यते स्त्रीत्वमभिव्यज्यतेऽनेनेत्यज्रिर्योनिः। तथा पुंस्त्वमभिव्यज्यतेऽनेनेति मेढ्रोऽप्यज्रिः। सर्वोन्नतश्चासावज्रिर्मेढ्रोगुदज्रिः। हेऽश्व महिषीसंबन्धमज्रिमनुलक्ष्य त्वदीयमुदज्रिमज प्रेरय। कीदृश उदज्रिः, जीवात्मना भुज्यते प्रीतिपूर्वकमनुभूयत इति जीवभोजनो य उदज्रिः स्त्रीणां जीवभोजनः, स्त्रीजीवो ह्यस्मिन्नदज्रौ प्रीतिमनुभवति। यश्चोदज्रिरासां स्त्रीणां बिलधावनो बिलं योनिं प्रति धावति सहसा प्रविशतीति बिलधावनः। किंचायमुदज्रिः स्त्रीणा स्त्रियः सत्रपीच्यो भवति, अपीच्यतेऽत्यादरेण प्राप्यत इत्यपीच्यः। यश्चोदज्रिरासां स्त्रीणां कृष्णो लक्ष्मणि यत्कृष्णवर्णमसाधारणं लक्ष्मभूतं स्त्रीव्यञ्जनं तस्मिन्तार्दिगृदिं शुक्रपातस्थानविशेषं परावधीद्वेगेन ताडयामास। येन ताडनेन शुक्रपातो भवति तत्करोति। अन्यर्बहिःप्रदेशभेदेन स्थानत्रयं स्त्रीव्यञ्जनं विद्यते। अत एवान्यत्राऽऽम्नातम्—' त्रिवृत्प्रजननम्। उपस्थो योनिर्मध्यमा ' इति। तत्र येयं मध्यमा गर्भधारिणी सा तार्दिगृदिः।

कल्पः—' अम्बे अम्बाल्यम्बिक इति महिष्यध्वं गर्हते ' इति।

पाठस्तु—

अम्बे अम्बालीति। सा महिषी भोगाभावदुःखेन विलपन्ती स्वदुःखस्वरूपं ज्ञापयितुं स्वकीयां मातरं त्रिः संबोध्य स्वदुःखं कथयति। लोके ह्यतिनिहिता माता स्वकीयापद्देलायां संबोध्यते। बाल्ये मातुरेव सर्वोपनिषारकत्वेन तस्यां

बोधनस्य पठितत्वादन्यदाऽपि तत्संबोधनमेव सहसा जिह्वायामायाति । तां संबोध्यैवं ब्रूते—रिरंसुं मां कोऽपि न यमति । अयमश्वकस्तु निद्राति ।

कल्पः—' ऊर्ध्वामेनामुच्छ्रयतादिति पत्नयोऽभिमेधन्ते ' इति ।

पाठस्तु—

ऊर्ध्वामेनामिति । स्वदुःखख्यापनार्थमम्बादिशब्दैर्मातरं संबोधयन्तीमेनां महिषीं प्रति वस्त्राच्छादनाद्बहिरेव स्थिता इतरा राजपत्न्यो बुद्धिप्रदानं कुर्वन्ति—हे महिषि एनां त्वदीयां योनिमूर्ध्वामुच्छ्रयतादूर्ध्वाभिमुखं कृत्वोन्नतामवस्थापय। तत्र दृष्टान्तः—यथा लोके कश्चिद्वैरी वेणून्खण्डयित्वा स्वगृहे नेतुं पौढभारमावध्य प्रथमं भूमावूर्ध्वमुच्छ्रयति तद्वदेनामुच्छ्रय । अथोच्छ्रयणानन्तरमस्या योनेर्मध्यस्थानभेधतां स्वाभिमतप्राप्त्याऽभिवर्धताम् । वृद्धिरत्र हर्षविशेषः । तत्र हर्षे दृष्टान्तः—' शीते वाते पुनन्निव ' । यथा लोके कश्चित्खलपूरुहूतेन शूर्पेण धान्यं पुनन्व्यापारबाहुल्येन श्रान्तः स्विन्नगात्रः शीते वाते प्रवृत्ते सति हृष्यति तद्वत् ।

कल्पः—' निर्भहिष्यन्तं गर्हेते निः पत्नयोऽभिमेधन्त उत्तरोत्तरयचा ' इति ।

तत्र प्रथमां गर्ह्यार्थामृचमाह—

अम्बे अम्बालीति । अथ प्रथमामभिमेधनार्थामृचमाह—

यद्धरिणीति । यद्यदा कदाचिद्धरिणी मृगी रात्रौ समागत्य क्षेत्रे फलितं यवं भक्षयति, तत्र क्षेत्रे भक्षयित्वा पुनरप्यरण्ये गतं पशुं पुष्टमपि न मन्यते न जानाति । हे महिषि तथा त्वमपि देवतारूपेण त्वामनुभूयान्तर्हितमर्थं न जानासि । भोगस्तु तव जात एवेति पत्नीनामभिप्रायः । किं च यद्यदा शूद्रा काचिद्दासी कदाचिदर्थः स्वकीयः स्वामी जारो यस्याः सेयमर्थजारा भवति, तदानीं सा दासी स्वामित्वीकारमात्रेणात्यन्तं हृष्यति, न तु स्वकीयकुटुम्बपोषाय धनायति धनमात्मन इच्छति । नहि स्वामित्वीकाराद्धनमधिकं मन्यते । तथा मनुष्यशरीरा त्वमपि देवतारूपस्याश्वस्य स्वीकारादेव परितुष्टा भव, नतु तुच्छमिमं मानुषं भोगमपेक्षस्वेत्यभिप्रायः ।

अथ द्वितीयां गर्ह्यार्थामृचमाह—

अम्बे अम्बालीति । अथाभिमेधनार्थां द्वितीयामृचमाह—

इयं यकेति । इयं प्रत्यक्षतो दृश्यमाना यका शकुन्तिका या काचित्पक्षिणी विद्यते । आहलशब्दः पक्षिध्वनेरनुकरणम् । इत्येतादृशं शब्दं कुर्वती

(अश्वमेधाङ्गमन्त्रकथनम्)

सा शकुन्तिका सर्पति पुमांसं पक्षिणं पृष्ठतो गच्छति, न तृप्ता क्वचिदवतिष्ठते। हे महिषि एवं त्वमपि न तृप्यसि, तदेतदयुक्तमित्यभिप्रायः। किंच धाणिका गर्भस्य धारयित्री योषिद्रूप आहृतं पसो निजल्गुलीति। गमशब्दे पसशब्दे च वर्णव्यत्ययो द्रष्टव्यः तथा सति योनिं सपजन्यं रेतश्च शब्दद्वयेनाभिधीयते। निजल्गुलीति निगिरति। यथा लोके गर्भधारिणी स्त्री योनावाहितं रेतो निगिरति गर्भरूपेणान्तर्धृत्वा संतृप्यति एवं त्वमपि देवतारूपाश्वस्वीकारेण संतोष्टुमर्हसीत्यभिप्रायः।

अथ गर्हार्थां तृतीयामृचमाह—

अम्बे अम्बालीति। अथाभिप्रेधनार्थां तृतीयामृचमाह—

माता च ते पितेति। हे महिषि ते तव या माता तथा तव यः पिता तावुभावपि वृक्षस्याग्रं वृक्षस्य कस्यचिच्छाखया निर्मितं तल्पं रोहत आरुह्य शयाते तदानीं ते पिता प्रसुलाभि प्रवेशयामीत्येवमुक्त्वा गर्भे योनौ मुष्टिं मुष्टिसदृशं मेढ्रमर्तसयत्प्रावेशयत्। एवमयमप्यश्वकार। अतो हे महिषि त्वमुत्तिष्ठेत्यभिप्रायः।

कल्पः—' दधिक्राव्णो अकारिषमिति सर्वाः सुरभिमतीमृचमन्ततो जपित्वा ' इति।

पाठस्तु—

दधिक्राव्ण इति। दधि क्रामति प्राप्नोतीति दधिक्रावा। एतन्नामको दधिप्रियः कश्चिद्देवविशेषः। अग्निरित्यन्ये। तस्य देवस्याकारिषमहं कर्म कृतवानस्मि। कीदृशस्य, जिष्णोर्जयशीलस्याश्वस्य व्यापिनो वाजिनोऽन्नवतः। स देवो नोऽस्माकं मुखं सुरभि करत्कर्पूरादिद्रव्यसमृद्धिप्रदानेन सुगन्धोपेतं करोत्वस्माकमायूंषि च प्रतारिषत्प्रवर्धयतु।

कल्पः—' आपो हि ष्ठा मयोभुव इति तिसृभिर्माजयित्वा ' इति।

तत्र प्रथमामाह—

आपो हि ष्ठेति। हिशब्द एवकारार्थः प्रसिद्ध्यर्थो वा। हे आपो यूयमेव मयोभुवः स्थ सुखस्य भावयित्र्यो भवत। स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम्। तास्तादृश्यो यूयं नोऽस्मानूर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत। किंच महे महते रणाय रमणीयाय चक्षसे दर्शनाय दधातन, अस्मान्परतत्त्वसाक्षात्कारयोग्यान्कुरुतेत्यर्थः।

अथ द्वितीयामाह—

यो वः शिवतम इति । वो युष्माकं शिवतमः शान्ततमः सुखकरेतुर्वो रसोऽस्ति, इहास्मिन्कर्मणि नोऽस्मांस्तस्य भाजयत तं रसं प्रापयत । तत्र दृष्टान्तः—उशतीरिव मातरः कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयं स्वम्परसं प्रापयन्ति तद्वदित्यर्थः ।

अथ तृतीयामाह—

तस्मा अरमिति । यस्य रसस्य क्षयाय क्षयेण निवासेन जिन्वथ यूयं प्रीता भवथ, तस्मै रसाय वो युष्मानलं भृशं प्राप्नुमः । किंच हे आपो यूयं नोऽस्माञ्जनयथ प्रजोत्पादकान्कुरुथ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके एकोनविंशोऽनुवाकः ॥ १९ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके विंशोऽनुवाकः) ।

भूर्भुवः सुवर्वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम् । एतꣳ स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः । लाजीऽछाचीऽन्यशो ममाऽम् । यज्यायै गव्यायै एतद्देवा अन्नमत्तैतदन्नमदि प्रजापते । युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि । अञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा । केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः (१) ॥

(ब्रध्नं पञ्चविꣳशतिम्) ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके विंशोऽनुवाकः ॥ २० ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके विंशोऽनुवाकः)।

एकोनविंशेऽश्वस्य मरणोत्तरकालीन उपचारोऽभिहितः। विंशे तु पूर्वकालीन उपचारोऽभिधीयते।

भूर्भुवः सुवरिति। कल्पः—' पत्नयोऽश्वमलंकुर्वन्ति महिषी वावाता परिवृक्तीति शतं शतमेकैकस्याः सचिवा राजपुत्रीर्धात्रीश्चोग्राणामराज्ञां सूतग्रामण्या इति सहस्रं सहस्रं मणयः सु(सौ)वर्णं(रा)जतसामुद्रा वालेषु मणीन्यावपन्ति भूरिति सौवर्णान्महिषी प्रोंवहाद्भुव इति राजतान्वावाता प्रत्यंग्दाक्षायाक्ष्णोः सुवरिति सामुद्रान्परिवृक्ती प्रत्यक्ष्णोः ' इति।

अत्रोक्ता भूर्भुवः सुवरित्येतास्तिस्रो व्याहृतयो लोकत्रयवाचिन्यः। तथा च सौवर्णराजतसामुद्रमणयः क्रमेण भूम्यादिलोकत्रयरूपा इति तूष्णीमर्थः। तैरेवमन्ये मुख्यमध्यपाश्चात्यभागेषु महिषी वावाता परिवृक्त्याख्या उत्तममध्यमाधमा राजपत्न्योऽश्वस्य केशेषु मणीन्योजयेयुः।

कल्पः—' अथास्य स्वदेशानाज्येनाभ्यञ्जन्ति वसवस्त्वाञ्जन्तु गायत्रेण छन्दसेति गौल्गुलवेन महिषी रुद्रा इति कौसुम्भेन वावाताऽऽदित्या इति मुस्ताजवेन परिवृक्ती ' इति।

भाष्यम्—

वसवस्त्वेति। हेऽश्वाष्टौ वसवो गायत्रेण च्छन्दसा युक्ता गुग्गुलुजन्येन तैलेन मुख्यभागे त्वामञ्जन्तु। एकादश रुद्राः कुसुम्भजन्येन तैलेन त्वां मध्यभागे त्रिष्टुप्छन्दोयुक्ता अञ्जन्तु। द्वादशाऽऽदित्या जागतच्छन्दोयुक्ता मुस्तामूलजन्येन तैलेन पाश्चात्यभागे त्वामञ्जन्तु। एतदेव तैलं सूत्र आज्यशब्देन व्यवहृतम्।

कल्पः—' यद्वावो अपो अगमदिति प्रदक्षिणमावर्तते यवः प्रयाणि यवदावि-ष्ठये ' इति।

---

१ सं. °त्रीर्दाराश्चो°। २ च. °र्धात्र्यश्चो°। ३ स. °ग्राणां रा°। ४ स. °ज्ञान्वाढे°। ५ स. °ग्वाहा°। ६ स. °त्यग्वाहा°। ७ स. °श्वस्य देहाना.। ८ स. °तंयते।

(अश्वमेधाङ्गमन्त्रकथनम्)

रथयुक्तोऽयमश्वो यतो रथशालायाः प्रयातः पुनः प्रादक्षिण्येनाऽऽवृत्तस्तस्यामेव रथशालायामवतिष्ठते ।

पाठस्तु—

यद्धातो अप इति । यद्येन पथा पुरा वातो वायुरपो जलानीन्द्रस्य मित्रो वनुवं पर्जन्यरूपाममत्यापवत् । हे स्तोतः स्तुतिकर्तस्त्वमश्वप्रेरणार्थं शब्दं कुर्वन्नेतेन पूर्वसिद्धेन पथा मार्गेणैतमश्वं नोऽस्मान्मत्यावर्तयास्यावृत्तं कुरु ।

कल्पः—' लाजी३ञ्छाची३न्यशो ममा३मिति पत्नयोऽधीयान्नपरिशेषानुपवपन्ति ' इति ।

पाठस्तु—

लाजी३ञ्छाचीः इति । रात्रौ यैर्दर्शपूर्णमासैर्होमाः कृतास्तदन्नशेषेषु लाजा अपि विद्यन्ते, तानयमश्वो भक्षयति । अतो लाजा अस्य सन्तीति लाजी । भक्षयितुं शक्या अन्नविशेषाः शाचास्या अस्य सन्तीति शाची । अश्वो हि स्वामिनो यशः कीर्तिं संपादयति, तद्विवक्षया यशो ममेति वाक्यमेतन्नामत्वेन प्रयुज्यते । तैरेतैर्लाज्यादिभिस्त्रिभिर्नामभिरश्वं संबोध्य तिस्रः पत्न्य आह्वयन्ति । दूरादाह्वातुमेते प्लुताः । एवं संबोध्याश्वशरीगतान्देवान्पत्येवं ब्रूते—हे देवा एतदन्नमस्माभिर्दीयमानमश्वरूपेणात्त भक्षयत । हे प्रजापते देवस्त्वमप्येतदन्नमद्धि भक्षय ।

कल्पः—' युञ्जन्ति ब्रध्नमिति दक्षिणस्यां युगधुर्ये तमश्वं युनक्ति ' इति ।

पाठस्तु—

युञ्जन्ति ब्रध्नमिति । ब्रध्नमादित्यरूपमरुषमग्निरूपं चरन्तं वायुरूपमिमश्वं तथा परितस्थुषः परितोऽवस्थितांस्त्रींल्लोकानेतदश्वस्य (स्व)रूपान्युञ्जन्ति देवाः सर्वे रथे योजयन्ति । तथा दिवि द्युलोके वर्तमानानि रोचना प्रकाशरूपाणि नक्षत्राणि रोचन्तेऽश्वमेतं प्रकाशयन्ति । अयमर्थः सर्वोऽपि ब्राह्मणे स्पष्टमुच्यते—' असौ वा आदित्यो ब्रध्नः । अग्निर्वा अरुषः । वायुर्वै चरन् । इमे वै लोकाः परितस्थुषः । नक्षत्राणि वै रोचना दिवि ' इति ।

कल्पः—' युञ्जन्त्यस्य काम्येति षष्ठी ' इति ।

तस्याश्वस्य सहायभूतावितरौ द्वावश्वौ युनक्ति ।

पाठस्तु—

युञ्जन्त्यस्येति । अस्याश्वस्य सहायभूतौ हरी द्वावश्वौ युञ्जन्ति देवा रथे

(अश्वमेधाङ्गमन्त्रकथनम्)

योजयन्ति। कीदृशा हरी, काम्या कमनीयौ, विपक्षसा विशेषेण पक्षे रथस्य पार्श्वे वर्तमानौ, शोणेषल्लोहितौ, धृष्णू शत्रुधर्षणक्षमौ, नृवाहसा मनुष्यवाहिनौ।

कल्पः—' केतुं कृण्वन्नकेतव इति रथे ध्वजमुपगूहति ' इति।

पाठस्तु—

केतुं कृण्वन्निति। मर्या मनुष्या अकेतवे पूर्वं ध्वजरहिताय रथाय केतुं कृण्वन्ध्वजं कुर्वन्तु। अपेशसे सुवर्णालंकाररहिताय रथाय पेशः सुवर्णालंकारं कुर्वन्तु। हे रथ त्वमुषद्भिर्ज्वालासदृशैः सुवर्णरश्मिभिः समजायथाः संगतो जातोऽसि॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके विंशोऽनुवाकः॥ २०॥

(अथ सप्तमाष्टके चतुर्थप्रपाठक एकविंशोऽनुवाकः)।

प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा (१)॥

(प्राणायाष्टाविंशतिः)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठक एकविंशोऽनुवाकः॥ २१॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठक एकविंशोऽनुवाकः)।

विंशेऽनुवाके जीवतोऽध्वर्योपचार उक्तः। एकविंशे त्वन्नहोमशेषोऽभिधीयते। तथा च ब्राह्मणम्—' प्राणाय स्वाहा व्यानाय स्वाहेति संततिहोमाञ्जुहोति ' इति।

पाठस्तु—

प्राणाय स्वाहेति । स्नावसूत्पन्नाः शाखा नाडयः संतानाः । वासूत्पन्ना उपशाखा नाडयः परिसंतानाः । एतैश्चतुर्दशभिर्मन्त्रैरन्तहोमेषु संतत्यात्मं होमं कुर्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ सप्तमाष्टके चतुर्थप्रपाठके द्वाविंशोऽनुवाकः)।

सिताय स्वाहाऽसिताय स्वाहाऽभिहिताय स्वाहाऽनभिहिताय स्वाहा युक्ताय स्वाहाऽयुक्ताय स्वाहा सुयुक्ताय स्वाहोद्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वश्चते स्वाहा परिवश्चते स्वाहा संवश्चते स्वाहाऽनुवश्चते स्वाहोद्वश्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा (३) ॥

(सितायाष्टाविंशच्छत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके चतुर्थप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

बृहस्पतिः अग्रथा वा ऋक्षा वै प्रजापतिर्यज्ञेन द्वे वावाऽऽदित्या वर्धिष्ठः संवत्सराय सुवर्गं ब्रह्मवादिनो ज्योतिष्टोमं मेषः कूर्म्याम्योऽङ्म्यो यो अर्वन्तं नमो राज्ञे मयोभूः किꣳ स्विदम्बे भूः प्राणाय सिताय द्वाविꣳशतिः ॥ २२ ॥

बृहस्पतिः पतिं तिष्ठन्ति वै दशरात्रेण सुवर्गं यो अर्वन्तं भूस्त्रिपञ्चाशत् ॥ ५३ ॥

(अश्वमेधाङ्गमन्त्रकथनम्)

हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ सप्तमकाण्डे चतुर्थप्रपाठके द्वाविंशोऽनुवाकः)।

अथ द्वाविंशेऽन्नहोमेष्वेव प्रमुक्त्याख्या होमा उच्यन्ते। तथा च ब्राह्मणम्— 'सिताय स्वाहाऽसिताय स्वाहेति प्रमुक्तीर्जुहोति' इति।

पाठस्तु—

सिताय स्वाहेति। सितादीन्यश्वविशेषणानि। सितासितशब्दाभ्यामारोहणकालीनबन्धबन्धौ विवक्षितौ। अभिहितानभिहितशब्दाभ्यां रशनायुगुडे बन्धाबन्धौ। युक्तादिचतुष्टयेन रथयोजनविशेषाः। विमुक्तप्रमुक्तशब्दाभ्यां मोचनविशेषौ। वश्चतादिशब्दैश्चकेन गमनप्रकारविशेषाः। उपर्यारूढेन प्रेरिता वश्चनादयः। यतादिशब्दैस्तु स्वेच्छाकृता इति विशेषः। एतैरेकोनविंशतिमन्त्रैः प्रमुक्त्याख्यहोमः कार्यः।

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः—

चतुर्विंशतिरात्रौ द्वौ चतुर्थाद्यद्वितीययोः।
त्रिंशद्रात्रस्तृतीये स्याद्द्वात्रिंशद्रात्र उत्तरे ॥ १ ॥
त्रयस्त्रिंशदहोऽन्यस्मिन्नष्टात्रिंशद्रात्र उत्तरे।
एकोनपञ्चाशदहः सप्तमे समुदीरितः ॥ २ ॥
संवत्सराख्यसत्रस्य दीक्षाकालोऽष्टमे श्रुतः।
दीक्षाश्चोपसदोऽन्यस्मिन्दशमे प्रायणीयकम् ॥ ३ ॥
मासा एकादशेऽथाश्वमेधमन्त्रा उदीरिताः।
मेषो नवापाव्यहोमा अवन्तीः परियन्ति हि ॥ ४ ॥
कूष्माण्डो विंशतिश्चाङ्घ्रयो द्वादशापां तु होमकाः।
यो अर्वं श्वप्रहारः स्यात्परोऽश्वस्यप्रसंस्थितिः ॥ ५ ॥
अहं ब्रह्मा स्वामिहस्ते धृत्वाऽभिक्रेति वाचयेत्।
एते मन्त्रास्तु चत्वारो वाज्यहोमा नमो नव ॥ ६ ॥

मयोऽष्टौ स्युर्गव्यहोमाः किं ब्रह्मोद्ये षडीरिताः ।
पत्नीमुदानयेदम्बे सुमेत्याच्छादयेदुभौ ॥ ७ ॥
तौ संप्रसारयेत्पादान्बृषेत्यध्वर्युर्मन्त्रयेत् ।
उत्सृज्दधाति गुह्ये द्वे ह्यम्बे अधं विगर्हयेत् ॥ ८ ॥
ऊर्ध्वामन्या बोधयेयुस्त्रिरेवं स्यात्पुनः पुनः ।
दधि सर्वा जपित्वा हि मार्जयन्ते त्रिभिर्जलात् ॥ ९ ॥
अम्ब इत्यनुवाकेऽस्मिन्मन्त्रा अष्टादशेरिताः ।
भूस्त्रि पत्न्योऽश्वबालेषु कीलेयुस्त्रिविधान्मणीन् ॥ १० ॥
वसाभ्यङ्क्तीन्ति पत्न्योऽश्वमेतमा(श्वं यद्वेत्या)वर्तयेद्गुणा(द्गृहा)न् ।
लाज्यैश्चेष आहार्यो युञ्जन्युञ्ज्यादथेऽश्वकम् ॥ ११ ॥
युञ्जान्यौ योजयित्वाऽथ केतुं बध्नो रथे ध्वजः ।
भूर्भुवः सुवरित्यस्मिन्मन्त्रा एकादशेरिताः ॥ १२ ॥
प्राणा संततिहोमाः स्युस्तत्र मन्त्राश्चतुर्दश ।
सितापमुक्तिहोमाः स्युर्मन्त्रा एकोनविंशतिः ॥ १३ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थप्रपाठके द्वाविंशोऽनुवाकः ॥ २० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

---

१ ख. °र्जलैः । अ° ।

(संवत्सरसत्रकथनम्)

(अथ सप्तमाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

गावो वा एतत्सत्रमासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति कामेन तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता उदतिष्ठन्नरात्स्मेत्यथ यासां नाजायन्त ताः संवत्सरमाप्त्वोदतिष्ठन्नरात्स्मेति यासां चाजायन्त यासां च न ता उभयीरुदतिष्ठन्नरात्स्मेति गोसत्रं वै (१) संवत्सरो य एवं विद्वाꣳसः संवत्सरमुपयन्त्यृध्नुवन्त्येव तस्मात्तूपरा वार्षिकौ मासौ पत्वा चरति सत्राभिजितꣳ ह्यस्ये तस्मात्संवत्सरसदो यत्किं च गृहे क्रियते तदाप्तमवरुद्धमभिजितं क्रियते समुद्रं वा एते प्र प्लवन्ते ये संवत्सरमुपयन्ति यो वै समुद्रस्य पारं न पश्यति न वै स ततः उदेति संवत्सरः (२) वै समुद्रस्तस्यैतत्पारं यदतिरात्रौ य एवं विद्वाꣳसः संवत्सरमुपयन्त्यनातां एवोदचं गच्छन्तीयं वै पूर्वोऽतिरात्रोऽसावुत्तरो मनः पूर्वो वागुत्तरः प्राणः पूर्वोऽपान उत्तरः प्ररोधनं पूर्वं उदयनमुत्तरो ज्योतिष्टोमो वैश्वानरोऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै चतुर्विꣳशः प्रायणीयो भवति चतुर्विꣳशतिरर्धमासाः (३) संवत्सरः

प्रयन्त एव संवत्सरे प्रति तिष्ठन्ति तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रय उभे एव संवत्सरस्य रूपे आप्नुवन्ति ते सꣳस्थित्या अरिꣳच्या उत्तरैरहोभिश्चरन्ति षडहा भवन्ति षडवा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्ति गौश्चाऽऽयुश्च मध्यतः स्तोमौ भवतः संवत्सरस्यैव तन्मिथुनं मध्यतः (४) दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दाꣳस्येव तद्विमोकं यन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गं लोकं यन्ति ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दाꣳसि वै देवयानः पन्था गायत्री त्रिष्टुब्जगती ज्योतिर्वै गायत्री गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव (५) तत्पथा यन्ति समानꣳ साम भवति देवलोको वै साम देवलोकादेव न यन्त्यन्याऽन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहन्तो यन्त्यभिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्त्या अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्यै विश्वजिद्भवति विश्वस्य जित्यै मासिमासि पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यं दधति मासां प्रतिष्ठित्या उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति (६) ॥

(संवत्सरसत्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमकाण्डे पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
सत्रं संवत्सरान्तं यत्तच्चतुर्थे समीरितम्।
विशेषः पञ्चमे तस्य वत्सरारूयस्य वर्ण्यते ॥

तत्राऽऽदौ तावत्संवत्सरसत्रं विधत्ते—

गावो वा एतदिति। यद्यपि गावस्तिर्यक्त्वान्न कर्माधिकारिण(ण्य)स्तथाऽपि तदभिप्रायनिर्देक्तात्र गोशब्देन विवक्षिता। अभिप्रेतव्यानां शृङ्गभावाभावौ स्वस्मिन्नारोप्य गोभिः सह तादृशबुद्ध्या व्यवहरन्ति। पुरा शृङ्गरहिताः सत्यो गावः शृङ्गोत्पत्तिं कामयित्वैतत्संवत्सराय दीक्षिष्यमाणा इत्याद्यनुवाकोक्तं सत्रमन्वातिष्ठन्। तासां शृङ्गकामापेतानामनुष्ठाने प्रवृत्तानां गवां दश मासा निर्गता अभूवन्। अथ मासदशकादूर्ध्वं शृङ्गाण्युत्पन्नानि। तदानीं ता गावोऽपेक्षितेन फलेन समृद्धाः स्म इति मत्वा तस्मात्सत्रादुत्थिताः। अथैतस्मिन्काले कासांचिद्गवां शृङ्गाणि नोत्पन्नानि, ताः पुनरपि मासद्वयमनुष्ठाय संवत्सरसंपूर्तिं कृत्वा समृद्धाः स्म इत्येवं मत्वा तस्मात्सत्रादुत्थिताः। तदेवं यासां शृङ्गाण्युत्पन्नानि यासां च नोत्पन्नानि ता उभयविधा अपि गावो वयं समृद्धा इत्येवं मत्वोत्थिताः। यस्माद्गोभिरनुष्ठितं तस्माद्गोसत्रमित्येवार्थं संवत्सरारूयः कर्मविशेषोऽभिधीयते। ये यजमाना एवं विद्वांसः सांवत्सरारूयं कर्मविशेषमनुतिष्ठन्ति ते समृद्धिं प्राप्नुवन्त्येव।

यदुक्तमर्थवादे यासां गवां शृङ्गाण्यजायन्त, यासां च नाजायन्त ता उभयोऽप्यृद्धिं गता इति, तत्र जातशृङ्गाणां शृङ्गजन्मैवार्धिः। इतरासां तु कथं सा समृद्धिरित्याशङ्क्य तां दर्शयति—

तस्मात्पुरा इति। यस्मादजातशृङ्गास्तूपराः सत्रेण समृद्धिं गतास्तस्मादियं वर्षर्तुसंबन्धिनौ मासौ पत्वा प्रीतिं प्राप्यारण्ये चरति। वार्षिकोऽहि

मासयोररण्ये संचरन्तीनां दीर्घशृङ्ग्युक्तानां गवां महान्क्लेशो जायते । प्रबल-वायूपेतया तीव्रवृष्ट्या मुखे प्रतिहताः सत्यो मुखमर्वाग्भूतं कृत्वा शृङ्गभारेण पीड्यन्ते । तूपरायास्तु नास्त्ययं क्लेशः । यथा केशश्मश्रुपूर्णशिरस्कानां पुरु-षाणां सत्यपि सौन्दर्याभिमानकृते सुखे नदीस्नानघृतभोजनादौ महान्क्लेशस्तद्वत् । यदेतदस्यै तूपरायै गोर्वर्षासु प्रीतिसंपादनं तदेतत्सत्राभिजितं सत्रानुष्ठानल-ब्धम् ।

अथ प्रकारान्तरेण सत्रानुष्ठानं प्रशंसति—

तस्मात्संवत्सरेति । यस्मात्सत्रं प्रशस्तं तस्मात्संवत्सरसदः संवत्सरसत्रमनु-ष्ठितवतो यजमानस्य गृहे यत्किंच क्रियते यत्किमप्यग्निहोत्रादिकमङ्गविकल-मप्यनुष्ठीयते तदाप्तमङ्गसंपूर्णमेव भवति । तथाऽवरुद्धमकाले कृतमपि स्वकाले कृतं भवति । अभिजितं फलापेक्षाराहित्येऽपि संपादितफलं भवति । अत एव शास्त्रन्यायाभिज्ञा आहुः—'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति।

अथैतस्य सत्रस्य प्रायणीयोदयनीयावहर्विशेषौ विधत्ते—

समुद्रं वा एत इति । ये यजमानाः संवत्सरसत्रमुपक्रमन्त एते यजमानाः समुद्रमेव बाहुभ्यां तरितुमुद्युञ्जते । सत्रस्य समुद्रवदतिप्रभूतत्वात् । एवं सति यः पुरुषः समुद्रस्य पारं परतीरं न पश्यति स पुरुषः समुद्रादुद्तुं न शक्नोति । अयं च संवत्सरस्तेन समुद्रेण समानः । तस्मादस्य समाप्तिपरिज्ञानाभावे तत उत्थातुमुत्साहो न भवेत् । तस्मात्समाप्तिरूपमहर्विशेषयम् । तस्य चं समुद्रसमस्य संवत्सरस्य पारावारतीरभूतावतिरात्रौ । एतदभिज्ञाय यजमाना अनार्ता मनस्यु-द्वेगरहिता एवोदचमुत्तमां समाप्तिसंबन्धिनीमृचं गच्छन्ति । तस्मादतिरात्रावुभा-वनुष्ठेयावित्यर्थः । यदि ब्रह्मवादिनो वदन्त्यतिरात्रः परम इत्यनुवाक एव प्राय-णीयोऽतिरात्रो विहितः, तर्ह्युदयनीयातिरात्रेण सह निर्देष्टुमत्र पुनरुपन्यासः ।

तावेतावतिरात्रौ बहुधा प्रशंसति—

इयं वै पूर्व इति । पूर्वः प्रायणीयोऽतिरात्रः प्राथम्यसाम्येन पृथिव्यादि-रूपः । उदयनीयस्तु पश्चाद्भावित्वेन द्युलोकादिरूपः । प्ररोधनं लौकिकस्य वैदिकस्य वा व्यापारस्य प्रारम्भः ।

तावेतावतिरात्रौ सामान्येनोक्तौ तयोर्विशेषाकारेण स्वरूपं विधत्ते—

ज्योतिष्टोम इति । योऽयमतिरात्रः स ज्योतिष्टोमरूपः । स च वैश्वानरेण

(संवत्सरसत्रकथनम्)

दृष्टः । तदनुष्ठानेन स्वर्गमार्गे पुरस्ताज्ज्योतिर्दृश्यते । तच्च स्वर्गप्रकाशनाय भवति ।

यदुक्तं सूत्रकारेण—' मायणीयमतिरात्रमुपेत्य चतुर्विंशमुक्थ्यमारम्भणीयमुपयन्ति ' इति, तदिदं विधत्ते—

चतुर्विंशं इति । यद्येतदारम्भणीयमहस्तदेतत्पूर्वोक्तातिरात्रादुत्तरभावित्वेऽपि वक्ष्यमाणेभ्योऽग्निष्टवषडहावृत्तिरूपेभ्यो मासेभ्यः प्रथमभावित्व त्प्रायणीय इत्युच्यते । स चाहर्विशेषश्चतुर्विंशस्तोमयुक्तः कार्यः । तथा सति संख्यासाम्यादर्धमासद्वारा संवत्सरः संपद्यते । तत्संपत्तौ सत्यां प्रारभमाणा एव यजमानाः संवत्सरसत्रानुष्ठाने स्थिरा भवन्ति । किंचैतस्याहन उक्थ्यरूपत्वादुक्थ्यस्य च पञ्चदशस्तोत्रयुक्तत्वादेकैकस्मिन्स्तोत्रे चतुर्विंशतिसंख्या आवृत्तीषु स्तोत्रीयासु सतीषु मिलित्वा षष्ट्युत्तरशतत्रयपरिमिताः स्तोत्रीया भवन्ति । एवं सति संवत्सरस्य यदिदं चतुर्विंशत्यर्धमासात्मकं रूपं यच्च षष्ट्युत्तरशतत्रयराज्यात्मकं रूपं ते उभे अपि रूपे संख्यासाम्येन प्राप्नुवन्ति ।

अनन्तरभावीन्यहानि विधत्ते—

ते सꣳस्थित्येति । अनुष्ठितमायणीयारम्भणीयास्ते यजमानास्तत ऊर्ध्वं संस्थित्या अरिष्टैः सत्रसमाप्तेरविनाशायोत्तरैर्ज्योतिर्गौरायुरित्यादिभिरहोभिरनुतिष्ठेयुः । अत्र यानि पूर्वमपाठकविहितानि तेषां स्तुत्यर्थोऽनुवादः । यानि त्वविहितानि तेषामत्र विधिरिति विवेकः ।

ज्योतिरादीनामभिष्टवषडहत्वं विधत्ते—

षडहा भवन्तीति । ज्योतिर्गौरायुरायुर्गौर्ज्योतिरित्येवं षडहत्वम् ।

उक्ते षडहे मध्यवर्त्यहर्द्वयं प्रशंसति—

गौश्चाऽऽयुश्चेति । योऽयं गोष्टोमो यश्चाऽऽयुष्टोमस्तावुभौ षडहस्य मध्ये कर्तव्यौ । तत्तेन संवत्सरसत्रस्य मध्ये मिथुनं संपादयन्ति । तच्च प्रजननाय भवति ।

षडहस्याऽऽद्यन्तावहर्विशेषौ प्रशंसति—

ज्योतिरभित इति । षडहस्याऽऽद्यन्तयोर्ज्योतिष्टोमः कार्यः । तदेतदादौ ज्योतिष्टोममनुष्ठाय पुनरप्यन्ते ज्योतिष्टोमस्यानुष्ठानमुपक्रमे निरुद्धस्य विमोचनमानं भवति । तेन ज्योतिर्गौरायुरित्येतन्नयरूपाणि च्छन्दांसि गायत्र्यादिष्वेषु

विमोकं प्राप्नुवन्ति । अपि च पार्श्वद्वये ज्योतिर्युक्तेन द्वीपद्वयसमानेन षडहेन प्रकाशितं स्वर्गं सुखेन प्राप्नुवन्ति ।

अथ प्रश्नोत्तराभ्यां ज्योतिरादिकं प्रशंसति—

ब्रह्मवादिन इति । ये यजमाना आसते सत्रमनुतिष्ठन्ति ते यजमानाः केन पथा स्वर्गं गच्छन्तीति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञो देवयानेन पथा गच्छन्तीत्युत्तरं ब्रूयात् । येन देवा यान्ति सोऽयं देवयानः पन्थाः । सोऽपि कीदृश इति चेच्छ्रूयताम्—गायत्र्यादीनि च्छन्दांस्येव मार्गसाधनत्वाद्देवयानः पन्था इत्युच्यन्ते । इह तु ज्योतिष्टोमादीन्येव गायत्र्यादीनि । तस्मादेवेषामनुष्ठानेन तत्तेनैव पथा गच्छन्ति ।

अत्र सर्वेष्वहःसु पृष्ठस्तोत्रे सामैक्यं विधत्ते—

समानꣳ सामेति । बृहदेव वा रथंतरमेव वा सर्वेष्वहःस्वेकमेव साम पृष्ठस्तोत्रे गायेत् । देवलोको हि पक्षपातरहितेन सर्वसमत्वात्सामरूपः । अत एकविधेन साम्ना कदाचिदपि देवलोकान्न निर्गच्छन्ति ।

तस्य साम्न आधारभूतानामृचामेतेष्वहःसु भेदं विधत्ते—

अन्याअन्या इति । ऋचो हि मनुष्यलोकस्वरूपाः । साम्न आधारभूतत्वात् । यथा कर्मानुष्ठानद्वारा देवलोकस्याऽऽधारभूतो मनुष्यलोकस्तद्वत् । अन्यमन्यमिति मश्चन्यर्थे द्वितीया । ऋचामन्यत्वे सत्यृग्भ्यादन्यस्यादन्यस्यान्मनुष्यलोकाद्देवलोकमभ्यारोहन्तो यजमानाः सुखं प्राप्नुवन्ति । नानाविधकर्माधारत्वान्मनुष्यलोकस्य नानाविधत्वम् । यद्वाऽन्यमन्यं देवलोकं कर्मवैचित्र्येण फलवैचित्र्यमित्यर्थः ।

प्राकृतं साम बाधित्वा सामान्तरं विधत्ते—

अभिवर्त इति । ब्रह्मणः संबन्धि यत्साम तदभिवर्तनामकं कार्यम् । तच्च स्वर्गलोकस्याभितः प्राप्त्यै भवति ।

अहरन्तरं विधत्ते—

अभिजिद्भवतीति । विषुवदाख्यं यत्पथममहस्तस्मात्पूर्वं स्वरसामरूपाण्युपोऽह्नि विशेषाः तेभ्योऽपि पूर्वमभिजिदाख्यमेकमहः कर्तव्यम् । तच्च स्वर्गाभिजयाय भवति ।

पुनरप्यन्यदहर्विधत्ते—

(संवत्सरसत्रकथनम्)

विश्वजिद्भवतीति । विष्णुपदाख्यपादस्य ऊर्ध्वभाविनो ये त्रयः स्वरसामानोऽर्द्धविशेषास्तेभ्य ऊर्ध्वं विश्वजिदाख्यमहः कर्तव्यम् । तच्च विश्वस्य जयाय भवति ।

प्रविमासमभिप्लवषडहेभ्य ऊर्ध्वं पृष्ठ्यं षडहमतिग्राह्यानियमं च विधत्ते—

मासिमासि पृष्ठानीति । प्रविमासानुष्ठानेन तस्मिंस्तस्मिन्मासि वीर्यं तंपद्यते ।

पृष्ठ्यस्य षडहस्य मासेभ्यूर्ध्वभागं स्थानत्वेन विधत्ते—

उपरिष्टादिति ।

अत्र मीमांसा ॥

सप्तमाध्यायस्य तृतीयपादे द्वितीयाधिकरणे चिन्तितम्—

गवामयन आद्येऽह्नि प्रायणीयेति नाम यत् ।
तद्द्वादशाहिकादृष्टौ धर्मानविदिशेन्न वा ॥
पूर्वन्यायेनाविदेशो नैवं प्रथमवा द्वयोः ।
अह्नोस्तुल्येति मुख्यत्वं तयं नाविदिशेदतः ॥

द्वादशाहे प्रथमस्याह्नः प्रायणीयमिति नाम । तथा गवामयनेऽपि तत्राग्निष्टोमनामन्यायेनाविदेश इति चेन्नैवम् । प्रायणीयशब्दप्रवृत्तिनिमित्तस्य प्राथम्यस्य द्वयोस्तुल्यत्वेनोभयत्र मुख्यत्वेऽप्यनेकार्थत्वात्प्रसङ्गात् । प्रारम्भायणे गच्छति भवतीति कर्मणीनेति प्रायणीयम् । अतो नैवात्र धर्मानविदिशति ।

तत्रैव चतुर्थपादे तृतीयाधिकरणेऽन्यच्चिन्तितम्—

गावामयनिके ज्योतिरादौ किं द्वादशाहिकी ।
ऐकाहिकी वाऽनुमानादाद्योऽन्त्यो नामबाधनात् ॥

गवामयने ज्योतिर्गौरायुरिति ज्योतिरादिनामकास्त्रयो यागा विहिताः । तेषु द्वादशाहिकीतिकर्तव्यता युक्ता । कुतः । अनुमितवाक्येन तत्प्रापणात् । गवामयनं हि द्वादशाहविकृतिरिति वक्ष्यति । अतस्तत्संबन्धिभिर्द्वादशैव तदीयधर्मप्राप्तेरुदोऽनुमीयत इति प्राप्ते ब्रूमः—सन्ति ज्योतिरादिनामकास्त्रय एकाहाः । तदीयधर्मा गावामयनिकेषु ज्योतिरादिषु ज्योतिरादिभिर्भिन्नैर्भिन्नामभिः प्राप्याः । नाम चाऽऽनुमानिकाच्चोदकात्प्रबलं, प्रत्यक्षश्रुतत्वात् । अतश्चोदकस्य बाधितत्वादेवैकाहिकीतिकर्तव्यता प्राप्ता ॥

---

१ क. ख. ङ. °शेत्ततः । २ ख. °मिनां । ३ क. ख. घ. ङ. °श्रुतित्वा° ।

(संवत्सरसत्रस्य दशमाससाध्यप्रयोगेण सह विकल्पकथनम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः) ।

गावो वा एतत्सत्रमासताशुक्राः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नरात्मोत्तिष्ठामाव तं काममरुत्स्महि येन कामेन न्यषदामेति तासामु त्वा अब्रुवन्नर्धा वा यावतीर्वाऽऽसामहा एवेमौ द्वादशौ मासौ संवत्सरꣳ संपाद्योत्तिष्ठामेति तासामू (१) द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो वाव ता आर्ष्णुवन्याश्च शृङ्गाण्यसंवन्याश्चोर्जमवारुन्धतर्ष्णोति दशसु मासूत्तिष्ठन्नृष्णोति द्वादशसु य एवं वेद पदेन खलु वा एते यंन्ति विन्दति खलु वै पदेन यन्तद्वा एतद्दृष्टमर्यनं तस्मादेतद्दोसानिं (२) ॥

(तिष्ठामेति तासां तस्माद्द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके द्वितीयेऽनुवाकः) ।

प्रथमेऽनुवाके गवामयननामकं संवत्सरसत्रं कैश्चिद्विशेषैः सह विहितम् । सोमयागा द्विविधाः—आवृत्ता अनावृत्ताश्च । ते चानावृत्ता एकाहाः । आवृत्ता

(संवत्सरसत्रस्य दशमाससाध्यप्रयोगेण सह विकल्पकथनम्)

अपि द्विविधाः—अहीनरूपाः सत्ररूपाश्च । द्विरात्रमारभ्यैकादशरात्रपर्यन्ता अहीनाः । एकादशरात्रद्वादशरात्रौ तु द्विविधौ—अहीनरूपौ सत्ररूपौ च । त्रयोदशरात्रमारभ्योपरितनानि सत्राण्येव । तान्यपि द्विविधानि—रात्रिसत्राण्ययनात्मकसत्राणि च । तत्र शतरात्रपर्यन्तानि रात्रिसत्राणि । संवत्सरसत्रमारभ्योपरितनान्ययनरूपाणि । तेषां च सर्वेषां प्रकृतिभूतमिदं गवामयनम् । तस्य च संवत्सरकालसाध्यः प्रयोगः पूर्वानुवाकेऽभिहितः । अथ द्वितीये दशमाससाध्येन प्रयोगेण सह विकल्पोऽभिधीयते ।

तमेतं विधातुं पूर्वोक्तमेवार्थवादं कस्यचिद्विशेषस्य विवक्षया पुनः पठति—

गावो वा एतदिति । पुरा शृङ्गरहिताः सत्यो गावः शृङ्गाणि तिषासन्तीः सनितुं लब्धुमिच्छन्त्य एतदुच्यमानं सत्रमन्वतिष्ठन् । तासां गवां दक्षा मासा अनुष्ठिता अभवन् । अथास्मिन्काले शृङ्गाण्युत्पन्नानि । ताश्चोत्पन्नशृङ्गाः परस्परमिदमब्रुवन्—येन शृङ्गविषयेण कामेन व्यषदाम सम्पानुष्ठानार्थं वयमेकस्मिन्स्थाने निषण्णास्तं शृङ्गविषयं काममरुत्स्महि वयं संपादितवत्यः । एवमुक्त्वा काश्चिद्गावः कृतार्थंबुद्ध्या सत्रादुत्थिताः । ता उदतिष्ठन्निति पूर्वस्मिन्नर्थवादे श्रवणात् ।

तत्रैव यदन्यदुक्तम्—' अथ यासां नाजायन्त ताः संवत्सरमाप्योदतिष्ठन् ' इति, तत्र विवक्षितं विशेषं दर्शयति—

तासासु त्वेति । या गावः सत्रमनुतिष्ठन्ति तासासु त्वै तासामेव मध्ये जातशृङ्गासूत्थाय मतास्ववशिष्टा अर्धा वा काश्चिदेव गावः परस्परमेवमब्रुवन् । एतास्वर्धरूपासु गोषु मध्ये राशिद्वयम् । तत्र काश्चिच्छृङ्गकामाः । अपरास्तु किमेभिः शृङ्गैरूर्जमेवोदरपूरणक्षमां संपादयाम इति मन्यन्ते । एवं तवि शृङ्गकामा अशृङ्गकामाश्च यावतीर्वा यावत्यः सन्ति ताः सर्वा अपि मिलित्वा परस्परमेवमब्रुवन् । किमब्रुवन्निति तदुच्यते—इमौ संवत्सरावशिष्टौ द्वादशसंख्यापूरणौ मासावासामहा एव सर्वदाऽभ्यनुतिष्ठाम । ततः संवत्सरं पूरयित्वा पश्चादुत्तिष्ठामेति । तासां संवत्सरं पूरयन्तीनां गवां मध्ये यासां शृङ्गश्रद्धाऽस्ति तासां तयैव श्रद्धया द्वादशे मासि शृङ्गाण्युत्पन्नानि । यासां तु श्रद्धा नास्ति ता अश्रद्धयैवेमाः संपन्ना असंपन्नशृङ्गाः । या लोके तूपराः शृङ्गरहिता

---

१ ख. °रमा° ।

(षष्ठ्यष्टहाविषयाविकल्पाभिधानम्)

इष्यन्ते । एवं सति या गावः शुक्लाएयलभन्त, याश्चान्यःस्वच्छन्दारहिताः स्वापेक्षितामूर्जमेवालभन्त, ता उभयविधा अपि स्वस्वप्रयोजनसिद्ध्या समृद्धिं गताः । अत्र दशमासानुष्ठानेन शुक्लमात्रम् । द्वादशमासानुष्ठानेन रमणीयशुक्लत्वं, कर्मभूयस्त्वात्फलभूयस्त्वमिति न्यायात् ।

तदेवमर्थवादेन दशमासानुष्ठानं द्वादशमासानुष्ठानं च प्रशस्य विकल्पितं पक्षद्वयं विधत्ते—

ऋध्नोतीति । यो यजमानः प्रकारद्वयं वेत्ति सोऽयं स्वेच्छयाऽन्यतरं प्रकारमनुतिष्ठन्समृद्धिं प्राप्नोति ।

ननु द्वादशसु मासेषु संपूर्णानुष्ठानत्वादस्तु फलम् । दशमासपक्षे तु कथमित्याशङ्क्योपपादयति—

पदेन खल्विति । एते दशमासानुष्ठायिनो यजमानाः कालाल्पत्वेऽपि पदेन खलु वै यन्ति शास्त्रीयेण मार्गेणानुतिष्ठन्ति । लोकेऽपि पदेन यन्राजमार्गेण गच्छन्पुरुषः स्वल्पस्खलनेऽपि ग्रामप्राप्तिं लभत एव । तद्वदत्रापि फलप्राप्तिर्युक्ता ।

उपपादितं पक्षद्वयमुपसंहरति—

तद्वा एतदिति । यदेतद्गवामयनं यद्यपि दशसु मासेषु समाप्यते, यदि वा द्वादशसु, सर्वथाऽप्यृद्धं फलप्रदमेव । यस्मादयनस्य महिमा भूयांस्तस्मादेतदयनं गोसनि गवां तिर्यग्जातीनामप्यभिमतलाभहेतुः । किमु वक्तव्यं विशिष्टब्राह्मणानामित्यभिप्रायः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके

द्वितीयोऽनुवाकः ॥ २ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः) ।

प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति तदाहुर्यो वै त्रिरेकस्याह्न उपसीदन्ति दुहं वै साऽपराभ्यां दोहाभ्यां दुहेऽथ

(पृष्ठ्यषडहविषयविकल्पाभिधानम्)

कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति संवत्सरꣳ संपाद्योत्तमे मासि सकृत्पृष्ठान्युपेयुस्तद्यजमाना यज्ञं पशूनव रुन्धते समुद्रं वै (१) एतेऽनवारमपारं प्र प्लवन्ते ये संवत्सरमुपयन्ति यद्बृहद्रथंतरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक्तदनुत्सर्गं बृहद्रथंतराभ्यामित्वा प्रतिष्ठां गच्छन्ति सर्वेभ्यो वै कामेभ्यः संधिर्दुहे तद्यजमानाः सर्वान्कामानव रुन्धते (२) ॥

(समुद्रं वै चतुस्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः)।

द्वितीये दशमासद्वादशमासविकल्पोऽभिहितः । अथ तृतीये पृष्ठ्यषडहविषयो विकल्पोऽभिधीयते ।

यत्पूर्वं " विहितं मासिमासि पृष्ठान्युपयन्ति " इति, तत्र पक्षान्तरं विधत्ते—

प्रथमे मासीति । सर्वेषु मासेषु पृष्ठ्यः षडहो नानुष्ठेयः, किंतु प्रथममध्यमोत्तमेषु त्रिष्वेव मासेष्वित्ययमेकः पक्षः ।

पुनरपि पक्षान्तरं विधत्ते—

तदाहुर्यामिति । लोके दोग्धारः पुरुषा एकस्याह्नो मध्ये यां गां द्रोग्धुं त्रिवारं प्राप्नुवन्ति सा गौः प्रथमपर्याये प्रभूतं क्षीरं प्रयच्छति । अपराह्णे द्वितीयतृतीयदोहनपर्यायाभ्यां दृढं वै दुहेऽल्पमेव क्षीरं दोग्धि । एवं सति यां गामकस्मिन्दिने द्वादशकृत्वो दोग्धुमुपयन्ति सा गौः कुतो धोक्ष्यते । नहि क्षीराभावे दोहनमुचितम् । तस्माद्दोसमानस्य पृष्ठ्यषडहस्यापि मासत्रयानुष्ठानमनुचितम् । किमु वक्तव्यं द्वादशमासानुष्ठानेऽप्यनुचितत्वमित्येवम् । तदाहुस्तस्मिन्पृष्ठ्यषडहविषयेऽभिज्ञाः कथयन्ति । तस्मात्संवत्सरमनुष्ठायान्ते मासि सकृ-

(उत्तरपक्षःप्रकारविशेषाभिधानम्)

देव पृष्ठ्यः षडहोऽनुष्ठेयः । इतरेषु तु मासेषु पञ्चभेनाभिप्लवषडहेनैव मासपूरणं कर्तव्यम् । तथा सति यजमानाः पृष्ठ्यषडहस्य संसारत्वाद्यज्ञं संपूर्णं प्राप्नुवन्ति ।

यत्पूर्वं विहितं " समानꣳ साम भवति " इति तदेतदेवात्र विशेषाकारेण विषये—

समुद्रं वा एत इति । पारावारे परावाची तीरे । ये यजमानाः संवत्सरसमनुविधन्ति एते तीरद्वयरहितं समुद्रं बाहुभ्यां तरितुमिच्छन्ति, तच्चाशक्यम् । यदि तत्र बृहद्रथंतरे सामनी अनुक्रमेण पृष्ठस्तोत्रे संपादयेयुस्तदानीं यथा समुद्रस्य मध्ये तरणसाधनं प्लवं संपादयेयुस्तादृक्कुर्वन्ति । तस्मादनुत्सर्गं कदाचिदप्यपरित्यज्य बृहद्रथंतराभ्यामित्वा स्तोत्रं प्राप्य प्रतिष्ठां यज्ञसमाप्तिं गच्छन्ति । अन्यदीयेनापि वत्सेन दोग्धुं शक्या गोः संधिरित्युच्यते । सा च संधिः सर्वेभ्यः कामेभ्यो दुहे यथा यथा क्षीरमपेक्षितं तथा तथा यं कांचिदुत्तमादाय दोग्धुं शक्यते । तत्तथा सत्यत्रापि यजमाना अन्यदीयाभ्यां प्रकृतिभवाभ्यां बृहद्रथंतराभ्यां तत्तद्दिने प्रयुज्यमानाभ्यां सर्वान्कामान्प्राप्नुवन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः) ।

समान्यं ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्त्यन्यदन्यत्साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगती वै छन्दाꣳसि प्रत्यवरोहन्त्याग्रयणं ग्रहा बृहत्पृष्ठानि त्रयस्त्रिꣳशꣳ स्तोमास्तस्माज्ज्यायाꣳसं कनीयान्प्रत्यवरोहति वैश्वकर्मणो गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुन्धत आदि-

(उत्तरपक्षःप्रकारविशेषाभिधानम्)

त्यः (१) गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योन्यो गृह्यते मिथुनत्वाय प्रजात्या अवान्तरं व दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यार्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शान्तिः (२) ॥

(आदित्यस्तस्यैव द्वे च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः)।

तृतीये पृष्ठचषडहविषयप्रकारविशेषोऽभिहितः । अथ चतुर्थ उत्तरे पक्षसि प्रकारविशेषोऽभिधीयते । द्वे हि संवत्सरसत्रस्य पक्षसी । एतच्चान्यत्र समाम्नातम्—' यथा श्यालायै पक्षसी । एवꣳ संवत्सरस्य पक्षसी ' इति । तत्र यथाषण्मासात्मके पूर्वस्मिन्पक्षसि साभैक्यमृचां नानात्वं [च] पूर्वमभिहितम् । इदानीं द्वितीयषण्मासात्मक उत्तरस्मिन्पक्षसि पूर्ववैपरीत्येन ऋगैक्यं सामनानात्वं चाभिधीयते ।

तत्राऽऽदावृगैक्यं विधत्ते—

समान्य ऋच इति । मनुष्यलोके हि कर्म कृत्वा पश्चादेवलोकं प्राप्नुवन्ति । एवमाधारभूतामृचमभ्यस्य पश्चात्तस्यां साम गायन्ति । तस्मादमी मनुष्यलोकस्वरूपाः । ताश्च समान्य एकरूपाः कर्तव्याः । एकस्मिन्नहनि वा ऋचस्ता एवान्यस्मिन्प्रयोक्तव्याः । एवं सति ऋगात्मकान्मनुष्यलोकात्कदाचिदपि नापगच्छन्ति । अपत्यादिसंतानाविच्छेदात् ।

अथ सामनानात्वं विधत्ते—

(उत्तरपक्षःप्रकारविशेषाभिधानम्)

अन्यदन्यादिति । साम्नः पश्चाद्भावित्वसाम्येन देवलोकत्वम् । तादृशं च साम पूर्वस्मिन्दिने यद्भवति ततोऽन्यदुत्तरस्मिन्नहनि कर्तव्यम् । लोकेऽपि देवलोकाभिगच्छन्तः पुरुषा अन्यमन्यं मनुष्यलोकप्रदेशं गच्छन्ति । यद्वाऽन्यमन्यमिति पञ्चम्यर्थे द्वितीया । अन्यस्मादन्यस्माद्देवलोकात्कर्मफलानां तारतम्योपेतत्वेन विविधत्वात्तदा तदा विलक्षणाद्देवलोकात्प्रत्यवरोहन्तो यजमाना मनुष्यलोकं प्राप्नुवन्तीत्यर्थः ।

विशेषान्तरं विधत्ते—

जगतीमग्र इति । पूर्वस्मिन्पक्षसि गायत्री प्रथममनुष्ठिता । उत्तरस्मिंस्तु जगती प्रथममनुष्ठेया । तथा सति जगतीं प्रत्यन्यानि सर्वाणि च्छन्दांस्यवरोहं प्राप्तानि भवन्ति ।

पुनरपि विशेषत्रयं क्रमेण विधत्ते—

आग्रयणमिति । यथा गायत्र्यादिच्छन्दःसु पूर्वस्मात्पक्षसो विपर्ययेणोत्तरस्य पक्षसोऽनुष्ठानमेवं ग्रहसामस्तोमेष्वपि द्रष्टव्यम् । तत्राऽऽग्रयणोऽग्नौ गृहीत इह त्वादौ । तथा सति ग्रहाः प्रत्यवरूढा भवन्ति । तथा तत्र रथंतरं पृष्ठं पूर्वेदिनेऽनुष्ठितम् । इह तु बृहत्पृष्ठं पूर्वमनुष्ठेयम् । तथा सति सर्वाणि पृष्ठस्तोमाणि प्रत्यवरूढानि भवन्ति । तथा तत्र त्रयस्त्रिंशस्तोमोऽन्तेऽनुष्ठितः । इह तु आदावनुष्ठेयः । तथा सति सर्वे स्तोमाः प्रत्यवरूढा भवन्ति । यस्मादत्र पौढत्रयस्त्रिंशः प्रथममाह्यर्वाञ्चस्त्रिणवैकविंशादयः पश्चाद्भाविनस्तस्माल्लोकेऽपि ज्यायांसं पितरं पितामहं वा प्रति कनीयान्पुत्रः 'पौत्रो वा वाहनादश्वादिवरोहति ।

अथातिग्राह्यद्वैधं विधत्ते—

वैश्वकर्मण इति । वाचस्पतिं विश्वकर्माणमित्यनेन गृह्यमाणोऽतिग्राह्यो वैश्वकर्मणः । तेनातिग्राह्येण सर्वाण्यपि कर्माणि यजमानाः प्राप्नुवन्ति । महीमू षु मातरमित्यनेन गृह्यमाणोऽतिग्राह्य आदित्यः । भूमेरदितित्वात् । तेनातिग्राह्येण भूमौ प्रतितिष्ठन्ति ।

अत्र सूत्रकारः—'वैश्वकर्मणमतिग्राह्याणामष्टमं गृह्णाति वाचस्पतिं विश्वकर्माणमूतय इति श्रोभूत आदित्यं महीमू षु मातरमिति तावेवमेव व्यत्यासं गृह्णात्या महाव्रतात् ' इति, तमिमं व्यत्यासं विधत्ते—

---

१ ख. °यं क्रमेण वि ।

(मात्सर्यप्रवृत्तगवामयनद्वयविशेषाभिधानम्)

अन्योन्य इति । अन्योन्य एकैकः । यस्मिन्दिने वैश्वकर्मणो गृह्यते तदः परेद्युरादित्यः । ततोऽपि परेद्युर्वैश्वकर्मणः । पुनरपि परेद्युरादित्यः । एवं सति द्वित्वेन मिथुनरूपत्वात्प्रजोत्पत्तये संपद्यते ।

अथ द्वादशाहीयं दशरात्रे विधत्ते—

अवान्तरमिति । एतच्च वाक्यं " द्वे वाव देवसवे " इत्यत्र व्याख्यातम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

यदि सोमौ सꣳसुतौ स्यातां महति रात्रिये प्रातरनुवाकमुपाकुर्यात्पूर्वौ वाचं पूर्वौ देवताः पूर्वꣳछन्दाꣳसि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यात्प्रातःसवनादेवैषामिन्द्रं वृङ्क्तेऽथो खल्वाहुः सवनमुखे कार्येति सवनमुखात्सवनमुखादेवैषामिन्द्रं वृङ्क्ते संवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा छन्दाꣳसि वै संवेशः उपवेशश्छन्दोभिरेवैषाम् (१) छन्दाꣳसि वृङ्क्ते सजनीयꣳ शस्यꣳ विहव्यꣳ शस्यमगस्त्यस्य कवाशुभीयꣳ शस्यमेतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते यदि प्रातःसवने कलशो दीर्यत वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन्यद्वै यज्ञः स्यातिरिच्यते विष्णुस्तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः शिपिवि-

(मात्सर्यप्रवृत्तगवामयनद्वयविशेषाभिधानम्)

ष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनै-वातिरिक्तमाप्त्वाऽवं रुन्धते यदि मध्यंदिने दीर्येत वषट्कारनिधनꣳ साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्गमयन्ति यदि तृतीयसवन एतदेव (२) ॥

(छन्दोभिरेवैषामवैकाल्यविꣳशतिꣳ)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

चतुर्थेऽनुवाक उत्तरे पक्षसि विशेषोऽभिहितः । अथ पञ्चमे मात्सर्येण प्रवृत्तयोर्द्वयोर्गवामयनयोर्विशेषोऽभिधीयते[1] ।

तमिमं विधत्ते-

यदि सोमाविति । यदि कदाचिद्यजमानसंघयोरुभयोः परस्परमात्सर्येण गवामयनगतौ सोमौ संभूयाभिषुतौ स्यातां तदानीं महारात्रे बुद्ध्वा प्रातरनुवाकनामकस्य शस्त्रस्योपाकरणं कुर्यात् । प्रातर्यावभ्यो देवेभ्य इत्यादिर्मैत्रावरुणपठ्यर्युः पठेदित्यर्थः । यो यजमानसंघः-पूर्वं प्रवृतः सन्नुपाकरोति सोऽन्यस्य संघस्य वागादीन्वृङ्क्त आदत्ते ।

तस्मिंश्च प्रातरनुवाक ऋग्विशेषं विधत्ते-

वृषण्वतीमिति । पक्षतावापो रेवतीः क्षयथा हि वस्व इत्येषा प्रथमा । इह तु तां परित्यज्य वृषन्शब्दवतीमिन्द्राग्नी इत्यामूचं प्रथमां कुर्यात् । तथा सति स एवान्येषां यजमानानां देवतारूपमिन्द्रं प्रातःसवनादपनयति ।

पक्षान्तरमाह-

अथो खल्वाहुरिति । त्रयाणामपि सवनानां प्रारम्भे सेयं वृषण्वती पठनीयेत्येवं केचिदाहुः । तथा सति परेषां सर्वसवनारम्भादिन्द्रमपसारयति ।

अथ तत्राभिभूतिहोममन्त्रान्पञ्च पठति-

---

१ क. °ते-य° ।

(मात्सर्यपवृत्तगवामयनद्वयविशेषाभिधानम्)

संवेशायेति। संवेशाय गायत्र्यादीनां छन्दसां स्वकीययज्ञे सम्यक्प्रवेशाय। उपवेशाय प्रविष्टानां चात्र स्थिरावस्थितये। गायत्र्या अभिभूत्यै परकीयस्य गायत्रीछन्दसोऽभिभवाय स्वाहुतामिदमस्तु। त्रिष्टुभ इत्यादिभिश्चतुर्भिः पदैरुत्तरे चत्वारो मन्त्रा मिद्यन्ते। तेषु संवेशायोपवेशायेत्येतदनुषञ्जनीयम्। प्रथममन्त्रे त्वभिभूत्यै स्वाहेत्येतदनुषज्यते।

मन्त्राणां तात्पर्यं व्याचष्टे—

छन्दा*सि वा इति। योऽयं संवेशो यश्चोपवेशस्तावुभौ छन्दोविषयत्वाच्छन्दांस्येव तथा सति स्वकीयैश्छन्दोभिरितरेषां छन्दांसि विनाशयति।

अथ शस्त्रविशेषान्विधत्ते—

सजनीयामिति। यो जात एव प्रथमो मनस्वानिति सूक्ते स जनास इन्द्र इत्येवं सजनशब्दस्य विद्यमानत्वात्तत्सूक्तं सजनीयम्। निष्केवल्यशस्त्र इन्द्रस्य नु वीर्याणीत्यस्य स्थाने सजनीयसूक्तं शंसनीयम्। ममाग्ने वर्चो विहवेष्वस्विति सूक्ते विहवशब्दसद्भावाच्चद्विहव्यम्। तच्च महावैश्वदेवशस्त्र आ नो भद्रा इत्यस्य स्थाने शंसनीयम्। कया शुभा सवयस इत्येतत्सूक्तमगस्त्येन दृष्टत्वादगस्त्यस्य कयाशुभीयं मरुत्वतीयशस्त्रे जनिष्ठा उग्र इत्यस्य स्थाने शंसनीयम्। यद्वा तत्तच्छस्त्रादौ शस्त्रात्पुरा यथोक्तं सूक्तजातं पठनीयम्। एतदुक्तं सूक्तत्रयं यावदस्त्येतावदेव सारम्। एतत्पाठे तु परेषां यावत्सारमस्ति तत्सर्वं विनाशयति।

अथ नैमित्तिकं स्तोत्रविशेषं विधत्ते—

यदि प्रातःसवन इति। यदि प्रातःसवनकाले द्रोणकलशो दीर्येत विदीर्णो भवेत्तदानीं स्तोतारः सामगा विष्णुदेवताकासु शिपिविष्टशब्दयुक्तास्वृक्षु स्तुतिं कुर्युः। यज्ञस्य संबन्धि यदङ्गमतिरिच्यते शास्त्रीयं क्रममुल्लङ्घ्य वर्तते तदङ्गं शिपिविष्टगुणविशिष्टं विष्णुमभिलक्ष्यातिरिक्तं भवति। पशवः शिपिरिति श्रुत्यन्तराच्छिपिशब्दः पशुवाची। तेषु स्वामित्वेन प्रविष्टः शिपिविष्टः। तच्चातिरिक्तमङ्गं शिपिविष्टो विष्णुरेव। तत्स्वामिकत्वात्। ततो वैष्णवीषु स्तुतौ सत्यामतिरिक्तस्वामिन्येव विष्णावतिरिक्तमङ्गं स्थापयति। अपि चातिरिक्तस्वामिनैव विष्णुनाऽतिरिक्तमयथाशास्त्रमङ्गमाप्त्वा शास्त्रीयं कृत्वा सत्रफलं लभते।

१ क. ध. ङ. च. °तौ तस्याम°।

अथ द्वितीयतृतीयसवनयोर्विशेषं विधत्ते-

यदि मध्यंदिन इति । द्वितीयतृतीयसवनयोर्दीर्घकलशे भिद्यमाने यदि वषट्कारनिधनं साम कुर्युः । निधनं साम्नः पञ्चमो भागः । वषट्शब्दो निधनं सामभक्तिविशेषो यस्य साम्नस्तादृशं साम कुर्युः । वषट्कारो हि हविष्प्रक्षालनस्यावघ्राणस्य समाप्तिस्थानम् । तद्युक्तसामगानेनैव प्रतिष्ठामेवैनत्तत्सं गमयन्ति अवैकल्येन समापयन्ति । यदि तृतीयसवने कलशो भिद्येत तदाज्येनैवेति । अत्र यत्साम तस्यैतदेव वषट्कारनिधनमेव साम कुर्युः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

षड्भिर्मासान्त्संपाद्याहरुत्सृजन्ति षड्भिर्हि मासान्त्संपश्यन्त्यर्धमासैर्मासान्त्संपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान्त्संपश्यन्त्यमावास्यया मासान्त्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्त्संपश्यन्ति पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति पौर्णमास्य हि मासान्त्संपश्यन्ति यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति (१) प्राणमस्मिन्त्स दधाति यत्पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तत्प्राणं दधति तदनु सत्रिणः प्राणन्ति यदहर्नोत्सृजेयुर्यथा दृतिरुपनद्धो विपतत्येव॰ संवत्सरो वि पतेदार्तिमार्छेयुर्यत्पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तदुदानं दधति तदनु सत्रिण उत् (२) अनन्ति नार्तिमार्छन्ति पूर्णमासे वै देवानाꣳ सुतो यत्पौर्ण-

(गवामयनगुणविकाररूपोत्सर्गाभिधानम्)

मास्या मासान्त्संपाद्याहरुत्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति वि वा एतद्यज्ञं छिन्दन्ति यत्षडहमेतत् सन्तमथाहरुत्सृजन्ति प्राजापत्यं पशुमा लभन्ते प्रजापतिः सर्वा देवता देवताभिरेव यज्ञꣳ सं तन्वन्ति यन्ति वा एते सर्वनाथेऽहः (३) उत्सृजन्ति तुरीयं खलु वा एतत्सवनं यत्सांनाय्यं यत्सांनाय्यं भवति तेनैव सवनान्न यन्ति समुपह्वयं भक्षयन्त्येतत्सोमपीथा ह्येतर्हि यथायतनं वा एतेषाꣳ सवनभाजो देवता गच्छन्ति येऽहरुत्सृजन्त्यनुसवनं पुरोडाशाञ्छिर्वपन्ति यथायतनादेव सवनभाजो देवता अव रुन्धतेऽष्टाकपालान्प्रातःसवन एकादशकपालान्माध्यंदिने सवने द्वादशकपालाꣳस्तृतीयसवने छन्दाꣳस्येवाऽऽप्त्वाऽव रुन्धते वैश्वदेवं चरुं तृतीयसवने निर्वपन्ति वैश्वदेवं वै तृतीयसवनं तेनैव तृतीयसवनान्न यन्ति (४) ॥

(उदचत्युद्येऽहरासप्त्वा पञ्चदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमेऽनुवाके गवामयनप्रसङ्गेन तद्विषये मासर्यविशेषोऽभिहितः । अथ षष्ठे गवामयनस्य गुणविकाररूप उत्सर्गोऽभिधीयते—

षडहैर्मासानिति । येऽभिष्टवषडहास्तैः पञ्चकृत्व आवृत्तैरेकं मासमनुष्ठायानन्तरे मासे प्रथमदिने कर्तव्यं ज्योतिरात्र्यमहरुत्सृजेयुः । यद्वा चतुर्विंशति-

वैरेकेन पुष्टयेम च मासं समाप्योत्तरमहरुत्क्षष्टव्यम् । यस्मात्तोकेऽपि पञ्चभिः षड्हैस्त्रिंशद्दिनानि गणयित्वा सावनमासोऽयमिति निश्चिन्वन्ति ।

पक्षान्तरं विधत्ते—

अर्धमासैरिति । पूर्वस्मिन्पक्षे प्रायणीयारम्भणीयावहर्विशेषौ द्वौ परित्यज्य तृतीयदिने षड्हस्याऽऽरम्भः । तदाऽऽरभ्य त्रिंशद्दिनात्मके सावनमासे गते सति तत ऊर्ध्वमहरुत्क्षष्टव्यम् । इदानीं प्रायणीयदिनमारभ्य पञ्चदशदिनात्मकाभ्यां द्वाभ्यामर्धमासाभ्यामेकं मासं समाप्य तदनन्तरमाप्यहरुत्क्षष्टव्यम् । लोके हि द्वाभ्यामर्धमासाभ्यामेको मासो निष्पद्यत इत्येवमर्धमासैरेव मासस्वरूपं निश्चिन्वन्ति । तदिदं पक्षद्वयं सावनमासाभिप्रायम् ।

अथ चान्द्रमासाभिप्रायेण पक्षद्वयम् । तत्रैकं पक्षमाह—

अमावास्ययेति । चान्द्रमसदर्शिनः केचिदमावास्यया मासपरिसमाप्तिं निश्चिन्वन्ति । अतोऽत्रापि तथैव मासं समाप्य शुक्लप्रतिपदि यदहरनुष्ठेयं तत्परित्याज्यम् ।

चान्द्रमसमाश्रित्यैव पक्षान्तरमाह—

पौर्णमास्येति । शुक्लप्रतिपदमारभ्यामावास्यान्तश्चान्द्रो मास इत्यतीतः पक्षः । कृष्णप्रतिपदमारभ्य पौर्णमास्यन्त इत्ययं पक्षः । एतस्मिन्पक्षे कृष्णप्रतिपदि यदहः प्राप्तं तदुत्क्षष्टव्यम् ।

एतमेव पक्षं प्रशंसति—

यो वै पूर्ण इति । लोके हि यः कोऽपि पुरुषो घृतक्षीरादिना पूर्णे पात्रे पुनरप्युपरि तद्द्रव्यमासिञ्चति, स भूमौ पातयित्वा तद्द्रव्यं विनाशयति । यस्तु धीमान्पूर्णात्पात्रादुदचति स्वल्पमुद्धरति सोऽस्मिन्पात्रे प्राणरूपं वायुं दधाति सति ह्यवकाशे वायुः संचरति । एवं सति यदि यजमानास्तत्तत्पौर्णमास्यां तं मासं पूरयित्वा कृष्णप्रतिपदि कर्तव्यमहरुत्सृजेयुः, तदानीं संवत्सरसत्ररूपपुरुषार्थं प्राणवायुं तस्मिन्दिने स्थापयन्ति । तत्संवत्सरप्राणस्थापनमनु सत्रिणं यजमाना अपि श्वासनिरोधाभावेन जीवन्ति ।

अथ व्यतिरेकमुखेन(णै)तमेव पक्षं प्रशंसति—

यदहरिति । उक्तन्यायेनाहन्यनुत्सृष्टे सत्युदकपूर्णो दृतिर्दृढं बध्यमानोऽपि यथा क्रमेणाभावेन नश्यति, एवं संवत्सरात्मकः क्रतुर्विनश्येत्, यजमानाश्च मरणं प्राप्नुयुः । तत्परिहारार्थमहन्युत्सृष्टे सति तेनोत्सर्गेण संवत्सरसत्रस्याविनाशार्थं

(गवामयनगुणविकाररूपोत्सर्गाभिधानम्)

प्राणसंचारस्थानीयमुदानं संपादयन्ति । तत्संपादनमनु सवित्रोऽप्युदनन्ति उच्छ्वसन्ति ततो नाऽऽर्तिं गच्छन्ति ।

पुनः प्रकारान्तरेणैतमेव पक्षं प्रशंसति—

पूर्णमास इति । पौर्णमास्यामेव प्रकृतौ देवानां संबन्धी सोमोऽभिषुतो भवति । अतः पौर्णमास्यां मासं पूरयित्वा पश्चादहरुत्सर्गे सति देवानां संबन्धिना तेन पूर्वयागेन(ण) संयोजयितुमिमं यज्ञं यजमानाः प्रत्यवरोहन्ति ।

यस्मिन्दिने कर्तव्यमहरुत्सृज्यते तस्मिन्दिने कर्तव्यमन्यद्विधत्ते—

वि वा एतद्यज्ञामिति । षडहैरभिप्लुत्पृष्ठ्यरूपैः सातत्येन वर्तमानं यज्ञमुपेत्य यद्यहरुत्सृजेयुरेतेन यज्ञं विच्छिन्द्युरित्येव, तत्परिहाराय प्राजापत्यं मनुमालभेरन् । प्रजापतिश्च स्रष्टृत्वात्सर्वदेवतात्मकः । अतो देवताभिरेव यज्ञं संततं कुर्वन्ति ।

अथ तत्र कर्तव्यान्तरं विधत्ते—

यन्ति वा एत इति । ये यजमाना अहरुत्सृजन्ति ते सवनादुपगच्छन्ति । प्रातःसवनादेरनुष्ठानाभावात् । तत्र क उपाय इति तदुच्यते—पत्सांनाय्यवस्ति तत्प्रातःसवनादिभ्यस्त्रिभ्योऽप्यतिरिक्तचतुर्थसवनस्थानीयम् । अतः सांनाय्येऽनुष्ठिते सवनान्नापगच्छन्ति ।

तस्य सांनाय्यशेषस्य सोमवदुपाह्वानपूर्वकं भक्षणं विधत्ते—

समुपह्वयेति । उत्सृष्टेऽह्नि मुख्यसोमाभावादेतस्मिन्काले यजमाना एतत्सोमपीथा एतदेव सांनाय्यशेषभक्षणं सोमपीथः सोमपानं येषां ते तादृशाः । तस्मात्सोमवत्परस्परमभिज्ञाप्य भक्षयेयुः ।

पुनरपि कर्तव्यान्तरं विधत्ते—

यथायतनमिति । ये यजमाना अहरुत्सृजन्ति, एतेषां संबन्धिन्यः सवनभाजो देवताः सवनाभावान्निराशाः सत्यः स्वस्वस्थानं गच्छन्ति । अतस्तस्मा भूदिति तच्चात्सवनस्थाने पुरोडाशान्निर्वपेयुः । तेन तच्चरस्थानाच्चास्ता देवताः प्राप्नुवन्ति ।

तेषु पुरोडाशेषु विशेषं विधत्ते—

अष्टाकपालानिति । अष्टत्वादिसंख्यासाम्याद्गायत्र्यादिच्छन्दःपाप्तिः ।

पुनरपि कर्तव्यान्तरं विधत्ते—

(अहरुत्सर्गविशेषाभिधानम्)

वैश्वदेवं चरुमिति । तृतीयसवनस्य वैश्वदेवत्वमन्यत्र स्पष्टमाम्नातम्-'यद्वसूनां प्रातःसवनꣳ रुद्राणां माध्यंदिनꣳ सवनं विश्वेषां देवानां तृतीयसवनम्' इति । अतो वैश्वदेवचरुणा तृतीयसवनाचापगच्छन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

उत्सृज्यां ३ नोत्सृज्या३मिति मीमाꣳसन्ते ब्रह्मवादिनस्तदाहुरुत्सृज्यमेवेत्यमावास्यायां च पौर्णमास्यां चोत्सृज्यमित्याहुरेते हि यज्ञं वहत इति ते त्वाव नोत्सृज्ये इत्याहुर्ये अवान्तरं यज्ञं भेजाते इति या प्रथमा व्यष्टका तस्यामुत्सृज्यमित्याहुरेष वै मासो विशीर इति नाऽऽदिष्टम् (१) उत्सृजेयुर्यदादिष्टमुत्सृजेयुर्यदादिशे पुनः पर्याप्लावे मध्ये षडहस्य संपद्येत षडहैर्मासान्त्संपाद्य यत्सप्तममहस्तस्मिन्नुत्सृजेयुस्तदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालमग्नेर्वै वसुमतः प्रातःसवनं यदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति (२) सवनमष्टाभिरुपयन्ति यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न क्षयावयन्तीन्द्रस्य वै मरुत्वतो माध्यंदिनꣳ सवनं यदिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्ति

(अहरुत्सर्गविशेषाभिधानम्)

देवतामेव तद्भागिनीं कुर्वन्ति सवनमेकादशभि-
रुप यन्ति विश्वेषां वै देवानामूर्मुमतां तृतीयस-
वनं यद्वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता
एव तद्भागिनीः कुर्वन्ति सवनं द्वादशभिः (३)
उप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै
प्रजापतिर्यज्ञस्यानुसर्गायाभिवर्त इतः षण्मासो
ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव त-
त्सुवर्गं लोकमभिवर्तयन्तो यन्ति प्रतिकूलमिव
ह्येतः सुवर्गो लोक इन्द्र क्रतुं न आ भर पिता
पुत्रेभ्यो यथा । शिक्षा नो अस्मिन्पुरुहूत यामनि
जीवा ज्योतिरशीमहीत्यमृतं आयताः षण्मासो
ब्रह्मसामं भवत्ययं वै लोको ज्योतिः प्रजा ज्यो-
तिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति
(४) ॥

(नाऽऽदित्यं कुर्वन्ति द्वादशभिरिति विश्वतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाकेऽहरुत्सर्ग उक्तः । सप्तमे तत्रैव विशेषोऽभिधीयते ।

तत्र निर्णयाय कंचिद्विचारं दर्शयति—

उत्सृज्यामिति । उत्सर्गपक्षे यज्ञविच्छेदः, अनुत्सर्गपक्षे श्वासनिरोध इति दोषद्वयं मनसि निधाय ब्रह्मवादिनो विचारयन्ति । प्लुविर्विचारार्थः । तत्राभिज्ञाः प्राजापत्यपश्वादिभिर्विच्छेदस्य समावातुं शक्यत्वाच्छ्वासनिरोधपरिहारायोत्सर्जनपक्षमेवात्र निश्चितवन्तः ।

तमेव दिनविशेषं दर्शयति—

अमावास्यामिति । एतयोरमावास्यापौर्णमास्योर्यज्ञवाहित्वं प्रसिद्धम् । तथाचान्यत्र स्पष्टमाम्नायते— 'ते अब्रूतां वरं वृणावहा आवं देवानां भागवे असाव' इति । अतस्तयोस्तिथ्योर्यदहर्यदहः प्राप्तं तदुत्सृज्यमित्येषां निर्णयः ।

अथान्येषां पक्षमाह—

ते त्वावेति । ये पौर्णमास्यमावास्ये अवान्तरं यज्ञं भेजाते ते सर्वथैव नोत्सृज्ये । न केवलमेते प्रकृतिरूपं दर्शपूर्णमासकर्मैव निष्पादयतः, किं त्वङ्गानादिगतमवान्तरं कर्मापि । तस्मात्तयोरुत्सर्गो न युक्त इति ।

तर्हि कस्मिन्दिनेऽहरुत्सर्ग इत्याशङ्क्य तेषां वचनं दर्शयति—

या प्रथमेति । व्यष्टकाशब्देन कृष्णपक्षमुच्यते, राजसूयप्रकरणे व्युष्टिद्विरात्रे पौर्णमास्या सह निर्देशात् । तथा चाऽऽम्नायते—' पौर्णमास्यां पूर्वमहर्भवति । व्यष्टकायामुत्तरम् ' इति । तस्यां व्यष्टकायां यत्प्राप्तमहस्तदुत्सृज्यम् । एष दिनविशेषो विशरो विशीर्णो मासः, पौर्णमास्यामेव पूर्वमासस्य समाप्तत्वात् । अतो मासविच्छेदामावात्रैव युक्त उत्सर्गः । तस्यास्तु व्यष्टकायाः प्राथम्यं कृष्णपक्षादित्वादुपपद्यते ।

क्वचिदुत्सर्गमपवदति—

नाऽऽदिष्टमिति इति । विशुद्धमहर्नामग्रहणपुरःसरं विशेषाकारेण यदुच्यते तदादिष्टम् । तच्चोत्सृष्टव्यम् । यत्तु षडहादिद्वारा सामान्यतः पार्वं तदेवोत्सृष्टव्यम् । यद्वाऽनुत्सर्गपक्षमेव वै मास इत्यादिना स्तौति । योऽयमुत्सर्गः स एष विशरो मासो भवति । अहरुत्सर्गे सति मासस्यापूर्णत्वमावान्मासस्य विशीर्णत्वम् । इतिशब्दो हेत्वर्थः । यस्मान्मासपैकल्यं प्रामोति तस्मादादिष्टं शास्त्रेणोपदिष्टमहरेकमपि नोत्सृजेयुरितिपक्षान्तरस्वीकारः । अत एव सूत्रकारः पक्षद्वयस्वीकारमुपन्यस्योत्सर्गपक्षेऽनुष्ठेयविशेषमुदाजहार—' उत्सृज्या३ नोत्सृज्या३मित्युक्तं यद्यहान्युत्सृजेयुः प्रथमं पृष्ठं संस्याप्य ' इत्यादिना ।

तत्रेमं विशेषं वक्तुमत्राप्युत्सर्गं पाक्षिकं पुनर्विशदयति—

यदादिष्टमिति । यदि शास्त्रोपदिष्टस्याप्युत्सर्गापेक्षा तदानीमपि यादृशे यादृशमहर्ज्योतिरादिकं पुनः पुनः पर्यावर्तमाने षडहस्य मध्ये संपद्यते, तादृशमेवोत्सृजेत् । नतु प्रविष्टोक्तं विषुवदादिकमित्यध्याहरणीयम् । तस्मादाभिप्लव-

(अहरुत्सर्गविशेषाभिधानम्)

पृष्ठ्यास्रूपैः षड्हैर्मासं पूरयित्वा पृष्ठ्यषडहादूर्ध्वभावि यत्सप्तपञ्चाहस्वारम्भनाहानि पार्षं ज्योतिर्याग्मुत्सृजेत् ।

इत्यमुत्सर्गं विशदीकृत्य तत्रानुष्ठेयं विशेषं विशदयति—

तदग्नये वसुमत इति । तत्तस्मिन्नुत्सर्गाहने चत्वारि हवींषि निर्वपेयुः ।

तत्र प्रथमं हविः प्रशंसति—

अग्नेर्वा इति । देवतां वसुमन्त्वमग्नेः, कपालगताष्टत्वसंख्यया गायत्रीद्वारा सवनप्राप्तिः ।

द्वितीयं हविः प्रशंसति—

यदैन्द्रं दधीति । अथ तृतीयं हविः प्रशंसति—

इन्द्रस्येति । यथा वसुमानग्निः प्रातःसवनस्य स्वामी तथा मरुत्वानिन्द्रो माध्यंदिनस्य सवनस्य स्वामी । वसुमतोऽग्नेस्तत्स्वामित्वं श्रुत्यन्तरदृष्टादवगन्तव्यम्—' तꣳ स्तुतं देवताश्चेवो व्यगृह्णन, अग्निः प्रातःसवनम्, इन्द्रो माध्यंदिनꣳ सवनं, विश्वे देवास्तृतीयसवनम् ' इत्येका श्रुतिः । ' यद्वसूनां प्रातःसवनम् ' इत्यपरा श्रुतिः । यस्त्विन्द्रो माध्यंदिनसवनस्वामी स तु मरुत्वान् । ' इन्द्र मरुत्व इह पाहि सोमम् ' इति श्रुत्यन्तरात् । तत्राग्नेर्यथा प्रथमेन हविषा भागित्वमेवमिन्द्रस्याप्यनेन हविषा भागित्वम् । कपालगतैकादशत्वसंख्यया त्रिष्टुब्द्वारा सवनप्राप्तिः ।

अथ चतुर्थं हविः प्रशंसति—

विश्वेषां वा इति । विश्वेषां देवानां तृतीयसवनस्वामित्वं पुरोदाहृतम् । ऋभुमत्त्वमप्यृभूणां तृतीयसवनदेवत्वादवगन्तव्यम् । तच्च तृतीयस्य सवनस्यर्भुमतो विभुमत इत्यादिमन्त्रादवगम्यते । ताश्च देवता अनेन हविषा भागिन्यः । कपालगतद्वादशसंख्यया जगतीद्वारा सवनप्राप्तिः ।

अथ पूर्वानुवाकोक्तं प्राजापत्यं प्रशंसति—

प्राजापत्यमिति । यज्ञस्य प्रजापतिसृष्टत्वात्तद्रूपत्वम् । अननुसर्गोऽपरित्यागः । उत्सृष्टेऽप्यहनि प्राजापत्येन यज्ञोऽपरित्यक्तो भवति ।

अथ पूर्वस्मिन्पक्षसि ब्रह्मसाम विधत्ते—

अभिवर्त इत इति । गवामयनविकल्पितत्वादस्याप्युत्सर्गेणामयनस्य द्वे पक्षसी । तत्र प्रथमेन पक्षसा स्वर्गप्राप्तिः । द्वितीयेन पक्षसा पुनर्भूलोकप्राप्तिः ।

पूर्वं व्यपस्थायां सत्यामितो भूलोकाग्निर्गत्य स्वर्गं गच्छतां यजमानानामानुकूल्येन पूर्वे पक्षास्ति षडपि मासाग्नैरन्तर्येण प्रतिदिनमभिवर्तारूपं बलसाम भवेत्। तथा सत्यभिवर्तसाम्नो बलरूपत्वाद्बलसामघर्तेन च स्वर्गाभिमुख्यं गच्छन्तः स्वर्गं प्राप्नुवन्ति।

अथोत्तरस्मिन्पक्षस्यन्यद्बलसाम विधत्ते—

इन्द्र क्रतुं न इति। अमुतः स्वर्गलोकादायतां भूलोकं प्रत्यागच्छतां यजमानानामानुकूल्येनोत्तरस्मिन्पक्षास्ति षडपि मासाग्नैरन्तर्येण प्रतिदिनमिन्द्र क्रतुं न इत्यस्यामृचि यदुत्पन्नं तद्बलसाम भवेत्। तस्या ऋचोऽयमर्थः—हे इन्द्र नोऽस्मदर्थमिमं क्रतुमाहर। तत्र दृष्टान्तः—यथा लोके पिता पुत्रेभ्यो भागमाहृत्य प्रयच्छति तद्वत्। हे पुरुहूतेन्द्रास्मिन्ननुष्ठीयमाने यागनि क्रतुविशेषरूपे नियमे शिक्ष हितोपदेशं कुरु। वयं त्वत्प्रसादाज्जीवा जीवन्तो ज्योतिः प्रकाशरूपं मनुष्यलोकमशीमहि प्राप्नुयामेति। अस्यामृचि ज्योतिःशब्देन भूलोकस्तत्प्रजाश्चविवक्षिताः। तथा सत्येतदीयसामप्रयोगेणेमं भूलोकं ज्योतिषा प्रपद्यन्तः प्राप्नुयामेति वाचा वदन्तश्चाऽऽगच्छन्ति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
सप्तमोऽनुवाकः॥ ७॥

(अथ सप्तमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः)।

देवानां वा अन्तं जग्मुषामिन्द्रियं वीर्यमपाक्रामत्तत्कोशेनावारुन्धत तत्कोशस्य कोशत्वं यत्कोशेन चात्वालस्यान्तं स्तुवन्ति यज्ञस्यैवान्तं गत्वेन्द्रियं वीर्यमव रुन्धते तत्रस्यध्यांऽऽहवनीयस्यान्तं स्तुवन्त्यग्निमेवोपद्रष्टारं कृत्वर्धिमुप यन्ति प्रजापतेर्हृदयेन हविर्धानेऽन्तः स्तुवन्ति प्रेमाणमेवास्य गच्छन्ति श्लोकेन पुरस्तात्सदसः (१) स्तुवन्त्यनुश्लोकेन पश्चाद्यज्ञस्यैवान्तं गत्वा श्लो-

(सामविशेषकथनम्)

कृभाजो भवन्ति नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं दधत्यप्रतिहता-मिरुद्गायति तस्मात्पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यञ्चति शिरं एव न पञ्चदशꣳ रथंतरं भवतीन्द्रियमेवावं रुन्धते सप्तदशम् (२) बृहद्-[illegible]। अथो प्रैव तेन जायन्त एक-विꣳशं भद्रं द्विपदासु प्रतिष्ठित्यै पत्नय उप गाय-न्ति मिथुनत्वाय प्रजात्यै प्रजापतिः प्रजा असृ-जत सोऽकामयताऽऽसामहꣳ राज्यं परीयामिति तासाꣳ राजनेनैव राज्यं पर्यैत्तद्राजनस्य राजन-त्वं यद्राजनं भवन्ति प्रजानामेव तद्यजमाना राज्यं परि यन्ति पञ्चविꣳशं भवति प्रजापतेः (३) आप्त्यै पञ्चाक्षरस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति पञ्चभिरासीना मनुष्यलोकमेवाभि जय-न्ति दशꣳ सं पद्यन्ते दशाक्षरा विराडन्नं विराड्-विराजैवान्नाद्यमव रुन्धते पञ्चधा विनिषद्य स्तु-वन्ति पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्येकैकयाऽ-स्तुतया समार्यन्ति दिग्भ्य एवान्नाद्यꣳ सं भरन्ति ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यम् (४) संभृत्य तेज आत्मन्धत्ते तस्मादेकः प्राणः सर्वा-ण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिरं उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामु-

(सामविशेषकथनम्)

प्रमा भवन्त्यासन्दीमुद्गाताऽऽरोहति साम्राज्यमेव गच्छन्ति प्लेङ्खꣳ होता नाकस्यैव पृष्ठꣳ रोहन्ति कुर्चावध्वर्युर्ब्रध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रतितिष्ठन्त्यथो आक्रमणमेव तत्सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै (५)॥

(तदंसः सप्तदशं प्रजापतेर्गायति दिग्भ्य एवाद्यं पत्येकादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ सप्तमाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः)।

उत्तर्गिणामयने सप्तमे भीर्मासया निर्णीतम्*। तावता विकृतिं समाप्याथ प्रकृतावेव गवामयने यन्महाव्रतमस्ति तस्मिन्ननानुवाकत्वयेन विशेषाः केचिदुच्यन्ते। तत्रास्मिन्नष्टमे सामविशेषाः केचिदुच्यन्ते।

प्रथमं तावत्कोशाख्यं साम विधत्ते—

देवानां वा अन्तमिति। पुरा कदाचिद्देवानां सत्रसमाप्तिं प्राप्नुवतामिन्द्रियं तत्सामर्थ्यं चापक्रान्तम्। तच्च देवाः कोशाख्येन साम्ना पुनः प्राप्तवन्तः। कुश आह्वान इत्यस्माद्धातोरुत्पन्नः कोशशब्द आह्वानसाधनमाचष्टे। तस्मादङ्गतवीर्यस्याऽऽह्वानसाधनत्वाद्देवस्य साम्नः कोश इति नामधेयम्। तेन कोशाख्येन साम्ना चात्वालसमीपे स्तुतिं कुर्युः। तेन यज्ञसमाप्तिं प्राप्येन्द्रियसामर्थ्यं प्राप्नुवन्ति।

अथ तत्रस्य ऋद्धिनामकं सामान्तरं विधत्ते—

सत्रस्यर्ध्नोतीति। यत्तत्रस्यर्धिनामकं साम तेनाऽऽहवनीयसमीपे स्तुतिं कुर्युः। तथा तत्पश्चिमेव स्तुतेः साक्षिणं कृत्वा समृद्धिमेव प्राप्नुवन्ति।

सामान्तरं विधत्ते—

प्रजापतेरिति। प्रजापतेर्दयमिति कस्यचित्साम्नो नामधेयम्। तेन हवि-

(सामविशेषकथनम्)

धानस्यान्तः स्थित्वा स्तुतिं कुर्युः। तेन च स्तोत्रेणास्य प्रजापतेः प्रीतिं गच्छन्ति।

अन्यत्सामद्वयं विधत्ते—

श्लोकेन पुरस्तादिति। श्लोकानुश्लोकशब्दौ सामविशेषनामनी। ताभ्यां सदस उभयतः स्तुतिं कुर्युः। तेन च यज्ञप्रजाप्तिं प्राप्य कीर्तिभाजो भवन्ति।

तत्रानुश्लोके कंचिद्विशेषं विधत्ते—

नवभिरिति। अस्य साम्न आधारभूताः स्तोत्रिया ऋचो नवसंख्याकाः। गानकर्ता चाध्वर्युर्न तद्गाता। पुरुषशरीरे नवच्छिद्रवर्तित्वेन प्राणानां नवसंख्याकत्वात्तान्सर्वान्यजमानेषु स्थापयति।

तास्वृक्षु कंचिद्विशेषं विधत्ते—

सर्वा ऐन्द्रिय इति। इन्द्रो देवता यासां ता ऐन्द्रियः। तथाविधा एव नवसंख्याकाः सर्वा अपि कार्याः। तेन प्राणेषु सामर्थ्यं स्थापयन्ति।

तास्वृक्षु प्रतिहारभागं निषेधति—

अप्रतिहृताभिरिति। ऋचि गीयमानस्य साम्नः पञ्च भागा हिंकारप्रस्तावोद्गीथप्रतिहारनिधनाख्याः। तेषु प्रतिहारभागं वर्जयित्वा तद्वर्जिताभिरेव पूर्वोक्ताभिर्नवभिर्गायेत्। यस्मादत्र प्रतिहारो वर्जितस्तस्माल्लोकेऽपि पुरुषः शिरोव्यतिरिक्तानि हस्तपादादीन्यङ्गानि प्रत्यञ्चि प्रत्याहृतानि संकुचितानि करोति। शिर एव त्वेकं संकुचितं न करोति। न हि हस्तपादवदङ्गुलीवच्च शिरः प्रतिहर्तुं शक्यते। तस्माच्छिरस्थानीयाध्वर्युगाने प्रतिहारो वर्जनीयः।

अथ तस्य गानस्थानितः स्तोमद्वयविशिष्टं सामद्वयं विधत्ते—

पञ्चदशमिति। पञ्चदशस्तोमकं रथंतरं साम्नैकवो गायेयुः। तेन पञ्चदशस्येन्द्रेण सहोत्पन्नत्वादिन्द्रियप्राप्तिर्भवति। तथा सप्तदशस्तोमयुक्तं बृहद्गायवो गायेयुः। सप्तदशस्यान्नप्रजाहेतुत्वात्तत्प्राप्तिः। यथा पक्षिणो द्वौ पक्षावेवमेतद्गानद्वयं द्रष्टव्यम्। अत एवान्यत्राऽऽम्नातम्—'पञ्चदशोऽन्यः पक्षो भवति। सप्तदशोऽन्यः' इति।

अथ स्तोमसामविशेषमृग्विशेषेषु विधत्ते—

एकविंशं भद्रमिति। एकविंशः स्तोमविशेषः। भद्रशब्दः सामविशेषस्य नामधेयम्। पादद्वयोपेता ऋचो द्विपदाः। तेन पादद्वित्वेन पवित्रा भवति।

एतस्य भद्रसाम्नः समीपे पत्नीगानं विधत्ते—

पत्नय उपेति । यजमानानां याः पत्नयस्ताः सर्वा भद्ररूपसामभावस्य समीपे स्वयमपि गायेयुः । पुरुषाणां पत्नीनां च गायेन मिथुनं(नत्वे) पत्न्याः प्रजोत्पत्तिर्भवति ।

अथ सामान्तरं विधत्ते—

प्रजापतिरिति । राजनमिति सामविशेषस्य नामधेयम् । राज्यसाधनत्वात्तस्य राजनत्वम् । तत्सामप्रयोगेण यजमाना राज्यं प्राप्नुवन्ति ।

तत्रैव स्तोमविशेषं विधत्ते—

पञ्चविꣳशमिति । प्रजापतेः पञ्चविंशस्तोमसम्भृत्वात्तेन तत्प्राप्तिः ।

तस्मिन्नेव पञ्चविंशस्तोमे कंचिद्विशेषं विधत्ते—

पञ्चभिरिति । पञ्चविंशाख्यस्तोमे या आद्याः पञ्च स्तोत्रियास्ता ऋत्विभिरुत्थितैः पठनीयाः । याश्चानन्तरभाविन्य ऋसंख्यास्ता आसीनैर्गातव्याः । तेन लोकद्वयप्राप्तिः । दशसंख्यया विराड्द्वारान्नप्राप्तिः ।

आसीनगाने कंचिद्विशेषं विधत्ते—

पञ्चधेति । पञ्चभिः प्रकारैः स्थानविशेषेषूपविश्य स्तुवन्ति । ऊर्ध्वया सह दिशां पञ्चत्वाद्दिक्षु प्रतिष्ठा ।

तत्रैवान्यं विशेषं विधत्ते—

एकैकयेति । पञ्चसु स्थानेषूपवेशनकाले क्वचिदुद्गाता प्रथममुपविशति । तदानीमितरे सर्वेऽप्यस्तुतया स्तोत्रियया समुद्गातारं समागत्योपविशन्ति । एवं तत्तत्स्थानेषु प्रथममेवोद्गातर्युपविष्टे सति तत्तदृचां स्तुतेः प्रागेव सर्वेऽप्युद्गातारमुपगच्छेयुः । तथा सति सर्वाभ्यो दिग्भ्योऽन्नं संपादयन्ति ।

इतरेष्वागतेषूद्गातृकृत्यं विधत्ते—

ताभिरुद्गातेति । यां स्तोत्रियां पुरस्कृत्योद्गातारमागच्छन्ति तया स उद्गाता गायेत् । तथा सति दिग्भ्यः संपादितमन्नं तेजोरूपं सर्वेऽपि स्वात्मन्येव स्थापयन्ति । यस्मादत्र सर्वेषु स्थितेष्वेक एवोद्गाता गायति तस्माच्छरीरमध्येऽप्येक एव प्राणः सर्वाण्यङ्गानि रक्षति । अपि च यथा कश्चित्पक्षिविशेष आकाश उत्पतिष्यन्स्वकीयं शिरः कर्षति कुरुते, एवमेव सोऽपि यजमानः प्रजानां मध्ये यजमाना उत्तमा भवन्ति ।

अथ स्त्रीणामुत्विजामाधारविशेषान्विधत्ते—

(सामविशेषकथनम्)

आसन्दीमिति। आसन्दी चतुर्भिः पादैरुन्नतैरुपेता खट्वाकारा। उद्गातुस्तदारोहणेन सर्वे यजमानाः साम्राज्यं देशाधिपत्यं गच्छन्ति। प्लेङ्खो दोला, वा होता समारोहति। तेन सर्वेऽपि स्वर्गमारोहन्ति। कूर्चौ दर्भविशेषौ, तावध्वर्युरारोहति। तेन ब्रध्नस्याऽऽदित्यस्य पिष्टपं स्थानं गच्छन्ति। साम्राज्यस्वर्गादित्यस्थानरूपा ये लोका एतावन्त एवापेक्षिता देवलोकास्तेष्वनुक्रमेण मविविशन्ति। अपि च तेनाऽऽरोहणेन स्वर्गसमुद्रस्याऽऽक्रमणसाधनं सेतुं यजमानाः कुर्वते। तच्च स्वर्गप्राप्त्यै भवति।

अत्र मीमांसा। दशमाध्यायस्य चतुर्थपादे षष्ठाधिकरणे चिन्तितम्—

पत्नीनामुपगानं किमृत्विजां तच्चिवर्तयेत्।
समुच्चितं वा गानस्य शारीरत्वाच्चिवर्तनम्॥
स्वराभिव्यञ्जनं गानं ब्रह्मवत्तद्विधीयते।
वादित्रोपचयः साम्यात्सांनिध्याच्च समुच्चयः॥

ब्राह्मणे श्रूयते—'पत्नय उपगायन्ति' इति। प्रकृतौ श्रूयते—'ऋत्विज उपगायन्ति' इति। तदेतदृत्विगुपगानं पत्न्युपगानेन निवर्त्यते। ननु प्रकृतावुद्गात्रा सामि गीयमाने सत्यृत्विजोऽन्ये सामैवोपगायन्ति। इह तु पत्नयो वादित्रं वादयन्तीति भिन्नविषयत्वान्नास्ति निवृत्तिः। नैवं, गानशब्दस्य शारीरे प्रसिद्धत्वात्। तस्माद्ऋत्विजो निवर्त्य पत्नयः सामोपगायेयुरिति प्राप्ते ब्रूमः—गानशब्दस्य नाक्षरोच्चारणमर्थः, किंतु स्वराभिव्यञ्जनं, तच्च शरीरेण वादित्रेण वा सिध्यति। अत एव गानतत्त्वज्ञा आहुः—'दारवी गात्रवीणा च द्वे वीणे गानजातिषु' इति। 'तच्च गानं ब्रह्मन्यायेनापूर्वक्रियाविधानान्न प्रकृतिलिङ्गं स्यात्। एवं तर्हि गानोपचयवाचिन उपगशब्दस्य वैयर्थ्यमिति चेन्न। वादित्रोपचयसंभवात्। अस्ति हि तत्र वादित्रनादः, 'दिक्षु दुन्दुभयो नदन्ति' इति श्रुतेः। पत्न्युपगानं च वादित्रनादः। 'काण्डवीणाभिरुपगायन्ति' इति श्रुतेः। अतः सदृश्यात्सांनिध्याच्च तदुपचयो युक्तः। तस्मादृत्विगुपगानयोः समुच्चयः।

तत्रैवान्यच्चिन्तितम्—

वाऽयं श्लोकादिनाऽऽद्यादि व वाऽऽद्यः स्तुतिलिङ्गतः।
देशसाम्नोर्विधौ भेदो वैशिष्ट्यात्स्यात्समुच्चयः॥

---

* न्यायमालाविस्तरे त्वेतादृश्यानुपूर्वी न मिलति।

महाव्रते श्रूयते—' श्लोकेन पुरस्तात्सदसः स्तुवन्त्यनुश्लोकेन पश्चात् ' इत्यादि । तत्र श्लोकानुश्लोकनामकैः सामभिः प्राकृतान्याज्यपृष्ठादिस्तोत्राणि रथंतरवामदेव्यादिनामकानि सामानि बाध्यानि । कुतः, स्तुवत इति प्रकृतिलिङ्गदर्शनात् । प्रकृतावाज्यैः स्तुवते पृष्टैः स्तुवत इति हि श्रुतम् । नैवत्सारम् । किमत्र स्तुतिमनूद्य देशसामगुणौ विधीयेते, किंवा गुणद्वयविशिष्टा स्तुतिः । नाऽऽद्यो वाक्यभेदापत्तेः । द्वितीये तु कार्यभेदेन बाधाभावात्समुच्चयः स्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठकेऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः)

अक्र्येण वै संहस्राशः प्रजापतिः प्रजा असृजत ताभ्य इलान्देनेरां लूतामवारुन्ध यदक्र्यं भवति प्रजा एव यद्यजमानाः सृजन्त इलान्दं भवति प्रजाभ्य एव सृष्टाभ्य इरां लूतामव रुन्धते तस्माद्याꣳ समाꣳ सत्रꣳ समृद्धं क्षोधुकास्ताꣳ समाँ प्रजा इषꣳ ह्यासामूर्जमाददते याꣳ समां व्यृद्धमक्षोधुकास्ताꣳ समाँ प्रजाः (१) न ह्यासामिषमूर्जमाददत उत्क्रोदं कुर्वते यथा बन्धान्मुमुचाना उत्क्रोदं कुर्वत एवमेव तद्यजमानादेवबन्धान्मुमुचाना उत्क्रोदं कुर्वत इषमूर्जमात्मन्दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्त्याजिं धावन्त्यनभि-

---

१ ख. बाध्याभा° ।

(शततन्तुवीणादिकथनम्)

जितस्याभिजित्यै दुन्दुभीन्त्समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेव (२) वाचमवरुन्धते भूमिदुन्दुभिमा ध्वनि यैवेमां वाक्प्राविंशत्तामेवावरुन्धतेऽथो इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वासां वाचामवरुद्ध्या आर्द्रे चर्मन्व्या यच्छते इन्द्रियस्यावरुद्ध्या आऽन्यः क्रोशंति प्रान्यः शꣳसति य आक्रोशंति पुनात्येवैनान्त्स यः प्रशꣳसति पूतेष्वेवान्नाद्यं दधात्यृषिकृतं च (३) वा एते देवकृतं च पूर्वैर्मासैरवं रुन्धते यद्भूतेच्छदाꣳ सामानि भवन्त्युभयस्यावरुद्ध्यै यन्ति वा एते मिथुनाय संवत्सरमुपयन्त्यन्तर्वेदि मिथुनौ सं भवतस्तेनैव मिथुनान्न यंन्ति (४)॥

(व्यृद्धमक्षौधुकास्ताꣳ सर्वा प्रजाः परमामेव च त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः)।

अष्टमे क्रोशसामादीन्युक्तानि । नवमे शततन्तुवीणादिकमुच्यते ।

तत्राऽऽदौ तावत्सामद्वयं विधत्ते—

अर्क्येण वा इति । अर्क्यमिति कस्यचित्साम्नो नामधेयं तेन प्रजापतिः पुरा बहुविधाः सहस्रसंघरूपाः प्रजा असृजत । इलान्दमिति सामान्तरस्य नामधेयम् । तेन साम्ना स्वसृष्टप्रजार्थं लुप्तामिरां पूर्वं विच्छिन्नमन्नमवारुन्ध पुनरव्यविच्छेदेन संपादितवान् । तद्वद्यजमाना अपि सामद्वयेन प्रजाः सृष्ट्वा तदर्थमन्नं संपादयन्ति । यस्मादस्मिन्सत्रे साम्नाऽन्नं संपाद्यते तस्माद्यां सभां सत्रं समृद्धं यस्मिन्संवत्सरे नैरन्तर्येण सत्रं समृद्धं प्रवृत्तं तां सभां प्रजाः क्षोधुकास्त-

स्मिन्संवत्सरे नैरन्तर्येण क्षुधिताः प्रजाः सत्रिणां समीपे सर्वदिग्भ्यः समागच्छन्ति । सत्रिणो ह्यासां प्रजानां नानाविधमन्नं रसं च समादाय प्रयच्छन्ति । यस्मिंस्तु संवत्सरे सत्रं व्यूढं न प्रवृत्तं तस्मिन्संवत्सरे प्रजा अक्षोधुकाः क्षुधिताः कार्श्चिदपि नाऽऽगच्छन्ति । यस्मादासां प्रजानां व्रीह्याद्यन्नं क्षीरादिरसं च नैवाऽऽदाय प्रयच्छन्ति तस्मादनागमनम् ।

अथान्यदनुष्ठेयं विधत्ते—

उत्क्रोदं कुर्वत इति । हर्षनिमित्तो ह्यत्युच्चध्वनिरुत्क्रोदः । सर्वे यजमानाः सत्रसमाप्त्या संतुष्टा उत्क्रोदं कुर्युः । यथा लोके चिरं शृङ्खलाबद्धाः पुरुषास्तेभ्यो विमोकं गच्छन्तो हर्षेणोत्क्रोदं कुर्वन्ति, एवमेव यजमानाश्चिरकालानुष्ठेयसत्ररूपाद्देवबन्धाद्विमोकं प्राप्नुवन्तः सत्रसामर्थ्येनान्नं रसं च स्वात्मनि संपादयन्ति । अत उत्क्रोदं कुर्वते ।

यदुक्तं सूत्रकारेण—' औदुम्बरस्य वीणादण्डस्य दशातिमथितान्येकैकस्मिन्नतिमथिते दश दश मौञ्जांस्तन्तूनवयति स वाणः शततन्तुः ' इति, तदेव विधत्ते—

वाणः शततन्तुरिति । दशेन्द्रियाणां दशसंख्याकासु नाडीषु वृत्तिभेदेन शतसंख्या ।

उत्साहोपेतानां यजमानानां कांचिन्मर्यादां कृत्वा तत्पर्यन्तं धावनं विधत्ते—

आजिं धावन्तीति । यत्पूर्वमनभिजितमसंपादितं फलं तस्य संपादनायेदं धावनम् ।

उत्साहद्योतकमन्यद्विधत्ते—

दुन्दुभीनिति । दिक्षु स्थापिता ये दुन्दुभयस्तान्सम्यगाहन्युः । सोऽयं दुन्दुभिध्वनिः सर्वध्वनीनामुत्तमोऽत्युच्चत्वात् । तद्वादनेन सभारञ्जनक्षमां परमां वाचं प्राप्नुवन्ति ।

यदुक्तं सूत्रकारेण—' अपरेणाऽऽग्नीध्रमण्डपं भूमिदुन्दुभिमवटं खनन्त्यर्धमन्तर्वेद्यर्धं बहिर्वेदि तमार्द्रेण चर्मणोत्तरलोम्ना वितत्य शङ्कुभिः परिनिहत्यावैतत्पुच्छकाण्डमाहननार्थं निदधाति ' इति । तत्र तेन पुच्छकाण्डेनाऽऽहननं विधत्ते—

१ ख. सत्रं समाप्य सं° । २ ख. °स्तस्माद्बन्धाद्वि° ।

(शततन्तुवीणादिकथनम्)

भूमिदुन्दुभिमिति। भूमिदुन्दुभ्याघातेन पार्थिवेषु द्रव्येषु परस्परसंघट्टनेन जन्याः शब्दविशेषाः स्वार्थीना भवन्ति।

यदुक्तं सूत्रकारेण—'उपाकृते माहेन्द्रस्य स्तोत्रे सर्वा वाचो वदन्त्युत्कोदं यजमानाः कुर्वते[1]पाघाटलिकास्तुम्बुरुवीणाः पिच्छोला इति पत्नयो वादयन्ति वीणाः शङ्खा नालीरु[4]पाहिताः' इति, तदेतद्विधत्ते—

सर्वा वाच इति। अपाघाटलिकादिवाद्यविशेषजन्या मनुष्यगवाश्वादिशब्दजन्याश्च ये शब्दविशेषास्ते सर्वेऽपि प्राप्यन्त इत्यर्थः।

अथ ब्राह्मणशूद्रयोश्चर्मनिमित्तं कलहं विधत्ते—

आर्दे चर्मन्निति। तेनाऽऽर्द्रचर्मनिमित्तेन कलहेन सामर्थ्यसंपत्तिर्भवति। कलहप्रकारस्तु सूत्रे विस्पष्टमुक्तः—'शूद्रार्यौ चर्मकर्ते व्यायच्छेते आर्दे श्येते परिमण्डलेऽन्तर्वेदि ब्राह्मणो बहिर्वेदि शूद्र आक्रोशति शूद्रः प्रशंसति ब्राह्मण इमेऽरात्सुरिमे सुभूतमक्रन्निति ब्राह्मण इम उद्वासीकारिण इमे दुर्भूतमक्रन्निति शूद्रस्तं ब्राह्मणः संजित्याऽऽग्नीध्रे चर्माध्यस्यति' इति।

तत्राऽऽक्रोशं प्रशंसां च क्रमेण विधत्ते—

आऽन्यः क्रोशतीति। इमे सत्रानुष्ठायिनो यजमाना द्रव्यव्ययं कृत्वा सर्वशून्यकारिणोऽतो दुर्व्यापारमकुर्वन्नित्येवमन्य एकः शूद्र आक्रोशति निन्देत्। इमे यजमानाः समृद्धिं गताः सद्व्यापारमकुर्वन्नित्येवमन्य एको ब्राह्मणः प्रशंसेत्। तयोर्मध्ये शूद्र आक्रोशति स एनान्यजमानाञ्शोधयित्वा निष्पापान्करोति। यो ब्राह्मणः प्रशंसति स च पूतेषु यजमानेष्वर्घ्यं संपादयति।

अथ कांश्चित्सामविशेषान्विधत्ते—

ऋषिकृतं चेति। योऽयमृषिभिर्मनुष्यैः कृत उपकारो यश्च देवैः कृत उपकारस्तदुभयमप्यस्मान्महाव्रताद्गवामयनगतादुपान्त्यादह्नः पूर्वमनुष्ठितैर्मासैर्यजमानाः प्राप्नुवन्ति। अतो महाव्रतेऽपि तदुभयप्राप्त्यर्थं भूतेच्छनामकानामृषीणां संबन्धीनि तैर्दृष्टानि सामानि गातव्यानि।

अथ ब्रह्मचारिपुंश्चल्योर्मिथुनीभावं विधत्ते—

यन्ति वा एत इति। ये यजमानाः संवत्सरसत्रमनुतिष्ठन्ति ते चिरकाल-

---

१ ख. °तेऽपघा°। २ ख. वीणा पि°। ३ ख. °ङ्खावली°। ४ ख. °रुपहि°। ५ ख. अपघा°।

(दासीनृत्यकथनम्)

ब्रह्मचर्याभ्यासान्मिथुनशक्तेरपगच्छन्ति । अतः पुनस्तच्छक्तिप्राप्त्यर्थं वेदिमध्ये ब्रह्मचारिपुंश्चलीरूपौ मिथुनावयवौ संभवं कुर्यातां, तेन संभवेन यजमाना मिथुनशक्तेर्नापगच्छन्ति । अन्तर्वेदिदेशश्च सूत्रकारेण दर्शितः— 'उत्तरस्या वेदिश्रोण्यां पुंश्चल्यै मागधाय च परिश्रयन्ति' इति । मगधदेशोत्पन्नो ब्रह्मचारी मागधः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः) ।

चर्मावं भिन्दन्ति पाप्मानमेवैषामवं भिन्दन्ति माऽपं रात्सीर्माऽतिं व्यात्सीरित्याह संप्रत्येवैषां पाप्मानमवं भिन्दन्त्युदकुम्भानाधिनिधायं दास्यो मार्जालीयं परि नृत्यन्ति पदो निघ्नतीरिदंमधुं गायन्त्यो मधु वै देवानां परममन्नाद्यं परममेवान्नाद्यमवं रुन्धते पदो नि घ्नन्ति महीयामेवैषु दधति (१) ॥

(चर्मैकान्नपञ्चाशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः) ।

नवमेऽनुवाक उत्कोदादिकमुक्तम् । अथ दशमे दासीनृत्यमुच्यते[1] । तत्राऽऽदौ तावच्चर्मवेधनं विधत्ते—

चर्मावं भिन्दन्तीति । अत्र भेद्यं चर्म सूत्रकारेण विस्पष्टमुक्तम्—'उत्तरेणाऽऽग्नीध्रं कटसंघाते तेजनसंघाते वाऽऽर्द्रं चर्म वेधनार्थं वितत्योच्छ्रयन्ति'

---

१ क. घ. ङ. च. °ते—च° । २ ख. वेध्यं । ३ क. ङ. °र्मं व्यध° । घ च °र्मं

(अश्वमेधाङ्गमन्त्रकथनम्)

इति। वेधनप्रकारश्च तेनैव स्पष्टमुक्तः—'विपरियन्त्येतच्चर्म कवचिनस्तेषामेकैकं संशास्ति माऽपरात्सीर्माऽतिव्यात्सीरिति तत्रो विद्धा नातिपादयन्ति' इति। तेन चर्मवेधनेनैषां यजमानानां पाप्मानमेव भिन्दन्ति।

अथ वेधनात्पूर्वं कवचिष्वध्वर्योः शासनं विधत्ते—

माऽप रात्सीरिति। हे कवचिंश्चर्मवेधनाय प्रवृत्तस्य बाणस्य स्खलनरूपमपराधं मा कार्षीः। अस्खलन्यपि चर्म भित्त्वा परतो बाणगमनरूपमतिव्यधनं मा कार्षीरित्येवमध्वर्युर्ब्रूयात्। एवं सत्येषां यजमानानां पाप्मानं सम्यगेव भिन्दन्ति।

अथ नृत्यं विधत्ते—

उदकुम्भानिति। अत्र दासीसंख्यां सूत्रकारो दर्शयति—'माजालीयस्यान्तेऽष्टौ दासकुमार्य उदकुम्भैर्विकम्पन्ते' इति। ता एतास्तान्कुम्भान्शिरसि धृत्वा माजालीयस्य शिष्यस्य परितो नृत्यन्ति नृत्यं कुर्वन्ति। कीदृश्यो दास्यः, पदो निघ्नतीर्दक्षिणात्पादान्भूमौ ताडयन्त्यः। इदं मध्वित्येषं शब्दं गायन्त्यः। अथवा इदमेव सारघं मध्वित्यादिमन्त्रं गायन्त्यः। मधु च देवानामत्यन्तं प्रियमत्रम्। अतस्तद्गानेन परममत्रं प्राप्नुवन्ति। योऽयं पादघातस्तेनैषु यजमानेषु महीयां पूजां संपादयन्ति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः॥ १०॥

(अथ सप्तमाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः)।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै

१ ख. °ग्यिन्त्ये°। २ ख. °कैकशः सं°। ३ क. विधाना°। ४ ख. °व्यधन्°।

(अश्वमेधाङ्गमन्त्रकथनम्)

स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्रꣳ स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाऽभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते (१) स्वाहाऽनुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोदग्रहीष्यते स्वाहोदगृह्णते स्वाहोदगृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहाऽऽतप्स्यते स्वाहाऽऽतपते स्वाहोग्रमातपते स्वाहाग्नये स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहाऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशꣳसीभ्यः स्वाहा रैभीभ्यः स्वाहा सर्वस्मै स्वाहा (२) ॥

(संवर्षते रैभीभ्यः स्वाहा द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

दशमे दार्षीनृत्यमुक्तम् । तावता महाव्रतं समाप्तम् । अथोत्तरेष्वनुवाकेष्वश्वमेधाङ्गमन्त्रा उच्यन्ते । तत्रापि द्वयोरनुवाकयोरग्नहोपमन्त्राः ।

तत्रप्रथमानुवाकगतान्मन्त्रानाह—

पृथिव्यै स्वाहेति । पृथिव्यादयस्त्रयो लोकाः । मेघोत्पादनाय धूमज्योतिःसलिलमरुतां सांनिपातः संप्लवः । स च त्रिविधः—आगामी वर्तमानो भूतश्च । अथ एव सर्वात्मकप्रजापत्यभिन्नत्वात्तद्रूपेण निर्दिश्यते । धूमादिसंप्लवादूर्ध्वं भविष्यद्वर्तमानातीतदशापन्ना मेघोत्पत्तिस्त्रिविधा । त्रिष्वप्यनुगताकारो मेघः

(अश्वमेधाङ्गमन्त्रकथनम्)

मेघनिष्पत्तेरूर्ध्वं दृप्तपतनं नीहारः। दृप्तानां बाहुल्येनेषदन्धकारापादनं निहाका। वदीयशैत्येनावयवसंकोचः प्रातच्चः। संकोचादूर्ध्वं पलायनं प्रचलाका। तत ऊर्ध्वं भविष्यदादिरूपेण त्रिविधा विद्युत्। तथा गर्जनस्थाप्यवस्थात्रयम्। वृष्टेरपि तद्वदवस्थात्रयम्। तत्र तृतीयस्यामवस्थायां चत्वारो भेदाः—वायुवशादाभिमुख्येन वर्षणमभिवर्षणं, परितो मण्डलाकारेण वर्षणं परिवर्षणम्, ऋजुधारारूपं संवर्षणम्, गच्छतः पुरुषस्य पृष्ठतो वर्षणमनुवर्षणं चेति वृष्टिक्लिन्नस्य पुरुषस्य त्रिविधा शैत्यावस्था शीकायनम्। घर्मकाले संतप्तायां भूमौ प्रथमवृष्टेरवत्ताने समुत्थित ऊष्मा प्रोषः। सोऽपि दशात्रयापन्नः। वृष्टेरुपरम उद्ग्रहणं, तदपि त्रिविधम्। तत ऊर्ध्वं मेघलेशानामपगमनं विष्ठवः। सोऽपि त्रिविधः। मेघलेशेष्वपगतेषु सूर्यप्रकाशसंचार आतपः। सोऽपि त्रिविधः। पादबद्धा मन्त्रा ऋचः। प्रश्लिष्टपठितानि यजूंषि। गीत्यात्मकानि सामानि। अङ्गिरोभिर्मुनिभिर्दृष्टाश्चतुर्थवेदोत्पन्ना आङ्गिरसः। विधिभागैः सहितास्ते सर्वे वेदाः। देवताविषयारूपानपरा मन्त्रा गाथाः। मनुष्यविषयारूपानपरा ऋचो नाराशंस्यः। रेभः शब्दकृदग्निस्तद्विषया ऋचो रैभ्यः। अनुकसंग्रहार्थः सर्वशब्दः। एतैः पञ्चाशन्मन्त्रैः रात्रावन्नहोमाः कार्याः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः॥ ११॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके द्वादशोऽनुवाकः)।

दृत्वते स्वाहाऽदन्तकाय स्वाहा प्राणिने स्वाहाऽप्राणाय स्वाहा मुखवते स्वाहाऽमुखाय स्वाहा नासिकवते स्वाहाऽनासिकाय स्वाहाऽक्षण्वते स्वाहाऽनक्षिकाय स्वाहा कर्णिने स्वाहाऽकर्णकाय स्वाहा शीर्षण्वते स्वाहाऽशीर्षकाय स्वाहा पद्वते स्वाहाऽपादकाय स्वाहा प्राणते

---

१ क. घ. ङ च °ड्प्रणीना°।

(अश्वमेधाङ्गमन्त्रकथनम्)

स्वाहाऽप्राणते स्वाहा वदते स्वाहाऽवदते स्वाहा पश्यते स्वाहाऽपश्यते स्वाहा शृण्वते स्वाहाऽशृण्वते स्वाहा मनस्विने स्वाहा (१) अमनसे स्वाहा रेतस्विने स्वाहाऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा लोमवते स्वाहाऽलोमकाय स्वाहा त्वचे स्वाहाऽत्वकाय स्वाहा चर्मण्वते स्वाहाऽचर्मकाय स्वाहा लोहितवते स्वाहाऽलोहिताय स्वाहा माꣳसन्वते स्वाहाऽमाꣳसकाय स्वाहा स्नावभ्यः स्वाहाऽस्नावकाय स्वाहाऽस्थन्वते स्वाहाऽनस्थिकाय स्वाहा मज्जन्वते स्वाहाऽमज्जकाय स्वाहाऽङ्गिने स्वाहाऽनङ्गाय स्वाहाऽऽत्मने स्वाहाऽनात्मने स्वाहा सर्वस्मै स्वाहा (२) ॥

(मनस्विने स्वाहाऽनात्मने स्वाहा द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः) ।

अथ शरीरहोममन्त्रा उच्यन्ते । तथा च ब्राह्मणम्—' दत्वते स्वाहाऽदन्तकाय स्वाहेति शरीरहोमाञ्जुहोति ' इति ।

पाठस्तु—

दत्वते स्वाहेति । दन्ता अस्य सन्तीति दत्वान् । न विद्यते दन्ता यस्यासावदन्तकः । एवं सर्वत्र निधिनिषेधौ योजनीयौ । जगति हि जीवा द्विविधाः—तत्तद्व्यवयवोपेतास्तद्विकलाश्चेति । अश्वस्य प्राजापत्यत्वेन सर्वात्मकत्वाभिप्रेत्यैवानि विशेषणान्युच्यन्ते । तत्र दन्तयुक्ता जीवाः प्रसिद्धाः । अदन्तका वाता वृक्षास्तद्विधाः । प्राणिनो जङ्गमा अप्राणिनः स्थावराः । वदवपाना

(अश्वमेधाङ्गमन्त्रकथनम्)

निर्देशात्तच्चदवयवराहित्येन वा सत्यप्यवयवे तदसौकर्येण वोदाहरणीयम्। त्वग्निर्ग्यं, चर्म तदाधारभूतं गोलकम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके त्रयोदशोऽनुवाकः)।

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्ध्यै मह्यꣳ संनत्या अमुष्मै कामायाऽऽयुषे त्वा प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वाऽऽराद्घोषाय त्वा प्रत्यु-त्यै त्वा (१) ॥

(कोऽष्टात्रिꣳशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः)

अवीवयोरनुवाकयोः पञ्चाशन्मन्त्रैरेकपञ्चाशन्मन्त्रैश्च सह चोदिता उक्ताः। अथ परिधिमन्त्रा उच्यन्ते।

कल्पः—' कस्त्वा युनक्ति स त्वा युनक्त्विति परिधीन्युनक्त्यस्य यज्ञस्यर्ध्यै मह्यꣳ संनत्या इति सर्वत्रानुषजति ' इति।

पाठस्तु—

कस्त्वा युनक्तीति। हे मध्यमपरिधे कः प्रजापतिस्त्वां युनक्ति बहि-र्वेदीपे योजयति। हे दक्षिणपरिधे स प्रजापतिस्त्वां युनक्तु। हे उत्तरपरिधे विष्णुस्त्वां युनक्तु। किमर्थम्, अस्य यज्ञस्य समृद्ध्यर्थम्। तथा मह्यं संनत्यै मां प्रति सर्वेषां प्राणिनां संनमनाय, अमुष्मै प्रजादिरूपाय कामाय, आयुष

(अश्वमेधाङ्गमन्त्रकथनम्)

आयुर्वृद्धये त्वामहं पुनज्मि । एवं सर्वत्राभ्याहारः । प्राणापानव्यानाः प्रतिष्ठाः । स्थितिः प्रमाणम् । रयिर्धनम् । राधोऽन्नम् । घोषः कीर्तिः । पोषः पश्वादिपुष्टिः । आरादूघोषो दूरशब्दवाचित्वम् । प्रच्युतिः सर्वदुःखनिवृत्तिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके चतुर्दशोऽनुवाकः) ।

अग्नये गायत्राय त्रिवृते राथंतराय वासन्ताय बार्हताय द्वादशकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय वाहंताय प्रथमायै द्वादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्कराय हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिंशाय रैवताय शैशिराय द्वादशकपालोऽदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः काय एककपालः (१) ॥

(अग्नये गायत्रायादित्या अनुमत्यै चरुः सप्तचत्वारिंशत्) ।

इति [illegible] यसंहितायां सप्तमाष्टके पञ्चमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

---

१ ख, °द्घोष आराच्छब्द इह दूरशब्दवाची । प्र° । २ च. °त्वमाहित्व° ।

(अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः)।

यदुक्तं सूत्रकारेण—' अग्नये गायत्रायेति दशहविषः सर्वपृष्ठां निर्वपेत् ' इति, तदिदं विधत्ते—

अग्नये गायत्रायेति । अत्र षट्सु हविःषु च्छन्दसा स्तोमेन साम्नर्चा च देवता विशेष्यते । पयसि भवाऽऽमिक्षा पयस्या ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके पञ्चदशोऽनुवाकः)।

यो वा अग्नावग्निः प्रहियते यश्च सोमो राजा तयोरेष आतिथ्यं यदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यत्संचितेऽग्नावेतानि हवीꣳषि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थायं प्रजां पशून्यजमानस्याभि मन्येत यत्संचितेऽग्नावेतानि हवीꣳषि निर्वपति भागधेयेनैवैनꣳ शमयति नास्य रुद्रोऽशान्तः (१) उपोत्थायं प्रजा पशूनभि मन्यते दश हवीꣳषि भवन्ति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठत्यृतुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवीꣳषि निर्वपत्यृतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते दिशः सप्तवाणेनं (२) अभिजित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दिशामभिजित्या एतया वा इन्द्रं देवा अयाजयन्-

(अश्वमेधाङ्गमन्त्रकथनम्)

स्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानां यथा मनुर्मनुष्याणामेवं भवति य एवं विद्वानेतयेष्ट्या यजते दिग्वतीः पुरोनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै (३) ॥

(अशान्तः सुषुवाणेनैकचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः) ।

एतेषां हविषामुत्पत्तिमभिधाय प्रयोगं विधत्ते—

यो वा इति । आधानसिद्धेऽग्नौ योऽन्योऽग्निर्मथित्वा प्रहियते, योऽपि सोमो राजा वल्लीरूपः स्थापितस्तयोरुभयोर्योऽयमग्नीषोमीयः पशुरेष एवाऽऽप्तिरयम् । तेन सत्कारेण तावुभौ तुष्टौ । अथ योऽयमग्निश्चयनेन निष्पाद्यते स एष रुद्रः क्रूरो वर्तते । यदि तस्मिन्संचिनोऽग्नावेतानि यथोक्तानि हवींषि न निर्वपेत्तदानीमेव क्रूरोऽतिकुद्धः सन्समीपमागत्य यजमानस्य प्रजां पशूंश्हिंस्यात् । यद्यिर्वपे तु स्वकीयभागेन तुष्टो न हिनस्ति ।

षष्टयाप्यां हविःसंख्यां प्रशंसति—

दश हवींष्यीति । देवताविशेषणानि प्रशंसति—

ऋतुभिर्वा एष छन्दोभिरिति । ऋतवो वसन्ताद्याः । छन्दांसि गायत्र्यादीनि । स्तोमास्त्रिवृदादयः । पृष्ठानि रथंतरादीनि । एतेषां देवताविशेषणत्वेनोपात्तत्वादृत्वादिभिरेवाग्निश्चितो भवति ।

अथ हवींषि प्रशंसति—

दिशः सुषुवाणेनेति । सुषुवाणेन सोमं सुषुवाणेन दिशो जेतव्याः । पार्श्वादीनां चतुर्दिक्सामान्येन्द्रादीनां चतुर्दिशामूर्ध्वाधोदिशोश्च मिलित्वा दशसंख्योपेतत्वाद्दशभिर्हविर्भिस्तासामभिजयः ।

अथ दशहविःसंघातरूपामेतां सर्ववृष्टेर्दृष्टिं प्रशंसति—

एतया वा इति । सूयत ऐश्वर्यं प्राप्यते येनासौ सवः । इन्द्रस्यैश्वर्यहेतु

(अश्वमेधाङ्गमन्त्रकथनम्)

रिन्द्रतवः । एवं मनुसवोऽप्ययं यज्ञः । तेन यजमानस्ताभ्यामुभाभ्यां सहवर्चसाभ्यां सहवीर्यं गमयति ।

एतेषु दशसु हविष्षु समिद्दिशामाशपा न इत्यनुवाकोक्ता [illegible] ताभ्यानुवाक्या विधत्ते—

दिग्वतीरिति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके षोडशोऽनुवाकः)

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा (१) ॥

(यः प्राणतो द्यौरादित्यौऽष्टाविंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके षोडशोऽनुवाकः)

कल्पः—' यः प्राणतो य आत्मदा इति महिमानौ जुहोति राजवैश्यं पूर्वं सौवर्णेनोत्तरम् ' इति ।

तत्र पूर्वस्य महिमाख्यग्रहस्य मन्त्रं दर्शयति—

यः प्राणत इति । यः प्रजापतिरेक इत्स्वयमेक एव प्राणतः प्राणवतो निमिषतश्चक्षुर्निमेषयुक्तस्य च जगतो महित्वा स्वमहिम्ना राजा बभूव, यश्च प्रजापतिरस्य द्विपदो मनुष्यादेश्चतुष्पदो गवादेश्चेशे स्वामी भवति, कस्मै देवाय

(अश्वमेधाङ्गमन्त्रकथनम्)

वस्मै कस्मैचित्प्राकृतप्राणिभिरनिश्चितरूपाय तादृशाय प्रजापतिरूपाय देवाया-नेम हविषा परिचरेम । हे प्रजापते तस्य ते तादृशस्य तव द्यौर्महिमा द्युलोक एवास्य महिमाख्यग्रहो दृश्यमानानि नक्षत्राणि तव रूपम् । आदित्यस्त्वदीयं तेजः । हे ग्रह त्वां तस्मै तादृशाय महिम्ने महिमयुक्ताय प्रजापतये स्वाहा जुहोमि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्ण-यजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चम-प्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके सप्तदशोऽनुवाकः) ।

य आत्मदा बलदा यस्य विश्व उपासते प्र-शिषं यस्य देवाः । यस्यं छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्यं ते पृथिवी म-हिमौषधयो वनस्पतयो रूपमश्विस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा (१) ॥

(य आत्मदा यः पृथिव्यश्विरेकान्नचत्वारिंशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः) ।

अथ द्वितीयग्रहमन्त्रं पठति—

य आत्मदा इति । यः प्रजापतिरात्मदाः सर्वेषां शरीरप्रदः, यश्च तस्मि-ञ्छरीरे बलप्रदः, यस्य प्रजापतेः प्रशिषं प्रकृष्टं शासनं विश्वे सर्वेऽप्युपासते सेवन्ते, देवा अपि यस्य प्रशिषमुपासते, यस्यामृतं छायेव स्वाधीनं, तथा प्राणिनां मृत्युरपि यस्य स्वाधीनस्तादृशाय कस्मै केनाप्यविज्ञातस्वरूपाय देवाय प्रजापतये हविषा परिचरेम । हे ग्रह त्वमुपयामेन पार्थिवपात्रेण गृहीतोऽसि

(अश्वमेधाङ्गमन्त्रकथनम्)

प्रजापत्यर्थं त्वां गृह्णामि। हे प्रजापते तादृशस्य ते तव पृथिवीरूपो महिमाख्यो ग्रहः। ओषधयो वनस्पतयश्च तव विचित्रं रूपम्। अग्निस्त्वदीयं तेजः। हे ग्रह त्वां तस्मै महिमयुक्ताय प्रजापतये जुहोमि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः।)

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् (१) ॥

(आ ब्रह्मन्नेकचत्वारिंशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः)।

अथान्नहोममन्त्राः। तथा च ब्राह्मणम्-'आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामिति समस्तानि ब्रह्मवर्चसानि जुहोति' इति।

पाठस्तु-

आ ब्रह्मन्ब्राह्मण इति। ब्रह्मन्ब्राह्मणजातौ ब्रह्मवर्चसी श्रुताध्ययनसंपन्नो ब्राह्मण आजायतां सर्वत उत्पद्यताम्। एतदेकं वाक्यमेको मन्त्रः। एवमुत्तरत्रापि। इषव्यो बाणाद्यायुधेषु कुशलः। धेनुरित्यादिष्वाजायतामित्यनु-

वर्तते । सप्तिरश्वः । आशुः शीघ्रगामी । पुरवासिभिर्ध्यायत इति पुरन्धिः, रूपवतीत्यर्थः । अस्य यजमानस्य जिष्णुत्वादिगुणविशिष्टः पुत्र आजायताम् । नोऽस्माकं यदा यदाऽपेक्षा तदा तदा पर्जन्यो वर्षतु । ओषधयश्च बहुफलयुक्ताः पच्यन्ताम् । अलब्धस्य लाभो योगः । लब्धस्य परिपालनं क्षेमः । योगसहितः क्षेमो योगक्षेमः । सोऽस्माकं संपद्यताम् । एतैर्दशभिर्मन्त्रैर्बिल्ववर्चसनामकं होमं कुर्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठक एकोनविंशोऽनुवाकः) ।

आऽक्रान्वाजी पृथिवीमग्निं युजमकृत वाज्यर्वाऽक्रान्वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां वाज्याऽक्रꣳस्त सूर्यं युजमकृत वाज्यर्वाऽग्निस्ते वाजिन्युङ्ङनु त्वाऽऽरभे स्वस्ति मा सं पारय वायुस्ते वाजिन्युङ्ङनु त्वाऽऽ रभे स्वस्ति मा सम् (१) पारयाऽऽदित्यस्ते वाजिन्युङ्ङनु त्वाऽऽ रभे स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृꣳह व्यानधृगसि व्यानं मे दृꣳहापानधृगस्यपानं मे दृꣳह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रं मयि धेह्यायुरस्यायुर्मयि धेहि (२) ॥

(वायुस्ते वाजिन्युङ्ङनु त्वाऽऽ रभे स्वस्ति मा सं त्रिचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठक एकोनविंशोऽनुवाकः ॥१९॥

(अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमकाण्डे पञ्चमप्रपाठक एकोनविंशोऽनुवाकः)।

अथाश्वानुमन्त्रणम्। तथा च ब्राह्मणम्—' आऽक्रान्वाजी क्रमैरत्यक्रमीद्वाणी द्यौस्ते पृष्ठं पृथिवी सधस्थमित्यश्वमनुमन्त्रयते ' इति।

एतेषु त्रिषु मन्त्रेषु प्रथमं मन्त्रं पठति—

आऽक्रान्वाजीति। वाजी वेगवानयमश्वः पृथिवीमाक्रानाक्रान्तवान्। सोऽयां तस्यां पृथिव्यामग्निं युजं योजयितारं व्यवहारनिर्वाहकमकृत। एवमुत्तरत्रापि योज्यम्। हे वाजिन्नग्निस्ते युक्तव योजयिता सहायभूतः। तस्मात्त्वामन्वारभे। त्वं स्वस्ति विनाशराहित्येन मां संपारय सम्यक्कर्मसमाप्तिं प्रापय। एवमुत्तरत्रापि योज्यम्। प्राणं दृंहति दृढी करोतीति प्राणधृक्। हेऽश्व त्वं तादृशोऽस्यतो मे प्राणं दृढी कुरु। एवमुत्तरत्रापि। हेऽश्व त्वं चक्षुरस्यतो मयि चक्षुः स्थापय। एवमुत्तरत्रापि॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठक एकोनविंशोऽनुवाकः॥ १९॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके विंशोऽनुवाकः)।

जज्ञि बीजं वर्ष्टा पर्जन्यः पक्वा सस्यꣳ सुपिप्पला ओषधयः स्वधिचरणेयꣳ सूपसदनोऽग्निः स्वंध्यक्षमन्तरिक्षꣳ सुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन्यथापूर्वमहोरात्रे पञ्चदशिनोऽर्धमासास्त्रिꣳशिनो मासाः कल्पन्ता ऋतवः शान्तः संवत्सरः (१)॥

(जज्ञेकविꣳशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके विंशोऽनुवाकः॥ २०॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः)

अथान्येऽग्नहोत्रमन्त्रा उच्यन्ते ।

तथा च ब्राह्मणम्—' जज्ञि बीजमिति जुहोत्यनन्तरित्यै ' इति ।

पाठस्तु—

जज्ञि बीजमिति । यदेतद्व्रीह्यादि बीजं तज्जज्ञि जननस्वभावमस्तु । अस्त्विति सर्वत्राध्याहारः । पर्जन्यो वर्षा वृष्टिकारोऽस्तु । सस्यं पक्वा पाकशीलम् । ओषधयश्च सुपिप्पलाः शोभनफलाः । इयं पृथिवी स्वधिचरणा सुखेनाधिष्ठाय चरितुं शक्या । अग्निः सूपसदनः सुखेनोपसत्तुं परिचरितुं शक्यः । अन्तरिक्षं स्वभ्यक्षं सुखेनाभ्यक्षितव्यं धूमकेत्वाद्युत्पातरहितमित्यर्थः । पवमानो वायुः सुपावोऽनुपद्रवकोरिसंचारयुक्तः । द्यौः सूपस्थाना सुखेनावस्थातुं शक्या, दैविकोपद्रवरहितेत्यर्थः । असावादित्यः शिवमुपद्रवरहित्यं यथा भवति तथा तपन्वर्ततां । अहोरात्रे यथापूर्वं कल्पादेवाऽऽरभ्य येन क्रमेण प्रवृत्ते तथैवाद्यापि प्रवर्तेताम् । अर्धमासा न्यूनाधिकरहित्येन पञ्चदशदिनयुक्ताः । तथा मासाश्चिंशद्दिनयुक्ताः । ऋतवः कल्प्तास्तत्तल्लक्षणोपेताः । संवत्सरः शान्तः प्रजापीडारहितः । एतैः पञ्चदशभिर्मन्त्रैरग्नहोमाः कर्तव्याः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः ॥ २० ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठक एकविंशोऽनुवाकः)।

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नाऽऽगच्छेदग्नयेऽग्नहोमुचेऽष्टाकपालः सौर्यं पयो वायव्यं आज्यभागः (१) ॥

(आग्नेयश्चतुर्विंशतिः) ।

---

१ ख. घ. ङ. च. °कारी सं° ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठक एकविंशोऽनुवाकः) ।

यथाश्वस्य रोगादिनिमित्ते प्राप्ते प्रायश्चित्तेष्टय उच्यन्ते । तथा च ब्राह्मणम्—' यद्यश्वमुपतपद्विन्देत् । आग्नेयमष्टाकपालं निर्वपेत् ' इत्यादि ।

इष्टीनां पाठस्तु—

आग्नेयोऽष्टाकपाल इति । मृगारण्येऽश्वनिवासस्थाने यदि नाऽऽगच्छेत्, तत्रानागमनमेकं निमित्तम् । निमित्तान्तराणि तु ब्राह्मणे द्रष्टव्यानि । तान्येतानि नव हवींषि प्रायश्चित्तरूपाणि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके द्वाविंशेऽनुवाकः) ।

अग्नयेऽश्वहोमुचेऽष्टाकपाल इन्द्राया श्वहोमुच एकादशकपालो मित्रावरुणाभ्यामाग्रेयोमुग्भ्यां पयस्या वायोसावित्र आग्नोमुग्भ्यां चरुरश्विभ्यामाग्नोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमतये चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामश्वहोमुग्भ्यां द्विकपालः (1) ॥

(अग्नयेऽश्वहोमुचे त्रिश्वत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अश्वमेधाङ्गमन्त्रकथनम्)

(अथ सप्तमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः) ।

यदुक्तं सूत्रकारेण—' अग्नयेऽंहोमुचेऽष्टाकपाल इति दशहविषं मुमोरेहि-नमुनिर्वपति ' इति, तदेतद्विधत्ते—

अग्नय इति । अंहसो मोचयतीत्यंहोमुक् । आगसो मोचयत इत्यागोमुचौ । **वायुश्च** सविता च वायोसावित्रः, वायुसावितृभ्यामित्यर्थः । धाना भृष्टयवाः । **एनसो** मोचयन्तीत्येनोमुचः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः) ।

अग्नये सꣳनमत्पृथिव्यै सꣳनमद्यथाऽग्निः पृथिव्या सꣳनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे सꣳनमदन्तरिक्षाय सꣳनमद्यथा वायुरन्तरिक्षेण सूर्याय सꣳनमद्दिवे सꣳनमद्यथा सूर्यो दिवा चन्द्रमसे सꣳनमन्नक्षत्रेभ्यः सꣳनमद्य-था चन्द्रमा नक्षत्रैर्वरुणाय सꣳनमदद्भ्यः सꣳनम-द्यथा (१) वरुणोऽद्भिः साम्ने सꣳनमद्यचे सꣳनमद्यथा सामर्चा ब्रह्मणे सꣳनमत्क्षत्राय सꣳनमद्यथा ब्रह्म क्षत्रेण राज्ञे सꣳनमद्विशे सꣳनमद्यथा राजा विशा रथाय सꣳनमदश्वेभ्यः सꣳनमद्यथा रथोऽश्वैः प्रजापतये सꣳनमदृतेभ्यः सꣳनमद्यथा प्रजापतिर्मुतैः समꣳनमदेवं मह्यं भद्राः संनतयः सं नमन्तु (२) ॥

(अद्भ्यः सꣳनमद्यथा मह्यं चत्वारि च) ।

(अश्वमेधाङ्गमन्त्रकथनम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः)।

अथ संनतिहोमा उच्यन्ते। तथा च ब्राह्मणम्–' अग्नये समनमत्पृथिव्यै समनमदिति संनतिहोमाञ्जुहोति ' इति।

पाठस्तु–

अग्नये समिति। सर्वोऽपि यजमानोऽग्नये समनमत्संनतिं परिचर्यामकरोत्। तथा पृथिव्यै समनमत्परिचर्यामकरोत्। स च पृथिव्या सहितोऽग्निर्यथा समनमद्येन प्रकारेण तस्मै यजमानाय संनतिमुपकारमकरोत्, एवमनेन प्रकारेण मह्यं मदर्थं मदाः संनतयः कल्याणा उपकारा देवक्लृप्ताः संनमन्तु प्राप्नुवन्तु। एवमुत्तरेष्वपि मन्त्रेषु योजनीयम्। समनमदेवं महामित्यादिकं सर्वत्रानुषज्यते। तदर्थमेवान्ते पुनः पाठः। एतैर्दशभिर्मन्त्रैरन्नहोमेषु संनतिनामका होमाः कर्तव्याः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः)।

ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि। नमोऽग्नये पृथिविक्षितें लोकस्पृतें लोकमस्मै यजमानाय देहि नमो वायवेऽन्तरिक्षक्षितें लोकस्पृतें लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षितें लोकस्पृतें लोकमस्मै यजमानाय देहि (१)॥

(ये ते चतुश्चत्वारिंशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः ॥ २४ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके चतुर्विंशोऽनुवाकः) ।

कल्पः—' ये ते पन्थानः सवितः पूर्व्यास इत्यध्वर्युर्यजमानं वाचयति' इति ।

पाठस्तु—

ये ते पन्थान इति । हे सवितर्देव ते तव संबन्धिनः पूर्व्यासः पूर्वसिद्धा अन्तरिक्षे विततास्तृता अरेणवो धूलिरहिता ये मार्गाः सन्ति, सुगेभिः सुष्ठु गन्तुं शक्यैस्तेभिस्तैर्मार्गैरागत्याद्यास्मिन्कर्मणि नोऽस्मान्रक्ष । तथा नोऽस्मान्-धिब्रूहि चाधिकोऽयं यजमान इति देवानामग्रे कथय च ।

कल्पः—' नमोऽग्नये पृथिविक्षित इत्येतैश्च यथालिङ्गम् ' इति । उपविशत इत्यनुवर्तते ।

पाठस्तु—

नमोऽग्नय इति । पृथिविक्षिते भूनिवासिने लोकस्पृते लोकस्य प्रीणयि-त्रेऽग्नये नमोऽस्तु । अस्मै यजमानाय लोकमुत्तमस्थानं देहि । एवमुत्तरयोरपि योज्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु-
र्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
चतुर्विंशोऽनुवाकः ॥ २४ ॥

(अथ सप्तमाष्टके पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः)।

यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वा-
न्मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः
सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं दिशः पार्श्वे
अवान्तरदिशाः पशवोऽहोरात्रे निमेषोऽर्धमासाः
पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवत्सर
आत्मा रश्मयः केशा- नक्षत्राणि रूपं तारका

(अश्वमेधाङ्गमन्त्रकथनम्)

अस्थानि नर्मो मा꣡ꣳसान्योषधयो लोमानि वनस्पतयो वालाः अग्निर्मे वैश्वानरो व्यात्तम् (१) समुद्र उदरमन्तरिक्षं पायुर्यावापृथिवी आण्डौ आवा शेपः सोमो रेतो यज्जंजभ्यते तद्वि द्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सं बभूवतुर्हयो देवानवहदर्वाऽसुराञ्वाजी गन्धर्वानश्वो मनुष्यान्त्समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः * (२) ॥

(व्यात्तमवहद्द्वादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां सप्तमाष्टके पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः ॥ २५ ॥

गावो गावः सिषासन्तीः प्रथमे मासि समान्यो यदि सोमौ षडहैरुत्तृण्या३ देवानामक्र्येण चर्मावे पृथिव्यै दत्वते कस्त्वाऽग्नये यो वै यः प्राजतो य आत्मदा आ ब्रह्मन्ब्राह्मणो ब्रह्मचर्याऽक्रान्वाजी जज्ञिषीजमाग्नेयोऽष्टाकपालोऽग्नयेऽ२होमुचेऽष्टाकपालोऽग्नये सवनमष्टये ते पन्थानो यो वा अश्वस्य मेध्यस्य शिरः पञ्चविꣳशतिः ॥ २५ ॥

गावः समान्यः सवनमष्टाभिर्वा एते देवरुतं चाभिजित्या इत्या-

हुर्वरुणोऽग्निः साम्ने चतुःपञ्चाशत् ॥ ५४ ॥

---

* यद्यप्यत्र संहितायां पदपाठे च बन्धुरिति पदं वैदिका न पठन्ति तथाऽपि भाष्यकारसंमतत्वात् ' व्यात्तमवहद्द्वादश च ' इतिवैदिकसंप्रदायानुरोधिप्रतीकवाक्योक्तद्वादशसंख्यापूरणार्थमावश्यकत्वाच्च, स्थापितम ।

हरिः ॐ ।

इति कृष्णयजुर्वेदतैत्तिरीयसंहितायां सप्तमाष्टके
पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ सप्तमकाण्डे पञ्चमप्रपाठके पञ्चविंशोऽनुवाकः) ।

अथान्तिमेऽनुवाके सर्वजगदात्मकत्वेनाश्वः स्तूयते । अथवा विराड्रूपणाश्वोपासनप्रतिपादकोऽयमनुवाकः प्रकरणादुत्तरुभ्योपनिषद्दौ द्रष्टव्यः । अत एव वाजसनेयिन एतदर्थप्रतिपादकं ब्राह्मणमुपनिषदादावामनन्ति ।

पाठस्तु–

यो वा अश्वस्येति । यः पुमान्मेध्यस्य यागयोग्यस्याश्वस्य शिरो वेद शिरःप्रभृतीनवयवान्विराडवयवभूतांषःकालादिरूपेणोपास्ते सोऽयं शीर्षण्वानुषः-कालादिरूपैः शिरःप्रभृतिभिर्विराडवयवैर्युक्तो मेध्यो यागफलयोग्यो भवति । क्रत्वनुष्ठानस्य चोपासनस्य च समानं फलम् । तथा च पञ्चमकाण्डे समाम्नातम्–' सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद ' इति । तत्र कस्मिन्नश्वावयवे को विराडवयवो ध्यातव्य इति तत्सर्वमुच्यते–मेध्यस्याश्वस्य यच्छिरस्तदुषा उषःकालरूपम् । यदश्वस्य चक्षुस्तत्सूर्यः । यत्तदीयः प्राणः सोऽयं वाह्यो वायुः । यत्तदीयं श्रोत्रं सोऽयं चन्द्रमाः । ये तदीयाः पादास्ताः प्राच्या दिशः । ये पर्शवः पार्श्वास्थिविशेषास्ता इमा आग्नेय्याद्यवान्तरदिशाः । यस्तदीयो निमेष उन्मेषसहितस्ते उभे अहोरात्रे । यानि तदीयहस्तपादगतपर्वाणि ते शुक्लकृष्णपक्षरूपा अर्धमासाः । यानि च पर्वणां संधानानि ते चैत्राद्या मासाः । यानि चानुकविशेषाणि खराद्यङ्गानि ते वसन्ताद्या ऋतवः । य आत्मा मध्यदेहः स संवत्सरकालः । ये तदीयाः केशास्ते सूर्यरश्मयः । यदश्वस्य भास्वररूपं तानि कृत्तिकादिनक्षत्राणि । यान्यनुकान्यस्थानि तानि बृहस्पतिशुक्रकृष्णवाद्याः प्रौढतारकाः । यानि तत्र तत्र स्थितानि मांसखण्डानि तदेतन्नभः । यानि क्षुद्रलोमानि वा ओषधयः । ये वालाः पुच्छगता दीर्घकेशास्ते वनस्पतयः । यदेतन्मुखं संपद्यतेऽयं लोकपालिन्दोऽग्निः । यदस्याद्यं मुखविदारणं सोऽयं वैश्वानरनामको देवताविशेषः । यदुदरं सोऽयं समुद्रः । यः पायुस्तदन्तरिक्षम् । यावाण्डौ ते द्यावापृथिव्यौ । यः शेपः

(अश्वमेधाङ्गमन्त्रकथनम्)

सोऽयमभिषवार्थो ग्रावा। यद्ग्रावः स सोमरसः। यज्जंजम्यते गात्राणि विनामयति सेयं विद्युत्। यद्विधूनुते सशब्दं शरीरं कम्पयति तदेतद्गर्जनम्। यदेवम्मेहनं सेयं वृष्टिः। अस्य हेषाशब्दरूपा या वाक्सेयं वेदरूपा वागेव। आयमानस्य क्रतौ प्रयुज्यमानस्याश्वस्य यः संज्ञपनात्पुरस्तान्माहिमाख्यो राजतग्रहस्तदिदमहरेव। एनं पश्चादेतस्याश्वस्य संज्ञपनादूर्ध्वं यो माहिमाख्यः सौवर्णग्रहः सेयं रात्रिः। एतावेवोभौ माहिमानौ ग्रहावश्वमायतः संज्ञपनात्पूर्वं पश्चाच्च व्यवस्थितौ। हयार्ववाख्यथा अवान्तरजातिविशेषास्तद्रूपेण देवादीन्वहन्ति। एवंविधस्य विराड्रूपस्याश्वस्य समुद्र एव योनिः कारणम्। समुद्रवत्पुरुषदेव जगदस्मादिति समुद्रः परमात्मा। नह्यन्यस्मादयं विराड्रूपमुत्क्रामति। स एवास्य बन्धुः सम्भः स्थितिहेतुरित्यर्थः। एवमुपासितो यापक्षयद्वारा विराड्रूपं प्राप्नोति। 'तं यथा यथोपासते तथैव भवति' इति श्रुत्यन्तरात्। विराट्प्राप्तिश्च क्रममुक्तिहेतुः। तत्र ज्ञानोत्पत्तौ सत्यां तेन विराजा सह मुच्यमानत्वात्। तथा च स्मृतिः—

'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति॥

एतच्च भगवान्व्यासः 'कार्यात्यये तदध्यक्षेणातः परमभिधानात्' इत्यस्याधिकरणे महता प्रबन्धेन प्रतिपादयामासेत्यशेषमविमङ्गलम्।

अथास्य प्रपाठकस्य विनियोगसंग्रहः—

विहितं पञ्चमस्याऽऽद्ये गवामयनसत्रकम्।
तद्द्वैविध्यं द्वितीये स्यात्तृतीये पृष्ठनिर्णयः॥
चतुर्थे व्यत्ययः पूर्वपक्षस्यान्त्यस्य पक्षसि।
पञ्चमे संसवः षष्ठे भवेदुत्सर्गसत्रकम्॥
तन्मीमांसा सप्तमे स्यादष्टमे तु महाव्रतम्।
सामानि नवमे प्रोक्ता वीणाद्या दशमे पुनः॥
दासीनृत्यं ततस्तूर्ध्वं मन्त्राश्चैवाश्वमेधगाः।
पृष्ठ्य(ष्ठ्य)महोमाः पञ्चाशदेकपञ्चाशदीरिताः॥
दृश्यते परिधीनां तु कस्त्वामन्त्रत्रयं भवेत्।
अग्नये सर्वपृष्ठेष्टेः प्रयोगोऽनन्तरे श्रुतः॥

यः प्राणतो य आत्मेति तावुभौ महिमग्रहौ ।
आ ब्रह्मन्दशभिर्मन्त्रैर्ब्रह्मवर्चसहोमकः ।
आऽऽकानभं मन्त्रयेत जज्ञीति(पञ्च)दशभिर्हुतिः ।
आग्ने नैमित्तिका यागा भुगारेष्टिरथाग्नये ॥
अग्न तंनतिहोमाः स्युर्दश ये स्वामिदाचनम् ।
[* नमस्त्रिभिरुपस्थानं यो वै विधिरुपास्तये ॥
क्रतुराडश्वमेधोऽयं विराड्ध्यानमुपास्तिराट्] ।
ताभ्यामुत्पद्यते ज्ञानं कृतकृत्यो भवत्यतः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे पञ्चमप्रपाठके
पञ्चविंशोऽनुवाकः ॥ २५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराज-
परमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये सप्तमकाण्डे
पञ्चमः प्रपाठकः ॥ ५ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराज-
परमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपाल-
केन सायणाचार्येण विरचिते माधवीये वेदार्थ-
प्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिता-
भाष्ये सप्तमः काण्डः ॥ ७ ॥

---

* धनुश्चिह्नान्तर्गतस्थाने क. पुस्तके ' यो वा अश्वोपास्तिरित्थं कर्मविधे प्रपञ्चिते ' इत्यर्धमेव विद्यते ।